

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ वैशाखमाहात्म्यप्रारंभः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीगणेशायनमः ॥ ॥ नारायणंनमस्कृत्य० ॥ ॥ सूतउवाच ॥ ॥ भूयोऽप्ययंगभुवंराजाब्रह्मणःपरमेष्ठिनः ॥ पुण्यंमाधवमाहात्म्यंपर्यपृच्छन्महामुनिं ॥ १ ॥ ॥ अंबरीषउवाच ॥ ॥ सर्वेषामपिमासानांत्वत्तोमाहात्म्यमुत्तमं ॥ श्रुतंमयापुराब्रह्मन्यदाचोक्तंत्वयाऽनघ ॥ २ ॥ वैशाखःप्रवरोमासोमासेष्वेतेषुनिश्चितं ॥ इतितस्माद्विस्तरेणमाहात्म्यंमाधवस्यच ॥ ३ ॥ श्रोतुंकौतूहलं विद्वन्कथंविष्णुप्रियोह्यसौ ॥ केचविष्णुप्रियाधर्मामासेमाधववल्लभे ॥ ४ ॥ तत्राप्यस्यतुकर्तव्याःकेधर्माविष्णुवल्लभाः ॥ किंदानंकिंफलंतस्यकमुद्दिश्याचरेदिमान् ॥ ५ ॥ कैर्द्रव्यैःपूजनीयोऽसौमाधवोमाधवागमे ॥ एतन्नारदविस्तार्यमह्यंश्रद्धावतेवद ॥ ६ ॥ ॥ नारदउवाच ॥ ॥ मयापृष्ठःपुराब्रह्मामासधर्मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्सनातनान् ॥ [1]व्याजहारपुराप्रोक्तंयच्छ्रियैपरमात्मना ॥ ७ ॥ ततोमासावि-
शिष्टोक्ताःकार्तिकोमाघएवच ॥ माधवस्तेषुवैशाखंमासानामुत्तमं[2]व्यधात् ॥८॥
मातेवसर्वजीवानांसदैवेष्टप्रदायकः ॥ दानयज्ञव्रतस्नानैःसर्वपापविनाशनः ॥
९ ॥ धर्मसारःक्रियासारस्तपःसारःसुरार्चितः ॥ विद्यानांवेदविद्येवमंत्राणांप्र-
णवोयथा ॥ १० ॥ भूरु[3]हाणांसुरतरुर्धेनूनांकामधेनुवत् ॥ शेषवत्सर्वनागा-
नांपक्षिणांगरुडोयथा ॥ ११ ॥ देवानांतुयथाविष्णुर्वर्णानांब्राह्मणोयथा ॥
प्राणवत्प्रियवस्तूनांभार्यैवसुहृदांतथा ॥ १२ ॥ [4]आपगानांयथागंगातेजसां
तुरविर्यथा ॥ आयुधानांयथाचक्रंधातूनांकांचनंयथा ॥ १३ ॥ वैष्णवानांय-

१ उक्तवान् । २ कृतवान् । ३ वृक्षाणां । ४ नदीनां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थारुद्रोरत्नानांकौस्तुभोयथा ॥ मासानांधर्महेतूनांवैशाखश्चोत्तमस्तथा॥१४॥
नानेनसदृशोलोकेविष्णुप्रीतिविधायकः ॥ वैशाखस्नाननिरतेमेषेप्रातर्भगोदे-
ये ॥ १५ ॥ लक्ष्मीसहायोभगवान्प्रीतिंतस्मिन्करोत्यलम् ॥ जंतूनांप्रीणे-
नंयद्वदन्नेनैवाहिजायते ॥ १६ ॥ तद्वद्वैशाखस्नानेनविष्णुःप्रीणात्यसंशयः ॥
वैशाखस्नाननिरतान्जनान्दृष्ट्वाऽनुमोदते ॥ १७ ॥ तावताऽपिविमुक्ताघोवि-
ष्णुलोकेमहीयते ॥ सकृत्स्नात्वामेषसंस्थेसूर्येप्रातःकृताह्निकः ॥ १८ ॥ महा-
पापैर्विनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् ॥ स्नानार्थंमासिवैशाखेपदमेकंचले-
द्यदि ॥ १९ ॥ सोऽश्वमेधायुतानांचफलंप्राप्नोत्यसंशयः ॥ अथवाकूटचित्त-

१ सूर्योदये । २ संतोषः। ३ कूटे परमात्मनि चित्तं यस्यैवंभूतः सन् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तुकुर्यात्संकल्पमात्रकं ॥ २० ॥ सोऽपिक्रतुशतंपुण्यंलभतेनात्रसंशयः ॥ योग-
च्छेद्धनुरायामंस्नातुंमेषगतेरवौ ॥ २१ ॥ सर्वबंधविनिर्मुक्तोविष्णोःसायुज्य-
माप्नुयात् ॥ त्रैलोक्येयानितीर्थानिब्रह्मांडांतर्गतानिच ॥ २२ ॥ तानिसर्वा-
णिराजेंद्रसंतिवाह्येऽल्पकेजले ॥ तावल्लिखितपापानिगर्जंतियमशासने ॥२३॥
यावन्नकुरुतेजंतुर्वैशाखेस्नानमंभसि ॥ तीर्थाधिदेवताःसर्वावैशाखेमासिभूमि-
प ॥ २४ ॥ बहिर्जलंसमाश्रित्यसदासन्निहितानृप ॥ सूर्योदयंसमारभ्यपश्चा-
त्षड्घटिकावधि ॥ २५ ॥ तिष्ठंतिचाज्ञयाविष्णोर्नराणांहितकाम्यया ॥ ताव-
न्नागच्छतांपुंसांशापंदत्वासुदारुणं ॥ स्वस्थानंयांतिराजेंद्रतस्मात्स्नानंसमा-
चरेत् ॥२६॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेस्नानप्रशं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सनंनामप्रथमोऽध्यायः ॥ १ ॥ नारदउवाच ॥ नमाधवसमोमासोनकृतेनसमं युगं ॥ नचवेदसमंशास्त्रंनतीर्थंगंगयासमं ॥ १ ॥ नजलेनसमंदानंनसुखंभार्यया समं ॥ नकृषेस्तुसमंवित्तंनलाभोजीवितात्परः ॥ २ ॥ नतपोऽनशनात्तुल्यंन दानात्परमंसुखं ॥ नधर्मस्तुदयातुल्योनज्योतिश्चक्षुषासमं ॥ ३ ॥ नतृप्ति-रशनात्तुल्यानवाणिज्यंकृषेःसमं ॥ नधर्मेणसमंमित्रंनसत्येनसमंयशः ॥ ४ ॥ नारोग्यसममुत्थानंनत्राताकेशवात्परः ॥ नमाधवसमंलोकेपवित्रंकवयोविदुः॥ ५ ॥ माधवःपरमोमासःशेषशायिप्रियःसदा ॥ अव्रतेननयेद्यस्तुमासंमाधव-वल्लभं ॥ ६ ॥ तिर्यग्योनिंसयात्याशुसर्वधर्मबहिष्कृतः ॥ अव्रतेनगतोयेषां माधवोमर्त्यधर्मणां ॥ ७ ॥ इष्टापूर्तंवृथातेषांधर्मोधर्मभृतांवर ॥ प्रवृत्तानांतु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्ष्याणांमाधवेनियमेकृते ॥ ८ ॥ अवश्यंविष्णुसायुज्यंप्राप्नोत्येवनसंशयः ॥ संतीहबहुवित्तानिव्रतानिविविधानिच ॥ ९ ॥ देहायासकराण्येवपुनर्जन्मप्रदानिच ॥ वैशाखस्नानमात्रेणनपुनर्जायतेभुवि ॥ १० ॥ सर्वदानेषुयत्पुण्यं सर्वतीर्थेषुयत्फलं ॥ तत्फलंसमवाप्नोतिमाधवेजलदानतः ॥ ११ ॥ स्वस्य सामर्थ्यराहित्येपरस्यापिप्रबोधनं ॥ कर्तव्यंभूतिकामेनसर्वदानाधिकंहितत् ॥ १२ ॥ एकतःसर्वदानानिजलदानंतथैकतः ॥ तुलामारोपितंपूर्वंजलदानं विशिष्यते ॥ १३ ॥ मार्गेऽध्वगानांयोमर्त्यःप्रपादानंकरोतिहि ॥ सकोटिकुलमुद्धृत्यविष्णुलोकेमहीयते ॥ १४ ॥ देवानांचऋषीणांचपितॄणांराजसत्तम ॥

१ बहुवित्तसाध्यानीत्यर्थः । २ उपदेशं । ३ प्रवासिनां । ४ पाणपोई इति ख्यातं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्यंतप्रीतिदंसत्यंप्रपादानंनसंशयः ॥ १५ ॥ प्रपादानेनसंतुष्टायेनाध्वश्रम-कर्शिताः ॥ तोषितास्तेनदेवाश्चब्रह्मविष्णुशिवादयः ॥ १६ ॥ सलिलंसलि-लाकांक्षीछायांछायामपीच्छति ॥ व्यजनंव्यजनाकांक्षीवैशाखेमासिभूमिप ॥ १७ ॥ जलंछत्रंचव्यजनंदानमेषांविशिष्यते ॥ माधवेमासिसंप्राप्तेब्राह्मणाय कुटुंबिने ॥ १८ ॥ अदत्वोदककुंभंतुचातकोजायतेभुवि ॥ योदद्याच्छीतलंतो-यंतृषार्तायमहात्मने ॥ १९ ॥ तावन्मात्रेणराजेंद्रराजसूयायुतंलभेत् ॥ घर्म-श्रमार्तंविप्रंतुवीजयेद्व्यजनेनयः ॥ २० ॥ तावन्मात्रेणनिष्पापोविहगाधिपति-र्भवेत् ॥ अदत्वाव्यजनंभूपवैशाखेतुद्विजातये ॥ २१ ॥ वातरोगशताकीर्णो नरकानेवाविंदति ॥ योवीजयेत्पटेनापिपथिश्रांतंद्विजोत्तमं ॥ तावतापिविमु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्काघोविष्णुसायुज्यमाप्नुयात् ॥ २२ ॥ यस्तालव्यजनंवापिदद्याच्छुद्धेनचेतसा
॥ विधूयसर्वपापानिब्रह्मलोकंसगच्छति ॥ २३ ॥ सद्यःश्रमहरंपुण्यंनदद्याद्व्य-
जनंनरः ॥ नारकींयातनांभुक्त्वाकश्मलोजायतेभुवि ॥ २४ ॥ आध्यात्मिका-
दिदुःखानांशांतयेमनुजेश्वर ॥ छत्रंदद्यात्प्रयत्नेनवैशाखेमासिवासकृत् ॥२५॥
अच्छत्रदोनरोयस्तुवैशाखेमाधवप्रिये ॥ छायाहीनोमहाक्रूरःपिशाचोजायते
भुवि ॥ २६ ॥ योदद्यात्पादुकेदिव्येमाधवेमाधवप्रिये ॥ यमदूतांस्तिरस्कृत्य
विष्णुलोकंसगच्छति ॥ २७ ॥ पादत्राणंतुयोदद्याद्वैशाखेमाधवागमे ॥ नत-
स्यनारकोलोकोनक्लेशादैहिकाश्चये ॥ २८ ॥ पादुकांयाचमानाययोदद्याद्ब्रा-
ह्मणायवै ॥ सभूपालोभवेद्भूमौकोटिजन्मस्वसंशयः ॥ २९ ॥ अनाथमंडपं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मार्गश्रमहारिकरोतियः ॥ तस्यपुण्यफलंवक्तुंब्रह्मणाऽपिनशक्यते ॥ ३० ॥ मार्गश्रांतायविप्रायप्रश्रयंप्रददातियः॥ तस्यपुण्यफलंवक्तुंब्रह्मणापिनशक्यते॥ ३१ ॥ मध्याह्नेब्राह्मणंप्राप्तमतिथिंभोजयेद्यदि ॥ नतस्यफलविश्रांतिर्ब्रह्मणा-पिनिरूपिता ॥ ३२ ॥ सद्यआप्यायनंनृणामन्नदानंनराधिप ॥ तस्मान्नाने-नसदृशंदानंलोकेषुविद्यते ॥ ३३ ॥ दारापत्यगृहादीनिवासोऽलंकारभूषणं ॥ असह्यंनाश्नतःपुंसःसह्यंभुक्तवतोध्रुवं ॥ ३४ ॥ तस्मादन्नसमंदानंनभूतंनभ-विष्यति ॥ वैशाखेयेननोदत्तंमार्गश्रांतेचभूसुरे ॥ ३५ ॥ सपिशाचोभवेद्भू-मौस्वमांसान्येवखादति ॥ यथाशक्तिप्रदातव्यंतस्मादन्नंद्विजातये ॥ ३६ ॥

१ समाप्तिः । सामेति यावत् । २ सुखकरं । ३ ब्राम्हणायेत्यर्थः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्नदोमातृपित्रादीन्विस्मारयतिभामिप ॥ तस्मादन्नंप्रशंसंतिलोकास्त्रैलोक्य-
वर्तिनः ॥ ३७ ॥ मातरःपितरश्चापिकेवलंजन्महेतवः ॥ अन्नदंपितरंलोकेप्र-
वदंतिमनीषिणः ॥ ३८ ॥ अन्नदेसर्वतीर्थानिअन्नदेसर्वदेवताः ॥ अन्नदेसर्व-
धर्माश्चतिष्ठंत्यरिधराजय ॥ ३९ ॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्ये
नारदांबरीषसंवादेदानमहिमनिरूपणंनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ नार-
दउवाच ॥ ॥ योमर्त्योद्विजवर्यायपर्यंकंतुश्रमापहं ॥ यत्रस्वस्थःसुखंशेतेशी-
तानिलनिषेवितः ॥ १ ॥ धर्मसाधनभूतोहिदेहोनीरुजमासते ॥ तंदत्वासक-
लंदुःखंनिरस्यगतकल्मषः ॥ २ ॥ अखंडपदवींयातियोगिनामपिदुर्लभां ॥
वैशाखेघर्मतप्तानांश्रांतानांतुद्विजन्मनां ॥ ३ ॥ दत्वाश्रमापहंदिव्यंपर्यंकम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नुजेश्वर ॥ नजातुसीदतेलोकेजन्ममृत्युजरादिभिः ॥ ४ ॥ गृहीत्वाब्राह्मणो
यत्रशेतेचाजीवमास्थितः ॥ आसीनेसकलंपापंज्ञानतोऽज्ञानतःकृतं ॥ ५ ॥
विलयंयातिराजेंद्रकर्पूरइववाह्निना ॥ शयानेब्रह्मनिर्वाणंसनरोयातिनिश्चितं ॥
६ ॥ योदद्यात्कशिपुंमासेवैशाखेविष्णुवल्लभे ॥ सर्वभोगसमायुक्तस्तस्मिन्नेव
हिजन्मनि ॥ ७ ॥ सनरोवर्ततेनूनंरोगादिभिरनाहृतः ॥ आयुष्यंपरमारोग्यं
यशोधैर्यंचविंदति ॥ ८ ॥ नाधार्मिकाःकुलेतस्यजायंतेशतपूरुषं ॥ भुक्त्वा-
तुसकलान्भोगांस्ततःपंचत्वमागतः ॥ ९ ॥ निर्धूताखिलपापस्तुब्रह्मनिर्वाण-
मृच्छति ॥ विशिष्टायद्विजेंद्राययोदद्यादुपबर्हणं ॥ १० ॥ सुखंनिद्राविना

१ शयनं । २ त्यक्तदेहः । ३ उपधानं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येननन्नृणांजायतेक्वाचित् ॥ सर्वेषामाश्रयोभूत्वाभुविसाम्राज्यमश्नुते ॥ ११ ॥
पुनःसुखीपुनर्भोगीपुनर्धर्मपरायणः ॥ आसप्तजन्मराजेंद्रजायतेसर्वतोजयी ॥
१२ ॥ पश्चात्सप्तकुलैर्युक्तोब्रह्मभूयायकल्पते ॥ तार्णंकटंतुयोदद्यात्कटमन्यं-
दथापिवा ॥ १३ ॥ तत्रशेतेस्वयंविष्णुःपत्रस्थःपरमेश्वरः ॥ यथाजालगता
चोर्णानजालैर्बध्यतेक्वाचित् ॥ १४ ॥ तथासंसारगोजंतुःसंसारेणनबध्यते ॥
आसनेशयनेशस्तःकटदःसर्वतःसुखी ॥ १५ ॥ प्रश्रयेशयनार्थंवायोदद्यात्क-
टकंबले ॥ तावन्मात्रेणमुक्तःस्यान्नात्रकार्याविचारणा ॥ १६ ॥ निद्रयाहीयंते
दुःखंनिद्रयाहीयतेश्रमः ॥ सानिद्राकटसंस्थस्यसुखंसंजायतेध्रुवं ॥ १७ ॥

१ तृणनिर्मितं । २ अन्यत् वंशादिनिर्मितमित्यर्थः । ३ नश्यति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योदद्यात्कंबलंराजन्वैशाखेमाधवप्रिये ॥ अपमृत्योःकालमृत्योर्मुक्तोजीवतिवै शतं ॥ १८ ॥ दद्यात्सूक्ष्मतरंवस्त्रंद्विजेंद्रेघर्मकर्शिते ॥ पूर्णमायुरवाप्नोतिपरत्र चपरांगतिं ॥ १९ ॥ अंतस्तापहरंदिव्यंकर्पूरंतुद्विजातये ॥ दत्वामोक्षमवाप्नोतिदुःखशांतिंचाविंदति ॥ २० ॥ कुसुमानिचयोदद्यात्कुंकुमंचद्विजातये ॥ सार्वभौमोभवेद्राजासर्वलोकवशंकरः ॥ २१ ॥ पुत्रपौत्रादिभोगांश्चभुक्त्वामोक्षमवाप्नुयात् ॥ त्वगस्थिगतसंतापंसद्योहरतिचंदनं ॥ २२ ॥ तापत्रयविनिर्मुक्तस्तद्दत्वामोक्षमाप्नुयात् ॥ उशीरचंपकैलाभिर्योदद्याद्वासितंजलं ॥२३॥ सर्वभूतेषुराजेंद्रसतुदेवसहायवान् ॥ पापहानिंदुःखहानिंप्राप्यनिर्वृतिमाप्नुयात्॥

१ वर्षाणीतिशेषः । २ काश्मीरजं । ३ सुखं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२४ ॥ गोरोचनांमृगनाभिंदद्याद्वैशाखधर्मवित् ॥ तापत्रयविनिर्मुक्तःपरंनि-
र्वाणमृच्छति ॥२५॥ तांबूलंचसकर्पूरंयोदद्यान्मेषगेरवौ॥ सार्वभौमसुखंभुक्त्वा
परंनिर्वाणमृच्छति ॥ २६ ॥ शेवंतींयूथिकांजातिंमेषमासेददन्नरः ॥ ससार्व-
भौमोभवतिपश्चान्मोक्षंचविंदति ॥ २७ ॥ केतकीमल्लिकापुष्पंयोदद्यान्माध-
वागमे ॥ सतुमोक्षमवाप्नोतिमधुसूदनशासनात् ॥ २८ ॥ पूगीफलंतुयोद-
द्यात्सुगंधंचद्विजातये ॥ नारिकेलफलंराजंस्तस्यपुण्यफलंशृणु ॥ २९ ॥ स-
प्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः ॥ पश्चात्सप्तकुलैर्युक्तोविष्णुलोकंसगच्छति
॥ ३० ॥ विश्रामममंडपंयस्तुप्रकुर्याद्विजमंदिरे ॥ तस्यपुण्यफलंवक्तुंनाहंशक्नो-

१ कस्तूरिकां । २ जुई । ३ मोगरी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिभूपते ॥ ३१ ॥ सुच्छायमंडपंयस्तुसैकताकीर्णमंजसा ॥ सप्रपंकारयेद्यस्तु सतुलोकाधिपोभवेत् ॥ ३२ ॥ मार्गोद्यानंतडागंवाकूपंमंडपमेववा ॥ यःकरोतिसधर्मात्मातस्यपुत्रैस्तुकिंफलं ॥ ३३ ॥ कूपस्तडागउद्यानंमंडपंचप्रपातथा ॥ सद्ग्रंथकरणंपुत्रःसंतानंसप्तधोच्यते ॥ ३४ ॥ एतेष्वन्यतमाभावेनोर्ध्वंगच्छंतिमानवाः ॥ सच्छास्त्रश्रवणंतीर्थयात्रासज्जनसंगतिः ॥ ३५ ॥ जलदानंचान्नदानमश्वत्थारोपणंतथा ॥ पुत्रश्चेतिचसंतानंसप्तधेतिविदोविदुः ॥ ३६ ॥ नासंततिर्लभेल्लोकान्कृत्वाधर्मशतान्यपि ॥ तस्मात्संतानमन्विच्छेत्संतानेष्वेकतोव्रजेत् ॥ ३७ ॥ पशूनांपाक्षिणांचैवमृगाणांचैवभूरुहां ॥ नोर्ध्वलोकंसुखंयातिमनुष्याणांतुकाकथा ॥ ३८ ॥ पूगीफलसमायुक्तंनागवल्लीदलैर्युतं ॥ कर्पू-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रैलादिसंयुक्तंदद्यात्तांबूलमुत्तमं ॥३९॥ शारीरैःसकलैःपापैर्मुच्यतेनात्रसंशयः ॥
तांबूलदोयशोधैर्यंश्रियमाप्नोतिनिश्चितं ॥ रोगीदत्वाविरोगःस्यादरोगीमो-
क्षमाप्नुयात् ॥ ४० ॥ वैशाखेमासियोदद्यात्तक्रंतापविनाशनं ॥ विद्यावान्
धनवान्भूमौजायतेनात्रसंशयः ॥ ४१ ॥ नतक्रसदृशंदानंघर्मकालेषुविद्यते ॥
तस्मात्तक्रंप्रदातव्यमध्वश्रांतद्विजातये ॥ ४२ ॥ जंबीरसुरसोपेतंलसल्लवण-
मिश्रितं ॥ यस्तक्रमरुचिघ्नंतुदत्वामोक्षमवाप्नुयात् ॥ ४३ ॥ योदद्याद्दधिखं-
डंतुवैशाखेघर्मशांतये ॥ तस्यपुण्यफलंवक्तुंनाहंशक्नोमिभूमिप ॥ ४४ ॥ यो
दद्यात्तंडुलान्दिव्यान्मधुसूदनवल्लभे ॥ सलभेत्पूर्णमायुष्यंसर्वयज्ञफलंलभेत्
॥ ४५ ॥ योघृतंतेजसोरूपंगव्यंदद्याद्विजातये ॥ सोऽश्वमेधफलंप्राप्यमोदते

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णुमंदिरे ॥ ४६ ॥ उर्वारुगुडसंमिश्रंवैशाखेमेषगेरवौ ॥ सर्वपापविनिर्मु-
क्तःश्वेतद्वीपेवसेध्द्रुवं ॥ ४७ ॥ यश्चेक्षुदंडंसायाह्नेदिवातापोपशांतये ॥ ब्रा-
ह्मणायचयोदद्यात्तस्यपुण्यमनंतकं ॥ ४८ ॥ वैशाखेपानकंदत्वासायाह्नेश्रम-
शांतये ॥ सर्वपापविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् ॥ ४९ ॥ सफलंपानकं
मेषमासेसायंद्विजातये ॥ दद्यात्तेनपितॄणांतुसुधापानंनसंशयः ॥ ५० ॥ वै-
शाखेपानकंचूतसुपक्वफलसंयुतं ॥ तस्यसर्वाणिपापानिविनाशंयांतिनिश्चि-
तं ॥ ५१ ॥ योदद्याच्चैत्रदर्शेतुकुंभंपूर्णंतुपानकैः ॥ गयाश्राद्धशतंतेनकृत-
मेवनसंशयः ॥ ५२ ॥ कस्तूरीकर्पूरोपेतंमल्लिकोशीरसंयुतं ॥ कलशंपानकैः
पूर्णंचैत्रदर्शेतुमानवः ॥ दद्यात्पितॄन्समुद्दिश्यसषण्णवतिदोभवेत् ॥ ५३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेदानमहिमनिरूपणंना-
मतृतीयोऽध्यायः ॥ ३ ॥ ॥ नारदउवाच ॥ ॥ तैलाभ्यंगंदिवास्वापंतथा
वैकांस्यभोजनं ॥ खट्वानिद्रांगृहेस्नानंनिषिद्धस्यचभक्षणं ॥ वैशाखेवर्जयेदष्टौ
द्विर्भुक्तंनक्तभोजनं ॥ १ ॥ ब्रह्मपत्रे[1]तुयोभुंक्तेवैशाखेव्रतमास्थितः ॥ सतुपाप-
विनिर्मुक्तोविष्णुलोकंचगच्छति ॥ २ ॥ वैशाखेमासिमध्याह्नेश्रांतानांतुद्विजन्म-
नां ॥ पादावनेजनं[2]कुर्यात्तद्ददंतिव्रतोत्तमं ॥ ३ ॥ अध्वश्रांतंद्विजंयस्तुमध्याह्ने
स्वगृहागतं ॥ उपवेश्यासनेरम्येकृत्वापादावनेजनं ॥ ४ ॥ धृत्वाशिरसिता-
श्चापोविध्वस्ताखिलबंधनः ॥ गंगादिसर्वतीर्थेषुस्नातोभवतिनिश्चितं ॥ ५ ॥

१ पलाशपत्रे । २ पादप्रक्षालनं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्नायीचाप्यव्रतीचवैशाखंतुनयेद्यदि ॥ रासभींयोनिमासाद्यपश्चादश्वतरी[1] भवेत् ॥ ६ ॥ दृढांगोरोगहीनश्चतथास्वस्थोऽपिमानवः ॥ वैशाखेतुगृहेस्नात्वाचांडालींयोनिमाप्नुयात् ॥ ७ ॥ वैशाखेमासिराजेंद्रमेषसंस्थेदिवाकरे ॥ नकरोतिबहिःस्नानंश्वानयोनिशतंव्रजेत् ॥ ८ ॥ अस्नात्वाचाप्यदत्वाचवैशाखोयेननीयते ॥ सपिशाचोभवेन्नूनमवैशाखादधोव्रजेत् ॥ ९ ॥ योनदद्याज्जलंचान्नंवैशाखेलोभमोहितः ॥ पापहानिंदुःखहानिंनैवाप्नोतिनसंशयः ॥ १० ॥ नदीस्नानंतुयःकुर्याद्वैशाखेविष्णुतत्परः ॥ जन्मत्रयार्जितात्पापान्मुच्यतेनात्रसंशयः ॥ ११ ॥ समुद्रगानदीस्नानंकुर्यात्प्रातर्भगोदये[2] ॥ सप्तज-

१ ' खेचरी ' इति भाषायां । २ भगः सूर्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्मार्जितैःपापैस्तत्क्षणादेवमुच्यते ॥ १२ ॥ कुर्यादुषसियःस्नानंसप्तगंगा-सुमानवः ॥ कोटिजन्मार्जितात्पापान्मुच्यतेनात्रसंशयः ॥ १३ ॥ जाह्नवीवृ-द्धगंगाचकालिंदीचसरस्वती ॥ कावेरीनर्मदावेणीसप्तगंगाःप्रकीर्तिताः ॥१४॥ देवखातेषुयःकुर्यात्प्रातर्वैशाखमज्जनं[2] ॥ जन्मारभ्यकृतात्पापान्मुच्यतेनात्रसं-शयः ॥ १५ ॥ वैशाखेमासिसंप्राप्तेयोवापीष्ववगाहनं ॥ प्रातःकरोतिहंत्येष महापातकसंचयं ॥ १६ ॥ अपिगोष्पदमात्रेषुबहिःस्थेषुजलेषुच ॥ तिष्ठंति सरितःसर्वागंगाद्याइतिनिश्चयः ॥ १७ ॥ इतिजानन्समाप्नोतिसर्वतीर्थाधि-कंफलं ॥ १८ ॥ क्षीरंरसाधिकंक्षीरादधिकंदधिभूमिप ॥ दध्नोऽधिकंघृतंयद्व-

१ स्वयमुत्पन्नेषु तडागादिषु । २स्नानं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दूर्जोमासाधिकस्तथा ॥ १९ ॥ कार्तिकादधिकोमाघोमाघाद्वैशाखउत्तमः ॥
तस्मिन्मासेकृतोधर्मोवर्धतेवटबीजवत् ॥ २० ॥ आढ्योवापिदरिद्रोवापरतं-
त्रोऽथवानरः ॥ यद्वस्तुलभ्यतेयेनतद्दातव्यंद्विजातये ॥ २१ ॥ कंदमूलफलं
शाकंलवणंगुडमेवच ॥ काष्ठंपत्रंजलंतक्रमानंत्यायोपकल्पते॥नादत्तंलभ्यतेक्का-
पिब्रह्माद्यैस्त्रिदशैरपि ॥ २२ ॥ दानेनहीनस्तुभवेदाकिंचनोनिष्किंचनत्वाच्च
करोतिपापं ॥ पापादवश्यंनरकंप्रयातिदातव्यमस्मात्सुखमिच्छतासदा ॥
२३ ॥ यथागृहंसर्वगुणोपपन्नंपरिच्छदैर्हीनमशोभनंतथा ॥ मासेषुधर्मःसक-
लेष्वनुष्ठितोवैशाखहीनस्तुवृथैवयाति ॥ २४ ॥ यथैवकन्यासकलैश्वलक्षणै-
र्युक्तापिजीवत्पतिलक्षणान ॥ क्रियापिसांगासकलापिराजन्वैशाखहीनातुवृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थैवतांविदुः ॥ २५ ॥ दयाविहीनास्तुयथागुणावृथावैशाखधर्मेणविनातथा क्रियाः ॥ २६ ॥ शाकंतुयद्वल्लवणेनहीनंनरोचतेसर्वगुणोपपन्नं ॥ वैशाखहीनं तुतथैवपुण्यंनसाधुसेव्यंनफलाप्तिहेतुः ॥ २७ ॥ यथाललामाशुभमेवभासते वस्त्रेणहीनंललनासुराजन् ॥ क्रियाकलापःसुकृतोऽपिपुंभिर्नशोभतेतन्मधुमास-हीनः ॥ २८ ॥ तस्मात्सर्वप्रयत्नेनयेनकेनापिजंतुना ॥ धर्मावैशाखमासस्य कर्तव्याइतिनिश्चयः ॥ २९ ॥ मधुसूदनमुद्दिश्यमेषसंस्थेदिवाकरे ॥ प्रातः स्नात्वायजेद्विष्णुमन्यथानरकंव्रजेत् ॥ ३० ॥ वैशाखःसकलोमासोमधुसूदन-दैवतः ॥ तीर्थयात्रातपोयज्ञदानहोमफलाधिकः ॥ ३१ ॥ ॥ प्रार्थनामंत्रः ॥ ॥मधुसूदनदेवत्येवैशाखेमेषगेरवौ ॥ प्रातःस्नानंकरिष्यामिनिर्विघ्नंकुरुमाधव॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३२ ॥ ॥ अर्घ्यमंत्राः ॥ ॥ वैशाखेमेषगेभानौप्रातःस्नानपरायणः ॥ अर्घ्यंतेऽहंप्रदास्यामिगृहाणमधुसूदन ॥ ३३ ॥ गंगाद्याःसरितःसर्वास्तीर्थानिचतथान्हदाः ॥ प्रतिगृह्यमयादत्तमर्घ्यंसम्यक्प्रसीदत ॥ ३४ ॥ ब्रह्माद्यादेवताःसर्वाऋषयोयेचवैष्णवाः ॥ गृह्णंत्वर्घ्यंमयादत्तंयथोक्तफलदामम ॥ ३५ ॥ ऋषभःपापिनांशास्तात्वंयमःसमदर्शनः ॥ गृहाणार्घ्यंमयादत्तंयथोक्तफलदोभव ॥ ३६ ॥ इतिचार्घ्यंसमर्प्याथपश्चात्स्नानंसमाचरेत् ॥ वाससीपरिधायाथकृत्वाकर्माणिसर्वशः ॥ ३७ ॥ मधुसूदनमभ्यर्च्यप्रसूनैर्माधवोद्भवैः ॥ श्रुत्वाविष्णुकथांदिव्यामेतन्मासप्रशंसिनीं ॥ ३८ ॥ कोटिजन्मार्जितात्पापान्मुक्तो

१ श्रेष्ठः। २ पुष्पैः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोक्षमवाप्नुयात् ॥ नजातुखिद्यतेभूमौनस्वर्गेनरसातले ॥ ३९ ॥ नगर्भेजा-
यतेक्वापिनभूयःस्तनपोभवत् ॥ वैशाखेकांस्यभोजीयस्तथाचाश्रुतसत्कथः ॥
४० ॥ नस्नातोनापिदाताचनरकानेवगच्छति ॥ ब्रह्महत्यासहस्रस्यपापंशा-
म्येत्कथंचन ॥ ४१ ॥ वैशाखेयेननस्नातंतत्पापंनैवगच्छति ॥ स्वाधीनेनच
कायेनह्यप्सुस्वातंत्र्यवृत्तिषु ॥ ४२ ॥ स्वाधीनजिह्वयोच्चार्यंहरिरित्यक्षरद्वयं ॥
नकुर्याद्यदिवैशाखेप्रातःस्नानंनराधमः ॥ ४३ ॥ जीवन्नेवसपंचत्वमागतोनात्र
संशयः ॥ येनकेनापिपुष्पेणमाधवेमधुसूदनं ॥ ४४ ॥ नार्चयेद्यदिमूढात्मासौ-
करींयोनिमाप्नुयात् ॥ योऽर्चयेत्तुलसीपत्रैर्वैशाखेमधुसूदनं ॥ ४५ ॥ नृपोभू-

१ कदापि । २ मुक्तोभवेदित्यर्थः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वासार्वभौमःकोटिजन्मसुभोगवान् ॥ पश्चात्कोटिकुलैर्युक्तोविष्णुसायुज्यमा-
प्नुयात् ॥ ४६ ॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादे
वैशाखधर्मप्रशंसनंनामचतुर्थोऽध्यायः ॥ ४ ॥ ॥ नारदउवाच ॥ ॥ वैशा-
खःसर्वधर्मेभ्यस्तपोधर्मेभ्यएवच ॥ कथंससर्वमासेभ्योदानेभ्योऽप्यधिकोऽभ-
वत् ॥ १ ॥ तद्वक्ष्यामिमहाराजशृणुचैकमनाभव ॥ कल्पांतेदेवराड्विष्णुःशे-
षशायीमहाप्रभुः ॥ २ ॥ कुक्षिस्थलोकसंघोऽयंसशेतेप्रलयार्णवे ॥ अनेकोह्ये-
कतांप्राप्यभूतिभिर्योगमायया ॥ ३ ॥ निमेषस्यावसानेतुश्रुतिभिर्बोधितस्त-
तः ॥ स्वकुक्षिस्थान्जीवसंघानीक्षांचक्रेदयानिधिः ॥ ४ ॥ तत्तत्कर्मफलावा-
प्त्यैसृज्यान्स्त्रष्टुंमनोदधे ॥ तस्यनाभेरभूत्पद्मंसौवर्णंभुवनाश्रयं ॥ ५ ॥ ब्र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्माणंजनयामासवैराजंपुरुषाह्वयम् ॥ तस्मिन्ससर्जभगवान्भुवनानिचतुर्दश॥
६ ॥ भिन्नकर्माश्रयप्राणिसंघांश्चविविधान्वहून् ॥ त्रिगुणांप्रकृतिंलोकेमर्यादा-
श्चाधिपांस्तथा ॥ ७ ॥ वर्णाश्रमविभागांश्चधर्मंकृप्तिंचसोऽकरोत् ॥ वेदैश्चतु-
र्भिस्तंत्रैश्चसंहितास्मृतिभिस्तथा ॥ ८ ॥ पुराणैरितिहासैश्चस्वाज्ञारूपैर्महे-
श्वरः ॥ ऋषीन्प्रवर्तकांश्चक्रेधर्मगुप्त्यैमहाप्रभुः ॥ ९ ॥ तैःप्रवर्तितधर्मांस्तुवर्णा-
श्रमविभागशः ॥ प्रजाःश्रद्दधिरेसर्वाःस्वोचितान्विष्णुतोषदान् ॥ १० ॥ तां-
स्तुप्रवर्तमानांस्तुस्वाश्रयान्द्रष्टुमीश्वरः ॥ हृदिस्थोऽप्यव्ययःसाक्षाद्विभीषार्थं
परीक्षया ॥ ११ ॥ अनूनान्कुशलान्यत्रधर्मान्कुर्वंतिवैप्रजाः ॥ सकालःकोभ-
वेद्विद्विन्नितितंचिंतयन्प्रभुः ॥ १२ ॥ वर्षाकालोमयासृष्टःसीदंत्यस्ताइमाःप्रजाः

For Private and Personal Use Only

॥ तत्रानूनान्नकुर्वंतिधर्मान्पंकाद्युपद्रुताः ॥ १३ ॥ तान्दृष्ट्वाकापएवस्यात्तेषु तुष्टिर्नमेभवेत् ॥ मयोक्षितानसीदंतुतस्मात्तान्नविलोकये ॥ १४ ॥ शरद्यापत- थापूर्तिःकर्मणांनैवजायते ॥ केचित्पक्कफलासक्ताःकेचिद्वृष्टिभिरर्दिताः ॥ १५ ॥ केचिच्छीतार्दिताराजंस्तान्दृष्ट्वारोषएवमे ॥ वैगुण्यंपश्यमानस्यनमेतोषोऽभि- जायते ॥ १६ ॥ उत्थापनंतुनेच्छंतिप्रातर्हेमंतआगते ॥ कोपोमेऽनुत्थितान् दृष्ट्वाप्रातःसूर्योदयेसति ॥ १७ ॥ शिशिरेऽपितथैवार्ताःप्रातःकालइमाःप्रजाः ॥ तथापक्कफलादौतुसक्ताह्यनिशमंजसा ॥ १८ ॥ उत्थापनंतुनेच्छंतिपुनःशी- तार्दितास्तुताः ॥ तेषांतुकर्मलोपःस्यान्नैवपूर्तिःकथंचन ॥ १९ ॥ प्रेक्षायाः समयोनायमितिचिंताकुलोविभुः ॥ वसंतसमयंमेनेसर्वसंपद्विधायकं ॥ २० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नानेदानेतथायागेक्रियायांभोगएवच ॥ नानाधर्मविधानेचह्यनुकूलोह्यसावृ-
तुः ॥ २१ ॥ अप्रयासेनलभ्यानिद्रव्याण्यसुंभृतांध्रुवं ॥ येनकेनचद्रव्येणतु-
ष्टिस्तनुभृतांभवेत् ॥ २२ ॥ विष्णोराधारभूतानांतद्द्रव्यंधर्मसाधनं ॥ वसंते
सकलंद्रव्यंप्राणिनांतुसुखावहं ॥ २३ ॥ दानयोग्यंकर्मयोग्यंभोगयोग्यंचसर्वशः
॥ निर्धनानांतुपंग्वादिविकलानांमहात्मनां ॥ २४ ॥ द्रव्याणिचसुलभ्यानि
जलादीनिनसंशयः ॥ द्रव्यैरेतैरात्महितंधर्मंकुर्वंतिमत्प्रियाः ॥ २५ ॥ पत्रैः
पुष्पैःफलैर्मूलैःशाकैश्चापिप्रियोक्तिभिः ॥ स्रक्तांबूलैश्चंदनाद्यैःपादप्रक्षालना-
दिभिः ॥ २६ ॥ प्रश्रयाद्यैरहंतेषांवरदोऽहमितीरयन् ॥ संचिंत्यभगवान्वि-

१ प्राणिनां । २ स्रजः पुष्पमालाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्णुःप्रतस्थेरमयासह ॥ २७ ॥ वनानिसर्वतःपश्यन्विकसत्कुसुमानिच ॥ हृष्टपुष्टजनाकीर्णंमत्तालिद्विजसेवितं ॥ २८ ॥ आश्रमाणांगृहाणांचवनग्रामानिवासिनां ॥ प्रांगणादीनिरम्याणिह्युद्यानादिस्थलानिच ॥ २९ ॥ रमायैदर्शयन्विष्णुःसहदेवैर्मुनीश्वरैः ॥ सिद्धचारणगंधर्वकिन्नरोरगराक्षसैः ॥ ३० ॥ स्तूयमानोऽभ्यगाद्गेहान्वर्णाश्रमनिवासिनां ॥ मीनादिकर्कटांतंवैसतिष्ठन्रमयासुरैः ॥ ३१ ॥ सार्धंप्रतीक्ष्यपुरुषान्कृताकृतसपर्यकान् ॥ तत्रधर्मवतांपुंसां ददातीष्टान्मनोरथान् ॥ ३२ ॥ मत्तान्नसहतेपुंसोहरत्यायुर्धनादिकं ॥ यदि कुर्वंतिवैशाखेसपर्यांपरमात्मनः ॥ ३३ ॥ तत्रापिचलमूर्तीनांसाधूनांयत्रवै

१ प्रचचाल । २ द्विजाः पक्षिणः कोकिलादयः । ३ सपर्या पूजा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभुः ॥ मासेष्वन्येषुयज्जातंकर्मलोपंसहिष्यते ॥ ३४ ॥ यथादेशागतंभूपं दृष्ट्वाजानपदाःप्रजाः ॥ यदितंचोपातिष्ठंतिप्रश्रयाद्यैर्महार्हणैः ॥ ३५ ॥ तदा करादिकंन्यूनंपूर्णंजानातिपार्थिवः ॥ पुनरप्यधिकंचेष्टंतुष्टोदास्यतिनिश्चितं ॥ ३६ ॥ तदात्वकृतपूजानांदंडंतेषांकरोतिच ॥ तथाविष्णुःस्वकीयानांवैशाखे माधवागमे ॥ ३७ ॥ सपर्यांकुर्वतांपुंसांददातीष्टान्मनोरथान् ॥ अकुर्वतांत-थापुंसांधनादीनिहरत्यलं ॥ ३८ ॥ धर्मगोप्तुर्महाविष्णोर्देवदेवस्यशार्ङ्गिणः ॥ परीक्षाकालएवायंतस्मान्मासोत्तमोह्ययं ॥ ३९ ॥ ॥ इतिश्रीस्कंदपुराणेवै-शाखमाहात्म्येनारदांबरीषसंवादेवैशाखश्रेष्ठत्वनिरूपणंनामपंचमोऽध्यायः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५ ॥ ॥ नारदउवाच ॥ ॥ वैशाखेऽध्वश्रमार्तानांतृषार्तानांमहीपते ॥ ज-
लदानमकुर्वाणस्तिर्यग्योनिमवाप्नुयात् ॥ १ ॥ अत्रैवोदाहरंतीममितिहासंपु-
रातनं ॥ विप्रस्यगृहगो²धायाः संवादंपरमाद्भुतं ॥ २ ॥ पुराचेक्ष्वाकुवंशेऽभू-
द्धेमांगइतिभूमिपः ॥ ब्रह्मण्यश्चवदा³न्यश्चजितामित्रोजितेंद्रियः ॥ ३ ॥ या-
वत्योभूमिकणि⁴कायावंतोजलबिंदवः ॥ यावंत्युडू⁵निगगनेतावतीर्गाददात्यसौ॥
४॥ येनेष्टंयज्ञदर्भैश्चभूमिर्बर्हिष्मतीश्रुता॥ गोभूतिलहिरण्याद्यैस्तोषितावहवो
द्विजाः॥५॥ तेनादत्तानिदानानिनविद्यंतइतिश्रुतं ॥ तेनादत्तंजलंचैकंसुखल-
भ्यधियानृप ॥ ६ ॥ बोधितोब्रह्मपुत्रेणवसिष्ठेनमहात्मना ॥ अमूल्यंसर्वतो-

१ मार्गश्रांतानां । २ पल्लयाः । ३ दानशूरः । ४ रजांसि । ५ नक्षत्राणि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लभ्यंतद्दातुःकिंफलंभवेत् ॥ ७ ॥ दुर्बुद्धिर्हेतुवादैश्चनजलंदत्तवान्विभुः ॥ अ-
लभ्यदानेपुण्यंस्यादितिवाक्यंसुयुक्तिमत् ॥ ८ ॥ सआनर्चद्विजान्व्यंगान्द-
रिद्रान्वृत्तिकर्शितान् ॥ नार्चयच्छ्रोत्रियान्विप्रांस्तत्वज्ञान्ब्रह्मवादिनः ॥ ९ ॥
प्रख्यातान्पूजयिष्यंतिसर्वलोकाःसमर्हणैः ॥ अनाथानामविद्यानांव्यंगानांच
कुटुंबिनां ॥ १० ॥ दरिद्राणांगतिःकावातस्मात्तेमेदयास्पदाः ॥ इतिदुर्धीर्नपा-
त्रेषुदत्तवान्किमपिस्वयं ॥ ११ ॥ तेनदोषेणमहताचातकत्वंत्रिजन्मसु ॥ ए-
कजन्मनिगृध्रत्वंश्वाऽभवत्सप्तजन्मसु ॥ १२ ॥ पश्चान्नृपगृहेजातोभूपोऽयंगृह-
गोधिका ॥ श्रुतकीर्त्याख्यभूपस्यामिथिलाधिपतेर्नृप ॥ १३ ॥ गृहद्वारेप्रतो-

१ पूजयामास । २ क्षीणजीविकान् । २ वीथ्यां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ल्यांचवर्ततेकीटकाशना ॥ अष्टाशीतिषुवर्षेषुस्थितंतेनदुरात्मना ॥ १४ ॥ विदेहाधिपतेर्गेहेकदाचिद्दषिसत्तमः ॥ श्रुतदेवइतिख्यातोश्रांतोमध्याह्नआगतः॥ १५॥ तंदृष्ट्वासहसोत्थायजातहर्षोनराधिपः॥मधुपर्कादिभिःपूज्यतस्यपादावने-जनीः ॥१६॥ अपोमूर्ध्नाऽवहत्क्षिप्रंतदोत्सिक्तैश्चबिंदुभिः ॥ देवोपदिष्टकाले-नप्रोक्षितागृहगोधिका॥ १७॥ सद्योजातिस्मृतिरभूत्स्मृतकर्मातिदुःखिता ॥ त्राहित्राहीतिचुक्रोशब्राह्मणंगृहमागतं ॥ १८ ॥ तिर्यग्जंतुरवंश्रुत्वाब्राह्मणोवि-स्मितोऽवदत् ॥ कुतःक्रोशसिगोधेत्वंदशेयंकेनकर्मणा ॥ १९ ॥ त्वंदेवपुरुषः कश्चिन्नृपोवाथद्विजोऽथवा ॥ कस्त्वंब्रूहिमहाभागत्वामद्याहंसमुद्धरे ॥ २० ॥

१ पादक्षालनसंबंधिनीः। २ तत्क्षणं।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्तःसनृपःप्राहश्रुतदेवंमहामुनिं ॥ वयमिक्ष्वाकवोभूमन्शस्त्रविद्याविशारदाः ॥ २१ ॥ यावत्योभूमिकणिकायावंतस्तोयबिंदवः ॥ यावंत्युडूनिगगने तावतीर्गाददाम्यहं ॥ २२ ॥ सर्वैर्यज्ञैर्मयाचेष्टंपूर्तान्याचरितानिमे ॥ दानान्यपिचदत्तानिधर्मजातंस्वनुष्ठितं ॥ २३ ॥ तथापिदुर्गतिर्जातामममनोर्ध्वगतिर्विभो ॥ त्रिवारंचातकत्वंमेगृध्रत्वंचैकजन्मानि ॥ २४ ॥ सप्तजन्मसुचश्वत्वंप्राप्तं पूर्वंमयाद्विज ॥ सिंचताऽनेनभूपेनत्वपःपादावनेजनीः ॥ २५ ॥ बिंदवोदूरमुत्क्षिप्तास्तैःसिक्तोऽहंकथंचन ॥ तेनजन्मस्मृतिरभूत्सर्वपाप्माहतश्चमे ॥२६॥ गोधाजन्मानिभाव्यानिह्यष्टाविंशतिमोद्विज ॥ दृश्यंतेदैवदिष्टानिबिभ्येतैर्जन्मभिर्भृशं ॥ २७ ॥ नकारणंप्रपश्यामितन्मेविस्तरतोवद ॥ इत्युक्तःसद्विजःप्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हज्ञात्वाविज्ञानचक्षुषा ॥ २८ ॥ शृणुभूपप्रवक्ष्यामितवदुर्योनिकारणं ॥ नज-
लंतुत्वयादत्तंवैशाखमाधवप्रिये ॥ २९ ॥ तज्जलंसुलभंमत्वाह्यमूल्यमितिनि-
श्चितं ॥ नाध्वगानांद्विजातीनांघर्मकालेऽप्यजानता ॥ ३० ॥ तथापात्रंस-
मुत्सृज्यह्यपात्रेप्रतिदत्तवान् ॥ ज्वलंतमाग्निमुत्सृज्यनाहिभस्मनिहूयते ॥ ३१ ॥
कंटकान्वितवृक्षस्यनकुर्वंतिसमर्चनं ॥ जनास्तथापिसेवायैशस्ताःशास्त्रेषुभू-
मिप ॥ ३२ ॥ विशिष्टत्वात्पादपानामश्वत्थःसेव्यतांगतः ॥ तुलसींतुसमुत्सृ-
ज्यबृहतीपूज्यतेनुकिं ॥ ३३ ॥ अनाथत्वंपूज्यतायांनप्रयोजकतामियात् ॥
पंग्वाद्यायेत्वनाथाश्चदयापात्रंहिकेवलं ॥ ३४ ॥ तपोनिष्ठाज्ञाननिष्ठाःश्रुति-
शास्त्रविशारदाः ॥ विष्णुरूपाःसदापूज्यानेतरेतुकदाचन ॥ ३५ ॥ तत्रापिज्ञा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निनोऽत्यर्थंप्रियाविष्णोःसदैवहि ॥ ज्ञानिनामपिभूपालविष्णुरेवसदाप्रियः ॥
३६ ॥ तस्माद्ज्ञानीसदापूज्यःपूज्यात्पूज्यतरःस्मृतः ॥ अवज्ञासाधुवृत्ताना-
मिहामुत्रचदुःखदा ॥ ३७ ॥ सेवावैमहतांपुंसांपुमर्थानांहिकारणं ॥ कोटयोऽ-
प्यंधजातीनांनपश्यंतियथापथं ॥ ३८ ॥ एवंमंदायुतानांतुसंगतिर्नार्थदाभ-
वेत् ॥ यान्यम्मंयानितीर्थानियेदेवामृच्छिलामयाः ॥ ३९ ॥ तेपुनंत्युरुकाले-
नदर्शनादेवसाधवः ॥ नसाधुसेवयाक्कापिसीदंतेवैसुशिक्षिताः ॥ ४० ॥ ज-
न्ममृयुजराद्यैर्वासुधयाप्यायितायथा ॥ नजलंतुत्वयादत्तंसाधवोवानसेविताः॥
४१ ॥ तेनतेदुर्गतिश्चेयंप्राप्ताचेक्ष्वाकुनंदन ॥ वैशाखेमत्कृतंपुण्यंतुभ्यंदास्या-

१ जलमयानि । २ बहुकालेन । ३ सिद्यंते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिशांतये ॥ ४२ ॥ भूतंभव्यंभवद्येनकर्मजातंविजेष्यसि ॥ इत्युक्त्वाऽपउप-
स्पृश्यददौपुण्यमनुत्तमं ॥ ४३ ॥ यदादत्तंब्राह्मणेनस्नानंचैकदिनेकृतं ॥ तेन
ध्वस्ताखिलाघस्तुत्यक्त्वासागृहगोधिका ॥ ४४ ॥ रूपंकर्मोचितंघोरंसद्योऽदृ-
श्यतपूरुषः ॥ दिव्यंविमानमारुह्यदिव्यस्त्रग्वस्त्रभूषणः ॥ ४५ ॥ पश्यतामेव
भूतानांमैथिलस्यगृहांतरे ॥ बद्धांजलिपुटोभूत्वापरिक्रम्यप्रणम्यच ॥ ४६ ॥
अनुज्ञातोययौराजास्तूयमानोऽमरैर्दिवं ॥ दिव्यरूपोमहातेजाअप्सरोगणसे-
वितः ॥ ४७ ॥ तत्रभुक्त्वामहाभोगान्वर्षायुतमतंद्रितः ॥ सएवचेक्ष्वाकुकुले
काकुत्स्थोऽभून्महारथः ॥ ४८ ॥ सप्तद्वीपवतीपालोब्रह्मण्यःसाधुसंमतः ॥

१ भावि । २ आचम्य । ३ सार्वभौमः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवेंद्रस्यसखाविष्णोरंशएवमहाप्रभुः ॥ ४९ ॥ बोधितस्तुवसिष्ठेनवैशाखोक्ता-
न्मनोरमान् ॥ अनुष्ठायाखिलान्धर्मांस्तेनध्वस्ताखिलाशुभः ॥ ५० ॥ दिव्य-
ज्ञानंसमासाद्यविष्णोःसायुज्यमाप्तवान् ॥ वैशाखःशुभदस्तस्मात्पुंभिःसर्वैर-
नुष्ठितः ॥ ५१ ॥ आयुर्यशःपुष्टिदोऽयंमहापापौघनाशनः ॥ पुमर्थानांनिदानं
चविष्णुःप्रीणात्यनेनतु ॥ ५२ ॥ चतुर्वर्णैर्नरैःसर्वैश्चतुराश्रमवर्तिभिः ॥ अनु-
ष्ठेयोमहाधर्मोवैशाखेमाधवागमे ॥ ५३ ॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमा-
हात्म्येनारदांबरीषसंवादेगृहगोधिकाख्यानंनामषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥
॥ नारदउवाच ॥ ॥ राजातदद्भुतंदृष्ट्वामैथिलोधर्मवित्तमः ॥ कृतांजलिःसु-
खासीनंविस्मितोवाक्यमब्रवीत् ॥ १ ॥ ॥ मैथिलउवाच ॥ ॥ दृष्टमेतन्म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हाश्चर्यंसाधूनांचरितंतथा ॥ येनधर्मेणमुक्तोऽभूद्राजाचेक्ष्वाकुनंदनः ॥ २ ॥ त-
धर्मंविस्तरेणैवश्रोतुंकौतूहलंहिमे ॥ मह्यंश्रद्धावतेविद्वन्कृपयाविस्तराद्वद ॥३॥
इतिराज्ञासुसंपृष्टःश्रुतदेवोमहामनाः ॥ साधुसाध्वितिसंभाष्यव्याजहारनपो-
त्तमं ॥ ४ ॥ श्रुतदेवउवाच ॥ ॥ सम्यग्व्यवसिताबुद्धिस्तवराजर्षिसत्तम ॥
वासुदेवप्रियान्धर्मान्श्रोतुंयस्मान्मतिस्तव ॥ ५ ॥ बहुजन्मार्जितंपुण्यंविना
कस्यापिदेहिनः ॥ वासुदेवकथालापेमतिर्नैवोपजायते ॥ ६ ॥ येनराजाधि-
राजस्यजातेयंमतिरीदृशी ॥ शुद्धंभागवतंमन्येतेनत्वांसाधुसत्तमं ॥ ७ ॥ त-
स्मात्तुभ्यंब्रुवेसौम्यधर्मान्भागवतान्शुभान् ॥ यान्ज्ञात्वामुच्यतेजंतुर्जन्मसंसा-
रबंधनात् ॥ ८ ॥ यथाशौचंयथास्नानंयथासंध्याचतर्पणं ॥ अग्निहोत्रंयथा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्राद्धंतथावैशाखसत्क्रियाः ॥ ९ ॥ वैशाखेमाधवेधर्मानकृत्वानोर्ध्वगोभवेत् ॥
नवैशाखसमोधर्मोधर्मजातेषुविद्यते ॥ १० ॥ संतोऽपिबहवोधर्माःप्रजारंजन-
काइव ॥ उपद्रवैश्चलुप्यंतेनात्रकार्याविचारणा ॥ ११ ॥ सुलभाःसकलाधर्माः
कर्तुंवैशाखचोदिताः॥ उदकुंभंप्रपादानंपथिच्छायासुनिर्मितं ॥ १२ ॥ उपान-
त्पादुकादानंछत्रव्यजनयोस्तथा ॥ तिलयुक्तमधोदानंगोरसानांश्रमापहं ॥
१३ ॥ वापीकूपतडागादिकरणंपथिकाश्रमं ॥ नारीकेलेक्षुकर्पूरकस्तूरीदानमे-
वच ॥ १४ ॥ गंधानुलेपनंशय्याखट्वादानंचभूपते ॥ तथाचूतफलंरम्यमुर्वारु-
करसायनं ॥ १५ ॥ दानंदमनपुष्पाणांतथासायंगुडोदकं ॥ चित्राण्यन्नानिपू-

१ कर्कटीभेदः । २ दवणा इतिभाषायां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णीयांदध्यन्नंप्रत्यहंतथा ॥ १६ ॥ तांबूलस्यसदादानंचैत्रदर्शेकरीरकं ॥ खा-
वनुदितेपूर्वंप्रातःस्नानंदिनेदिने ॥ १७ ॥ मधुसूदनपूजाचकथायाःश्रवणंतथा॥
अभ्यंगवर्जनंचैवतथावैपत्रभोजनं ॥ १८ ॥ मध्येमध्येश्रमार्तानांवीजनंव्यज-
नेनच ॥ सुगंधैःकोमलैःपुष्पैःप्रत्यहंपूजनंहरेः ॥ १९ ॥ फलंदध्यन्ननैवेद्यंधूप-
दीपौदिनेदिने ॥ गोग्रासंवृषपत्नीनां[1]द्विजपादावनेजनं ॥ २० ॥ गुडनागर[2]-
दानंचधात्रीपिष्टप्रदापनं ॥ पथिकानांप्रश्रयंचदानंतंडुलशाकयोः ॥ एतेध-
र्माःप्रशस्ताहिवैशाखेमाधवप्रिये ॥ २१ ॥ तथाचविष्णोःकुसुमार्पणंहरेःपूजा
चकालोचितपल्लवाद्यैः॥दध्यन्ननैवेद्यनिवेदनंचसमस्तपापौघविनाशहेतुः॥२२॥

१ कलश । २ नागरं शुंठी ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नारीपुष्पैर्माधवंनार्चयेद्याद्विजाख्यातंमंदिरेवागृहेवा ॥ पुत्रंसौख्यंक्वापिनाप्नो-
तिहंतिचायुर्भर्तुःस्वात्मनोवामहात्मन् ॥ २३ ॥ रमासहायेमाधवेमासिवि-
ष्णौपरीक्षायैधर्मसेतोःप्रजानां ॥ गृहंयातेमुनिभिर्दैवतैश्चकाल्यैःपुष्पैर्नार्चये-
द्यस्तुमूढः ॥ २४ ॥ समूढात्मारौरवंप्राप्यपश्चाद्यायाद्योनिंरासभींपंचवारं ॥
जलंचान्नंसर्वदादेयमस्मिन्क्षुधार्तानांप्राणिनांप्राणहेतुः ॥ २५ ॥ तिर्यग्जंतु-
र्जायतेवार्यदानादन्नादानाज्जायतेवैपिशाचः॥ अन्नादानेचानुभूतांकथांतेवक्ष्या-
म्येतामद्भुतांभूमिपाल ॥२६॥ रेवातीरेमत्पिताऽभूत्पिशाचःस्वमांसाशीक्षुत्तृषा-
श्रांतगात्रः ॥ छायाहीनेशाल्मलीवृक्षमूलेह्यन्नाभावान्नष्टचैतन्यएषः ॥ २७ ॥
क्षुधातृषाकर्मणायस्यवह्नीसूक्ष्मंछिद्रंकंठनालस्यचासीत् ॥ मांसंचान्नंकंठमध्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निषण्णंकुर्यात्पीडांप्राणपर्यंतमेव ॥ २८ ॥ जलंदृष्ट्वाकालकूटप्रकल्पंकुल्यावा-
पीसंस्थमप्यंगनूनं ॥ तस्यास्तीरेचागमंदैवयोगाद्गंगायात्राकारणान्मार्गमध्ये॥
२९॥ दृष्ट्वाऽद्भुतंशल्मलीवृक्षमूलेकृत्त्वाकृत्त्वाभक्षयंतंस्वमांसं ॥ क्रोशंतंतंबहुधा
शोचमानंक्षुधातृषाव्यथितंकर्मभिःस्वैः ॥ ३० ॥ समांहंतुंप्राद्रवत्क्रूरकर्मामत्ते-
जसानिहतोदुद्रुवेच ॥ तंचाब्रुवंकृपयाक्लिन्नचित्तोमाभैषीरितिश्लक्ष्णयामेगिरा
च ॥ ३१ ॥ कस्त्वंतातब्रूहिसद्योऽत्रहेतुंकृच्छ्रादस्मान्मोचयेमाविषीद ॥ इत्यु-
क्तोमांप्राहपुत्रंत्वजानन्पुरानतेंभूवराख्येचग्रामे ॥ ३२ ॥ नाम्नामैत्रःसंकृतेगो-
त्रजोऽहंतपोविद्यादानयज्ञादिनिष्ठः ॥ मयाऽधीताध्यापिताःसर्वविद्याःकृतोम-

१ छित्त्वा। २ अधावत्। ३ पलायत। ४ कोमलया। ५ संकटात्। ६ खिन्नो मा भव।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यासर्वतीर्थावगाहः ॥ ३३ ॥ दत्तंनान्नंमासिवैशाखसंज्ञेलोभाद्भिक्षामात्रमप्यं-
गेकाले ॥ शोचाम्यहंप्राप्यपैशाचयोनिंनान्योहेतुःसत्यमेवोक्तमंग ॥ ३४ ॥ पु-
त्रोऽधुनावर्ततेमद्गृहेचभूरिख्यातिःश्रुतदेवेतिसंज्ञः ॥ वाच्यातस्मैमद्दशाचात्म-
जायवैशाखेऽन्नादानतोऽभूत्पिशाचः ॥ ३५ ॥ दृष्टस्तीरेतेपितानर्मदायानोर्ध्वे
गत्वावर्ततेवृक्षमूले ॥ खादन्मांसंस्वीयमेवानुखिद्यन्पितुर्मुक्त्यैमासिवैशाखसं-
ज्ञे ॥ ३६ ॥ प्रातःस्नात्वापूजयित्वाचविष्णुंनिर्व्यांजान्मांतर्पयित्वातिलैश्च ॥
देयंचान्नंद्विजवर्यायमह्यंमुक्तोयोनेर्यामिविष्णोःपदंच ॥ ३७ ॥ इत्थंचोक्तंत्व-
त्पुरस्ताद्वदेतिदयाचैषामत्कृतेनात्रशंका ॥ क्षेमंभूयात्सर्वतोमंगलंतेश्रुत्वाचाहं

१ अंगेत्यामंत्रणे । २ शुद्धभावेन ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाषितंमेपितुश्च ॥ ३८ ॥ दुःखात्कायंदंडवत्पातयित्वाभृशार्तोऽहंपादयोर्भूरि-
कालं ॥ निंदंनिंदंभूरिमांबाष्पनेत्रःपुत्रोऽहंतेतातदैवागतोस्मि ॥ ३९ ॥ क-
र्मभ्रष्टोभूसुराणांविनिंद्योज्ञात्वाधर्मान्सकलान्मासिचास्मिन् ॥ उद्दिश्यत्वांलो-
भतोविप्रवर्येदत्तंनान्नंमासिवैशाखसंज्ञे ॥ ४० ॥ नाभूद्यस्मात्क्लेशमोक्षःपितॄ-
णांसोऽहंपितृघ्नश्चात्महाऽतीवपापी ॥ कर्मभ्रष्टःसत्सभायांविनिंद्यःसर्वैपुत्रः
पुत्रतामेतिकृत्वा॥ ४१॥ काल्यान्धर्मान्पितृहेतोर्महात्मानरकादस्माद्दुरुद्धरेद्यस्य
नाम ॥ पुदित्याहुःपूयशोणादिभाजंश्रुत्वावाचंचात्मजेनांजसोक्तां ॥ ४२ ॥
पुत्रंप्राहप्रीतिहृष्टांतरात्मायात्रांकृत्वाशीघ्रमागत्यगेहं ॥ प्राप्तेमासेमेषसंस्थेच
भानौस्नानंकृत्वाविधिवत्तर्पयित्वा ॥ निवेद्यान्नंविष्णवेमह्यमंगदानंदेहिद्विज-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्येमहात्मन् ॥ ४३ ॥ तस्मान्मुक्तिर्भविता सान्वयस्य तस्माच्छीघ्रं गच्छ गेहं सु-
खेन ॥ पित्रादिष्टः कृतयात्रः स्वगेहं प्राप्याकरवं माधवे चान्नदानं ॥ ४४ ॥ त-
स्मान्मुक्तो मत्पितामांसमेत्य यानारूढो ह्यनंद्याशिषा च ॥ भूयोभूयः कुर्वंति क्ष्मा-
पते मां समादिश्य द्यामगात्पश्यतो मे ॥ ४५ ॥ तस्मान्मासे माधवे चान्नदानं प्र-
पादानं सर्वशास्त्रेषु शस्तं ॥ तुभ्यं प्रोक्तं धर्मसारं सुधर्म्यं किमन्यत्ते श्रोतुमि-
च्छा वदस्व ॥ ४६ ॥ ॥ इतिश्रीस्कंदपुराणे वैशाखमाहात्म्ये नारदांबरीषसं-
वादे पिशाचमोक्षप्राप्तिर्नाम सप्तमोऽध्यायः ॥ ७ ॥ ॥ मैथिल उवाच ॥ ॥ ब्र-
ह्मन्निक्ष्वाकुतनयो जलादानाच्च चातकः ॥ त्रिवारमभवत्पश्चान्मद्गृहे गृहगोधि-
का ॥ १ ॥ कर्मानुगुणमेतद्धि युक्तं तस्याकृतात्मनः ॥ सतामसेवनाद्यस्य गृध्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वंसारमेयता ॥ २ ॥ सप्तवारमितिप्रोक्तंतन्मेभातिचनोचितं ॥ संतोनदूषि-
तास्तेनतथानापकृताअपि ॥ ३ ॥ तस्मादसेवयातस्यफलाभावोभवेद्ध्रुवं ॥
नानर्थःकारणाभावात्पापंहिपरपीडनं ॥ ४ ॥ अनिमित्तमिदंकस्मात्कुयोनित्व-
मवाप्तवान् ॥ तदेतंसंशयंछिंधिशिष्यस्याथप्रियस्यते ॥ ५ ॥ इतिराज्ञासुसं-
पृष्टःश्रुतदेवोमहायशाः ॥ साधुसाध्वितिसंभाष्यमनोव्याहर्तुमादधे ॥ ६ ॥
॥ श्रुतदेवउवाच ॥ ॥ शृणुराजन्प्रवक्ष्यामियत्पृष्टंतुत्वयाऽनघ ॥ शिवायैच
शिवेनोक्तंकैलासशिखरेऽमले ॥ ७ ॥ सृष्ट्वेमान्सकलाँल्लोकान्पश्चात्तेषामव-
स्थितिं ॥ आमुष्मिकीमैहिकींचद्विविधांपर्यकल्पयत् ॥ ८ ॥ हेतुत्रयंचप्रत्येक-
मवस्थित्यैव्यधात्प्रभुः॥ जलसेवाचान्नसेवासेवाचैवौषधस्यच॥९॥त्रयएतेमहा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भागऐहिकास्थितिंहितवः ॥ एवमामुष्मिकेराजंस्त्रयएवेरिताःश्रुतौ ॥ १० ॥
साधुसेवाविष्णुसेवासेवाधर्मपथस्यच ॥ पुरासंपादिताह्येतेपरलोकस्यहेतवः ॥
११ ॥ गृहेसंपादितंयद्वत्पाथेयंपद्धतौयथा ॥ ऐहिकाहेतवोराजन्सद्यःसंपादि-
तार्थदाः ॥ १२ ॥ किंचेष्टमपिसाधूनांमनसोयदिदुःसहं ॥ कुताश्चित्कारणा-
द्राजंस्तच्चानर्थायकल्पते ॥ १३ ॥ अप्रियंकिमुवक्तव्यंदुःखहेतुरितिस्फुटं ॥
अत्रैवोदाहरंतीममितिहासंपुरातनं ॥ १४ ॥ पापघ्नंमहदाश्चर्यंशृण्वतांरोम-
हर्षणं ॥ यज्ञदीक्षामुपगतःपुरादक्षःप्रजापतिः ॥ १५ ॥ आह्वानार्थंभूतपतेरग-
मद्रजताचलं ॥ तंदृष्ट्वानोत्थितःशंभुस्तस्यैवहितकाम्यया ॥ १६ ॥ सर्वामर-

१ मार्गे । २ रोमांचजनकं । ३ कैलासं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुश्चाहंछंदोगम्यःसनातनः ॥ भृत्याह्येतेबलिहराश्चंद्रेंद्राद्याःसुरेश्वराः ॥
॥ १७ ॥ स्वामीभृत्यायनोत्तिष्ठेत्स्वभार्यायैपतिस्तथा ॥ गुरुःशिष्यायनो-
त्तिष्ठेदितिशास्त्रविदांमतं ॥ १८ ॥ नसंबंधोगुरुत्वेचकारणंत्वितिवैश्रुतिः ॥
बलंज्ञानंतपःशांतिर्यत्रचैवाधिकंभवेत् ॥ १९ ॥ सगुरुस्त्वितरेषांवैनीचाश्चे-
युंर्हिप्रेष्यतां ॥ उत्तिष्ठंतिचस्वाम्याद्याभृत्यादीन्यदिचाग्रहात् ॥ २० ॥ आयु-
र्वित्तंयशस्तेषांसद्योनश्यतिसंततिः ॥ तस्मादहंतुनोत्तिष्ठेप्रियोऽयंश्वशुरोम-
म ॥ २१ ॥ इतितस्यहितान्वेषीनोच्चचालासनाद्विभुः ॥ नोत्थितंतंमृडंदृ-
ष्ट्वाकुपितोऽभूत्प्रजापतिः ॥ २२ ॥ अनिंदद्बहुधातंवैपुरतोगिरिजापतेः ॥

१ प्राप्नुयुः । २ नोदतिष्ठत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहोदर्पमहोदर्पंदरिद्रस्याकृतात्मनः ॥ २३ ॥ यस्यवित्तंबहुवयावृषश्चर्माव-
शेषितः ॥ अतएवकपालास्थिधरःपाखंडगोचरः ॥ २४ ॥ वृथाहंकारिणो
दैवंकुतोदास्यतिमंगलं ॥ लोकेकृत्तैणचर्माणिशुचीनीतिविदोविदुः ॥ २५ ॥
धत्तेदरिद्रःशीतार्तोऽपवित्रंचगजाजिनं ॥ वेश्मश्मशानंयस्ययस्याद्भुजंगाःकि-
लभूषणं ॥ २६ ॥ नधीरतानचज्ञानंवृकात्तस्मात्पलायिनः ॥ भूतप्रेतपि-
शाचादिदुर्जनैःसंगतोऽनिशं ॥ २७ ॥ नकुलंश्रूयतेक्कापिनासौवैसाधुसंमतः ॥
वृथाविश्रंभितःपूर्वंनारदेनदुरात्मना ॥ २८ ॥ येनाहंबोधितःप्रादांकन्यांचैता-
मुमांसतीं ॥ पृथग्धर्मगताचैषासुखंवसतुतद्गृहे ॥२९॥ नास्माभिःश्लाघनीयो-

१ असंस्कृतमते । २ सततं । ३ विश्वासं प्रापितः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽसौमत्सुतापिकथंचन ॥ यथाकुलालकलशश्चांडालस्यवशंगतः॥३०॥ इतिद-
क्षोविमूढात्माह्यनाहूयसतींमृडं ॥ बहुधातंविनिर्भर्त्स्यर्यतूष्णीमेवगृहंययौ ॥३१॥
यज्ञवाटंततोगत्वाऋत्विग्भिर्मुनिभिःसह ॥ ईजेयज्ञविधानेननिंदन्नेवमहाप्रभुं
॥ ३२ ॥ ब्रह्मविष्णूविहायैवसर्वेदेवाःसमागताः ॥ सिद्धचारणगंधर्वायक्षरा-
क्षसाकिंनराः ॥ ३३ ॥ तदादेवीसतीपुण्यास्त्रीचापल्यात्प्रलोभिता ॥ उत्सुका
चोत्सवंद्रष्टुंबंधूंस्तत्रसमागतान् ॥ ३४ ॥ निवार्यमाणारुद्रेणतरलास्त्रीस्वभा-
वतः ॥ प्रत्युक्तापिपुनश्चैवंगच्छंत्यांत्वयिसर्वथा ॥ ३५ ॥ सनिंदतिसभामध्ये
सदामांवरेर्वार्णिनि ॥ तच्चासह्यंवचःश्रुत्वाकायंसत्यंजहासिच ॥ ३६ ॥ अस-

१ चपला । २ सुंदरांगि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ह्यमपिसोढव्यंममानुग्रहमिच्छता ॥ मयायथाकृतंदेवितथात्वंनैववर्तसे ॥ ३७॥
तस्मान्मागच्छशालांत्वंनशुभंतुभवेद्ध्रुवं ॥ इत्येवंबोधितादेवीचापल्यात्पुरानग-
मत् ॥३८॥ निश्चक्रामसतीगेहादेकाकीपादचारिणी ॥ तांदृष्ट्वावृषभस्तूर्णंपृ-
ष्ठेदेवीमुवाहसः ॥३९॥ कोटिशोभूतसंघाश्चअनुजग्मुःसतींतदा ॥ यज्ञवाटंतु
सागत्वापत्नीशालांययौपुरा ॥ ४० ॥ तूष्णीमासन्सतींदृष्ट्वाखेदात्तस्माद्विनि-
र्गता ॥ पतिवाक्यंतुसंस्मृत्यजगामोत्तरवेदिकां ॥ ४१ ॥ पितासभ्याश्चतांदृ-
ष्ट्वास्थितास्तूष्णींहताशिषः ॥ सारुद्राहुतिपर्यंतंपश्यंतीपितृचेष्टितं ॥४२॥ त्य-
क्त्वारुद्रंजुहूतंतमुवाचाश्रुप्लुतेक्षणा ॥ देव्युवाच ॥ महदुल्लंघनंपुंसांनप्रायः

१ धारयामास। २ हतभाग्याः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेयसेभवेत् ॥ ४३ ॥ लोककर्तालोकभर्तासर्वेषांप्रभुरव्ययः ॥ एवंभूतस्यरुद्र-
स्यकथंनोदीयतेहविः ॥ ४४ ॥ जातामेस्यकदुर्बुद्धिं हरंत्यन्येसभागताः ॥ न
चेदृशामहात्मानःकिमेषांविमुखोविधिः ॥ ४५ ॥ इत्येवंभाषमाणांतांपूषादे-
वोजहासह ॥ श्मश्रूणांचालनंचक्रेभृगुर्हतशुभस्तथा ॥ ४६ ॥ भुजपादोरुकु-
क्षीणांस्फालनंचक्रिरेपरे ॥ बहुधानिंदनंचक्रेतत्पिताहतभाग्यवान् ॥ ४७ ॥
तच्छ्रुत्वारुद्रभार्यासाकोपाकुलितमानसा ॥ प्रायश्चित्तंश्रुतेःकर्तुंदेहंतत्याजसा
सती ॥ ४८ ॥ होमाग्नौवेदिकामध्येसर्वेषामेवपश्यतां ॥ हाहाकारोमहाना-
सीद्दुद्रुवुःप्रमथाद्रुतं ॥ ४९ ॥ आचख्युर्देवदेवायवृत्तांतमखिलंतदा ॥ त-
च्छ्रुत्वासहसोत्थायरुद्रःकालांतकोपमः ॥ ५० ॥ जटामुत्पाट्यहस्तेनभूत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लेतामताडयत् ॥ ततोऽभवन्महाकायोवीरभद्रोमहाबलः ॥ ५१ ॥ सहस्त्रबा-
हुरभवत्कालांजनसमप्रभः ॥ बद्धांजलिपुटःस्थित्वाऽव्याजहारहरंतदा ॥ ५२ ॥
मत्सृष्टिस्तुयदर्थंतेतदर्थेमांनियोजय ॥ इत्युक्तःप्राहतंक्रुद्धोधूर्जटिस्तंपुरःस्थि-
तं ॥ ५३ ॥ हनमन्निंदकंदक्षंयदर्थंमत्प्रियामृता ॥ भूतसंघास्तुगच्छंतुसहै-
तेनमहात्मना ॥ ५४ ॥ इत्यादिष्टाभगवतायर्युदक्षसभांद्रुतं ॥ जघ्नुःसर्वा-
न्महावीरान्देवासुरनरादिकान् ॥ ५५ ॥ पूषणश्चहसतोदंतान्जटाभूश्च
बभंजह ॥ श्मश्रूण्युत्पाटयांचक्रेभृगोस्तस्यदुरात्मनः ॥ ५६ ॥ यद्यदास्फा-
लितंपूर्वंतत्तच्चिच्छेदवीर्यवान् ॥ ततोदक्षशिरोहर्तुंबहूद्योगंचकारसः ॥ ५७ ॥
मुनिमंत्रप्रगुप्तंतुनैवकृंततितद्बलात् ॥ हरोज्ञात्वातुचिच्छेदस्वयमेवदुरात्मनः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ५८ ॥ एवंमखगतान्हत्वासानुगःस्वालयंययौ ॥ हतावशिष्टाःकेचित्तुब्र-
ह्माणंशरणंययुः ॥ ५९ ॥ तैरन्वितोययौब्रह्माकैलासंतुशिवालयं ॥ ततोरुद्रं
सांत्वयित्वावचोभिर्विविधैरपि ॥ ६० ॥ तेनैवसहितःप्रागाद्यज्ञवाटंमहाप्र-
भुः ॥ तेनैवोज्जीवयामाससर्वान्दक्षसभागतान् ॥ ६१ ॥ ख्यात्यैप्रादाद-
जमुखंदक्षस्यतुतदाशिवः ॥ अजश्मश्रूण्यदाच्छंभुर्भगवेतुमहात्मने ॥ ६२ ॥
पूष्णश्चदंतान्नप्रादात्पिष्टादंचचकारतं॥अवयवानांव्यतिकरंकेषांचिदपिवैशिवः
॥ ६३ ॥ शिवमापुस्ततःसर्वब्रह्मणाचशिवेनच ॥ पुनःप्रवर्तितोयज्ञोयथापूर्वं
महात्मनः ॥ ६४ ॥ यज्ञांतेसर्वदेवाश्चजग्मुस्तेस्वंस्वमालयं ॥ नैष्ठिकंब्रह्म-
चर्यंतुकृत्वारुद्रोमहातपाः ॥ ६५ ॥ गंगातटेतपस्तेपेपुन्नागतरुमूलगः ॥ द-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षात्मजासतीदेवीत्यक्तदेहापातिव्रता ॥ ६६ ॥ जज्ञेहिमाद्रेर्मेनायांववृधेत-
स्यवेश्मनि ॥ एतस्मिन्नेवकालेतुतारकाख्योमहासुरः ॥ ६७ ॥ सुतीव्रत-
पसाराध्यब्रह्माणंपरमेष्ठिनं ॥ अवध्यत्वंवरंवव्रेदेवासुरनरोरगैः॥ ६८ ॥ आयु-
धैरस्त्रसंघैश्चसर्वैरेवमहाबलः ॥ रुद्रपुत्रंविनादैत्योह्यवध्यःसकलैरपि ॥ ६९ ॥
इतितस्मैवरंप्रादाद्ब्रह्मालोकपितामहः ॥ अस्त्रीकत्वादपुत्रत्वाद्रुद्रस्येतितथा-
स्त्विति ॥ ७० ॥ वरंगृहीत्वास्वगृहंप्राप्यलोकान्बबांधह[1] ॥ दासादेवामार्ज[2]-
नादौदास्योदेव्यश्चतद्गृहे ॥ ७१ ॥ ततस्तत्पीडितादेवाब्रह्माणंशरणंययुः ॥
तैःपीडांवर्णितांश्रुत्वावेधाःप्राहसुरानिदं ॥ ७२ ॥ वरप्रदानकालेऽहंरुद्रपुत्रं

१ पीडयामास । २ गृहसंमार्जनादौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनासुराः ॥ नान्यैर्वध्यइतिप्रादांवरंतस्मैदुरात्मने ॥ ७३ ॥ पुरासतीरुद्र-
पत्नीसत्रेत्यक्तकलेवरा ॥ जाताहिमवतःपुत्रीपार्वतीतिचयांविदुः ॥ ७४ ॥
रुद्रोहिमवतःपृष्ठेतपश्चरतिदुश्चरं ॥ योजयध्वंचपार्वत्यारुद्रंलोकेश्वरंप्रभुं ॥
॥ ७५ ॥ तस्माज्जातःसुतःशत्रुंयुष्माकंतुहनिष्यति ॥ इतिब्रह्मसमादिष्टाइंद्रा-
द्याःस्वगृहंगताः ॥ ७६ ॥ पुनर्देवेंद्रसदनेसंगतै[1]रमरेश्वरैः ॥ धिषणेना[2]भिसं-
मंत्र्यदेवेंद्रःपाकशासनः ॥ ७७ ॥ सस्माराचस्वकार्यार्थेनारदंस्मरमेवच ॥
तत्रागतौततस्तौतुबलभि[3]द्वाक्यमब्रवीत् ॥ ७८ ॥ हिमवंतंभवान्गत्वावच-
सातंप्रबोधय ॥ पुत्रीतवप्राग्दक्षस्यहरपत्नीमहागिरे ॥ ७९ ॥ तपश्चरति

१ मिलितैः । २ बृहस्पतिना सह । ३ इंद्रः ।

For Private and Personal Use Only

तेशृंगेवियुक्तादक्षकन्यका ॥ मृडस्यतुसपर्यायै[1]विनियोजयतत्प्रियां ॥ ८० ॥
तस्यैवपत्नीभवितासएवभवितापतिः ॥ इत्यादिष्टोमघोनाचनारदोऽभ्येत्यतं-
गिरिं ॥ ८१ ॥ तथैवकारयामासदेवेंद्रेणोदितंयथा ॥ पश्चात्कामंसमाहूयम-
घवानिदमाहच ॥ ८२ ॥ देवानांचहितार्थायतथामृडहितायच ॥ वसंतेन
समायुक्तोगत्वारुद्रतपोवनं ॥ ८३ ॥ गुणान्विजृंभयित्वातुवासंतान्हृच्छया-
वहान् ॥ यदासंनिहितादेवीपार्वतीतु मृडस्यच ॥ ८४ ॥ तदाप्रयुज्यत्वंबाणा
न्मोहयस्वमहाप्रभुं ॥ तयोस्तुसंगमेजातेकार्यंनोऽर्द्धाभविष्यति ॥ ८५ ॥ इ-
त्यादिष्टःस्मरस्तूर्णंप्रतस्थेवाढमित्यथ ॥ सवसंतःसरतिकःसानुगस्तद्वनंय-

१ सेवायै । २ कोकिलालापमलयानिलादीनुत्पाद्येत्यर्थः । ३ कामोत्तेजकान् । ४ सत्यं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यौ ॥ ८६ ॥ अकालेतुवसंततुंजृंभयित्वास्वशक्तितः ॥ तद्वनेसर्वतोरम्येमं-दानिलनिषेविते ॥ ८७ ॥ कदाचिद्देवदेवोऽपिपार्वत्याश्चसपर्यया ॥ प्रीतःस्वां-कंसमारोप्यकिंचिद्व्याहर्तुमारभत् ॥ ८८ ॥ प्राणप्रियासंगमस्यकालोऽयमि-तिनिश्चितः ॥ पेशलंधनुरादायसतस्थौहरपृष्ठतः ॥ ८९ ॥ कृत्वाजवनिकांवृ-क्षंबाणमेकंमुमोचह ॥ द्वितीयमपिसंधायचक्रेमोक्तुंमहोद्यमं ॥ ९० ॥ अथ क्षुब्धमनाभूत्वामृडश्चिंतामवापह ॥ नमेमनश्चलेत्क्वापिकेनवाकश्मलीकृतं ॥ ॥ ९१ ॥ इतिचिंताकुलोवामेपार्श्वेकामंददर्शह ॥ क्रुधोन्मील्यललाटाक्षंस्वां-काद्देवीमपास्यच ॥ ९२ ॥ तस्याक्ष्णःसमभूदग्निस्तीक्ष्णोलोकविभीषणः ॥

१ कोमलं पुष्परूपमित्यर्थः । २ तिरोधानं । ३ कलुषीकृतं चंचलतां नीतमिति यावत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनदग्धोऽभवत्सद्योमन्मथःसशरासनः ॥ ९३ ॥ कार्यसिद्धिमपश्यंतोदुद्रु-
वुश्चामरादिवं ॥ शंकमानाःस्वदाहंचवसंतोरतिरेवच ॥ ९४ ॥ निमील्यलो-
चनेभीतादेवीदूरंप्रदुद्रुवे ॥ संनिधानंस्त्रियाहर्तुंमृडोऽप्यंतरधीयत ॥ ९५ ॥
रुद्रस्येष्टंप्रकुर्वाणोदेव्याश्चमनसोहितं ॥ लेभेऽनर्थमनिर्वृत्तंविप्रियंकुर्वतस्तुकिं
॥ ९६ ॥ तस्मादिक्ष्वाकुतनयःसाधूनामप्रियःसदा ॥ तस्मादात्महितांसे-
वांनाकरोन्मंदधीःसतां ॥ ९७ ॥ अनुभूतंमहद्दुःखंतस्माद्दुर्योनिरेवच ॥ त-
स्मात्कार्यातुसाधूनांसेवासर्वार्थसाधिनी ॥ ९८ ॥ रुद्रस्याप्रियकारित्वात्स्म-
रोभावीनिजन्मनि ॥ दुःखंतुबहुलंलेभेजन्मकालेमहाप्रभुः ॥ ९९ ॥ इतिहा-
समिमंपुण्यंयेशृण्वंतिदिवानिशं ॥ जन्ममृत्युजरादिभ्यामुच्यंतेनात्रसंशयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १०० ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकामदहनं नामाष्टमोऽध्यायः ॥ ८ ॥ ॥ मैथिलउवाच ॥ ॥ तस्यदग्धस्यकामस्य कस्माज्जन्माभवद्विभो ॥ किंदुःखमभवत्तस्मिन्कर्मणःसद्विलंघनात् ॥१॥ एत-दाचक्ष्वमेब्रह्मन्श्रोतुंकौतूहलंहिमे ॥ ॥ श्रुतदेवउवाच ॥ ॥ कुमारजन्मव-क्ष्यामिश्रवणात्पापनाशनं ॥ २ ॥ यशस्यंपुत्रदंधर्म्यंसर्वरोगविनाशनं ॥ श-भुनातुहतेकामेतत्पत्नीरतिसंज्ञिता ॥ ३ ॥ मुमोह¹पुरतोदृष्ट्वापतिंभस्मावशे-षितं ॥ जातसंज्ञा²मुहूर्तेनविललापहचित्रधा ॥ ४ ॥ यद्विलापाद्वनंसर्वंसम-दुःखमभूत्तदा ॥ तच्चितांग्नौस्वकायंतुत्यक्तकामाथमाधवं ॥ ५ ॥ पत्युःसखा-

१ मूर्छा प्राप । २ अपगत मूर्छा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यंसस्मारकर्तुंतात्कालिकींक्रियां ॥ सचागतश्चितिंकर्तुंवीरपत्न्यामहाभुजः ॥
॥ ६ ॥ सतुत्रस्तःसखींदृष्ट्वाक्षणंमूर्छापरोऽभवत् ॥ रतिंतुसांत्वयामाससां-
त्वैर्बहुविधैरपि ॥७॥ पुत्रतुल्योऽस्मितेभद्रेस्थितेमयिचनार्हसि ॥ कायंत्यक्तुंध-
र्महेतुमित्याद्यैर्बहुधापिसा ॥ ८ ॥ नैवस्थातुंमनश्चक्रेतेनसंस्तंभितारतिः ॥
दृष्ट्वादार्ढ्यंवसंतोऽपिचितिंचक्रेसरित्तटे ॥ ९ ॥ सावगाह्यद्युनद्यांचकृत्वाका-
र्याणिसर्वशः ॥ संनियम्येंद्रियग्रामंनिवेश्यात्मनिवैमनः ॥ १० ॥ चितिमा-
रोढुमारेभेततोजाताऽशरीरवाक् ॥ माप्रवेशयकल्याणिवह्निंपतिपरायणा ॥
॥ ११ ॥ भविष्यतिचतेपत्युर्हराद्विष्णोश्चयादवात् ॥ जन्मद्वयंक्रमेणैवतत्र

१ स्थिरीकृता । २ मंदाकिन्यां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चोत्तरजन्मनि ॥ १२ ॥ भैष्म्यांकृष्णान्महाविष्णोःप्रद्युम्नाख्योभविष्यति ॥
वरिष्यसित्वंचशापाद्ब्रह्मणःशंबरालये ॥ १३ ॥ प्रद्युम्नाख्येनतेपत्यासंगति-
श्चभविष्यति ॥ इत्युक्त्वाविरराभाथवाणीचाकाशगोचरा ॥ १४ ॥ श्रुत्वातां
तुनिवृत्ताऽभून्मरणेकृतनिश्चया ॥ ततोदेवाःसमाजग्मुःस्वार्थैकामेहृतेहरात् ॥
॥ १५ ॥ रत्याइष्टंप्रकुर्वाणागुर्विंद्राग्निपुरोगमाः ॥ तांतेनिवर्तयामासुर्वरेणम-
हतासतीं ॥१६॥ अनंगोऽपिभवेत्सांगोरतेतवाक्षिगोभवेत् ॥ इतितांविनिवर्त्या-
शुधर्मंचोपदिदेशिरे॥१७॥पूर्वकल्पेत्वयंराजासुंदराख्योमहाप्रभुः ॥ त्वमेवपत्नी
तत्रापिरजःसंकरकारिणी ॥१८ ॥ तेनेयंचदशाऽभूत्तेकुर्विदानींचनिष्कृतिं ॥ मं-
दाकिन्यांतुवैशाखेप्रातःस्नानंतथाकुरु ॥ १९ ॥ मधुसूदनमभ्यर्च्यकथांदिव्यां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाशृणु॥ अशून्यशयनंनामव्रतमाचरभामिनि ॥२०॥ धर्मेणानेनतेभद्रेव्रते-
नापिचमाधवे॥नूनंतेभवितापत्युरुपलब्धिर्नसंशयः॥२१॥ इतितस्यवरंदत्वादे-
वाजग्मुर्यथागतं॥ ततःकृच्छ्रान्निवृत्तासादेवीकामसतीतथा॥ २२॥गंगावगाहनं
चक्रेमेषसंस्थेदिवाकरे ॥ अशून्यशयनंनामव्रतंचापिसेमाहिता ॥ २३ ॥ तेन
पुण्यप्रभावेणसद्यःकामोऽक्षिगोचरः॥ अभूत्तस्यामहाराजलोकेचावार्यवीर्यवान्
॥ २४॥ पूर्वकल्पेत्वयमपिराजाधर्मपरायणः ॥ वैशाखोक्तान्महाधर्मान्नचक्रेते-
नवैस्मरः ॥२५॥ देहहानिंप्रपेदेऽसौपुत्रोऽपिपरमात्मनः॥ वृथानीतेतुवैशाखेमे-
षसंस्थेदिवाकरे ॥ २६ ॥ अवस्थेयंचदेवानांमनुष्याणांतुकाकथा ॥ त्र्यंबकेऽत-
र्हितेपश्चान्निराशागिरिकन्यका ॥२७॥ तूष्णींस्थितातदाभ्रांतातांदृष्ट्वाहिमवा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्गिरिः ॥ चकितःस्वगृहंनिन्येदोर्भ्यांतांपरिरभ्यच[1] ॥ २८ ॥ रूपौदार्यगुणा-
न्दृष्ट्वाहरस्यैवमहात्मनः ॥ सएवमेपतिर्भूयादितितन्निष्ठमानसा ॥ २९ ॥ गं-
गोपकूलमापेदेतपस्तप्तुंधृतव्रता ॥ निवारितापिसादेवीपित्रामात्रास्वकैर्जनैः ॥
॥ ३० ॥ अर्चयंतीमहालिंगंनिराहाराजटाधरा ॥ दिव्यवर्षसहस्रांतेप्रत्यक्षोऽ
भून्महेश्वरः ॥ ३१ ॥ भूत्वावर्णी[2]तुसायाह्नेपर्णशालामुखेविभुः ॥ स्वनिष्ठम-
नसोदार्ढ्यंवाक्यैर्नानाविधैरपि ॥ ३२ ॥ ज्ञात्वाऽब्रवीद्वरंभद्रेवरयेतिमहाप्रभुः
॥ सावव्रेमेपतीरुद्रस्त्वंभवेतिमनोरमा ॥ ३३ ॥ सतथैववरंदत्वाऋषीन्स-
स्मारसप्तच ॥ आजग्मुस्तेपिमुनयःस्थिताःप्रांजलयःपुरः ॥३४॥ ऋषीनाज्ञा-

१ आलिंग्य । २ ब्रह्मचारी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पयामासकन्यांप्रष्टुंहिमालयं ॥ तआदिष्टाभगवताकन्यार्थेहिमवद्गृहं ॥ ३५ ॥ प्रापुर्विहायसासर्वेद्योतयंतोदिशोदश ॥ प्रत्युज्जगामसगिरिःसप्तैतान्ब्रह्मवि-त्तमान् ॥३६॥ संपूज्यविधिवत्सर्वान्सुखासीनानपृच्छत ॥ धन्योस्मिकृतकृत्योऽस्मियद्भवंतोगृहागताः ॥३७॥ भवदागमनंमन्येममजन्मफलंत्विति ॥ नकृत्यंविद्यतेऽस्माभिःपूर्णार्थानांमहात्मनां ॥ ३८ ॥ तथापिब्रूतकार्यंवोयत्कर्तव्यंमया‍ऽधुना ॥ इत्युक्तास्तेततःप्रोचुर्हिमवंतंमहागिरिं ॥ ३९ ॥ त्वयातुसदृशंवाक्यमुक्तंगिरिपतेदृढं ॥ अस्मदागमनेहेतुंवक्ष्यामस्तेमहोदयं ॥ ४० ॥ कन्यातेपार्वतीनामपूर्वंदक्षात्मजासती ॥ जातातवकुमारीयंयज्ञेत्यक्तकलेवरा ॥४१॥

१ आकाशमार्गेण । २ संमुखं जगाम । ३ उचितं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्याःपाणिग्रहेदक्षःशंभुर्नान्योजगत्त्रये ॥ देयासाशंभवेदेवीभवतानंत्यमिच्छता ॥४२॥ पूर्वजन्मसहस्रेषुभवतासुकृतंकृतं ॥ इदानींतवदिष्ट्यातुपारिपाकमुपागतं ॥ ४३ ॥ तेषांतद्वचनंश्रुत्वासंहृष्टात्मामहागिरिः ॥ व्याजहारपुनर्वाक्यंपुत्रीवल्कलधारिणी ॥ ४४ ॥ गंगातीरेनिराहारातपस्तपतिदुश्चरं ॥ कांक्षमाणापतिंशंभुंतस्याइष्टमिदंत्विति ॥ ४५ ॥ दत्ताकन्यामयातस्मैत्र्यंबकायमहात्मने ॥ शीघ्रंगत्वाभवंतस्तुयत्रशंभुर्महाप्रभुः ॥ ४६ ॥ प्रीत्याहिमवतादत्तांगृहाणेतिनिवेद्यच ॥ भवंतएवकुर्वंतुचैतांवैवाहिकींक्रियां ॥ ४७ ॥ इत्युक्तास्तेहिमवतातमामंत्र्यशिवंययुः ॥ लक्ष्म्याद्यायोषितःसर्वाविष्णवाद्यादे-

१ अनल्पफलं । २ दैवेव । ३ आपृच्छच ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वताअपि ॥ ४८ ॥ षण्मातरोऽथमुनयोद्रष्टुंजग्मुर्महोत्सवं ॥ शिवःसर्वामर-
गणैर्मुनिभिर्मातृभिस्तथा ॥ ४९ ॥ आन्वितोवृषभारूढःप्रमथैःकोटिभिर्वृतः ॥
भेरीशंखमृदंगाद्यैःकाहलापटहादिभिः ॥ ५० ॥ ब्रह्मघोषैर्वेदिभिश्चप्रावि-
शद्धिमवत्पुरीं ॥ सुमुहूर्तेशुभेलग्नेशुभग्रहनिरीक्षिते ॥ ५१ ॥ विवाहमकरो-
च्छैलःप्रहृष्टेनांतरात्मना ॥ महोत्सवस्तदाचासीत्त्रिलोक्यांप्राणिनांनृप ॥
॥ ५२ ॥ महोत्सवेनिर्वृत्तेतुशंकरोलोकशंकरः ॥ रेमेस्वच्छंदयादेव्यालोक-
धर्माननुव्रतः ॥ ५३ ॥ ऋद्धिमद्धिमवद्गेहेदेवेंद्रभवनोपमे ॥ सशर्वर्यांनदी-
तीरेवनराजिषुशंकरः ॥ ५४ ॥ मत्तालिद्विजसंनादमयूररवमंडिते ॥ दिव्य-

१ वेदघोषैः । २ समाप्ते । ३ रात्रौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्षसहस्राणिरेमेस्वच्छंदयाविभुः ॥ ५५ ॥ स्त्रीणामिंद्रवराभावात्तस्मिन्
कालेनृपोत्तम ॥ पुंसंसर्गात्पुनर्गर्भोनारीणांस्रवतिध्रुवं ॥ ५६ ॥ प्रत्यहंरम-
णाद्देव्यांनाभूद्गर्भोहरादतः ॥ देवानामभवच्चिंतापुत्रालाभाद्धराद्विभोः॥ ५७ ॥
सर्वेसंगत्यसंमंत्र्यमिथएवंवभाषिरे ॥ कामीवाभूद्रतौनित्यंसक्तोदेव्यांहरः
स्वराट् ॥ ५८ ॥ नास्माकंसिध्यतेकार्यंनित्यंगर्भस्यसंस्रवात् ॥ पुनारति-
र्यथानस्यात्तथाऽस्माभिर्विधीयतां ॥ ५९ ॥ मिथएवंतुसंभाष्यव्यचिन्वन्दक्ष-
मत्रते ॥ अग्निंकल्पंविनिश्चित्यत्यधूचुर्मानपुरःसरं ॥ ६० ॥ मुखंत्वमग्नेदेवा-
नांत्वंवंधुर्गतिरेवच ॥ इदानीमपिगच्छत्वंरमतेयत्रवैहरः ॥ ६१ ॥ रत्यंतेद-
र्शयात्मानसंभवेन्नरातिर्यथा ॥ त्वांदृष्ट्वाव्रीडितादेवीततश्चापसरेद्ध्रुवं ॥ ६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शिष्योभूत्वातुरत्यंतेपृच्छतत्वंस्मरांतकं ॥ तत्वसंप्रश्नव्याजेनकालंबहुनयप्रभो ॥६३॥ बहुकालेगतेदेवीकुमारंप्रसविष्यति ॥ देवैरेवंप्रार्थितोऽग्निरोमित्युक्त्वाहरंययौ ॥ ६४ ॥ वीर्योत्सर्गात्पूर्वमेवगतोवह्नीरतांतरे ॥ तंदृष्ट्वाव्रीडितादेवीविवस्त्राविमनाययौ ॥ ६५ ॥ रतिंविहायत्वरयाततोरुद्रोऽतिकोपितः॥ वह्निंप्राहगृहाणेदंमद्विमृष्टंसुदुर्मते ॥ ६६ ॥ मद्वीर्यंदुःसहंपापरतिविघ्नस्त्वयाकृतः ॥ उत्स्रक्ष्यामिचमद्वीर्यंत्वन्मुखेहव्यवाहन ॥ ६७ ॥ इत्युक्त्वोत्सृष्टवान्वीर्यंहव्यवाहमुखेहरः ॥ तद्भृत्वादह्यमानःसन्स्वोदरेवीर्यमुल्बणं ॥ ६८ ॥ चिंतयानोययौधामदेवानांयज्ञपूरुषः॥कथंचित्प्राणमुद्धृत्यदेवेभ्यस्तन्न्यवेदयत् ॥६९॥ देवावह्नीरितंश्रुत्वाहर्षशोकौसमाययुः ॥ स्थितंवीर्यमितिह्लादंकथंतुप्रसवोभवे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त् ॥७०॥ इतिदुःखंतदाचासीद्वह्नेःकुक्षौतुशांभवं ॥ ववृधेतेजसाक्षिप्तंदशमासा गतास्तदा ॥ ७१ ॥ नापश्यत्प्रसवोपायंवहुदुःखपरायणः ॥ देवान्वैशरणं प्रापगर्भमोचनहेतवे ॥ ७२ ॥ तेदेवावह्निनासाकंप्रापुर्गंगांपयस्विनीं ॥ गं-गास्तोत्रेणतांस्तुत्वाप्रार्थयामासुरंजसा ॥ ७३ ॥ त्वंमातासर्वलोकानांत्वमे-वजगतांगतिः ॥ देवतार्थंतुत्वंभद्रेधत्स्वतेजस्तुशांभवं ॥ ७४ ॥ तद्वह्नेर्वर्धते गर्भोनास्तीत्वात्प्रसवोऽस्यच ॥ तस्माद्वह्निंचनःसर्वान्समुद्धरदयांकरु ॥ ७५ ॥ इत्येवंप्रार्थितादेवीतथास्त्वितिवचोऽब्रवीत् ॥ देवास्तुवह्नयेप्राहुर्मंत्रंगर्भविमो-चनं ॥ ७६ ॥ तन्मंत्राद्गर्भमाकृष्यऽव्यसृजद्धव्यवाहनः ॥ गंगायांशांभवंतेजो भास्वरंलोकदुःसहं ॥ ७७ ॥ साचोढ्वाकतिचिन्मासान्नशशाकततःपरं ॥ नि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतातत्प्रभावेणस्फोटोद्रिक्तकलेवरा ॥ ७८ ॥ बहुदुःखाकुलादेवीपातिव्रत्य-
प्रभावतः ॥ उज्जहारस्वोदरस्थंगर्भंलोकैकपावनी ॥ ७९ ॥ शर[1]कांडेतुचिक्षेप
दह्यमानासमंततः ॥ शरकांडैस्तुसंभिन्नःषोढाभिन्नोबभूवह ॥ ८० ॥ ष-
ट्कृत्तिकाःसमाजग्मुर्ब्रह्मणाचोदितास्तदा ॥ शरकांडविनिर्भिन्नंषोढासंधाय
शांभवं ॥ ८१ ॥ षण्मुखंपुरुषंकृत्वाचैकदेहमितिस्फुटं ॥ कृत्तिकाविधिनाज्ञप्ता-
स्तंतथाचक्रिरेद्रुतं ॥ ८२ ॥ तद्देहंपुरुषाकारंषण्मुखंशरकांडगं ॥ अरक्ष्यमाण-
मेवासीच्छरकांडेषुवैचिरं ॥ ८३ ॥ एकदावृषभारूढौपार्वतीपरमेश्वरौ ॥ श्री
शैलंगंतुमनसौतनयोपरिजग्मतुः ॥ ८४ ॥ तदासीत्पार्वतीदेवीसद्यः[2]स्नुतपयो-

१ तृणविशेषराशौ । २ स्नुतौ निर्गतक्षीरौ स्तनौ यस्याः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धरा ॥ विस्मितोवाचतंरुद्रंस्नुतौकस्मात्पयोधरौ ॥ ८५ ॥ कारणंब्रूहिविश्वात्मन्नित्युक्तस्तुहरोऽब्रवीत् ॥ शृणुदेविप्रवक्ष्यामिपुत्रोऽधोवर्ततेतव ॥ ॥ ८६ ॥ त्वयिवीर्यसमुत्सृष्टेःप्रागेवागाद्धविर्वहः ॥ तंदृष्ट्वाव्रीडितोत्वंवैप्रविष्टाचस्थलांतरं ॥ ८७ ॥ मयाकोपाद्वह्निमुखेविसृष्टंवीर्यमुल्बणं ॥ देवानांचप्रसादेनगंगायांव्यसृजाद्धिसः ॥ ८८ ॥ गंगादंदह्यमानाऽथचिक्षेपचशरांतरे ॥ तत्रषोढाप्रभिन्नंतुमातृभिश्चदृढीकृतं ॥८९॥ पुरुषाकृतिमापेदेतंदृष्ट्वातेस्नुतौस्तनौ ॥ पालयैनंमहावीर्यंविष्णुनासमविक्रमं ॥ ९० ॥ अयंममौरसःपुत्रस्तवभामिनिनिश्चितं ॥ तस्माद्गृहाणशीघ्रंत्वंख्यातिर्भूयादतीवते ॥ ९१ ॥ इत्या-

१ अग्निः । २ लज्जिता ३ । उत्कटं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञप्ताशंभुनासातमादायांतिकेद्रुतं ॥ अंकमारोप्यतंदेवीपाययामासस्वौस्तनौ ॥ ९२॥ दैवेनमोहितादेवीपुत्रस्नेहपराऽभवत् ॥ पुनःकैलासमगमत्प्रभुणासह शांकरी ॥ ९३ ॥ पुत्रंलालयतीदेवीसंतोषंपरमंययौ ॥ एवंकुमारजननंवर्णि-तंतेमयाऽद्भुतं ॥ ९४ ॥ यइदंशृणुयान्नित्यंकुमारजननंशुभं ॥ पुत्रपौत्राभिवृ-द्धिंतुलभतेनात्रसंशयः ॥ ९५ ॥ महद्दुःखंतुजननेहरस्यसाप्रियोऽभवत् ॥ प्रिययाकृतवैशाखधर्मेणाप्रतिमोऽभवत् ॥ ९६ ॥ तस्माद्वैशाखधर्मोहिसर्वा-घौघविनाशनः ॥ अवैधव्यप्रदःपुण्यःसर्वसंपद्विधायकः ॥ ९७ ॥ अनंगोऽ-पिचसांगत्वंयत्प्रसादादवाप्तवान् ॥ अस्नात्वाचाप्यदत्वाचवैशाखोयस्यवै गतः ॥ ९८ ॥ सर्वधर्मकृतोवापिभवेद्दुःखपरंपरा ॥ सर्वधर्मोज्झितस्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पियद्येकोऽयमनुष्ठितः ॥ ९९ ॥ यमदूतांस्तिरस्कृत्यसयातिपरमांगतिं ॥ ॥ १०० ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकुमारोत्पत्तिकथनंनामनवमोऽध्यायः ॥ ९ ॥ ॥ मैथिलउवाच ॥ ॥ यत्कामपत्न्याचरितमशून्यशयनव्रतं ॥ देवोपदिष्टंतस्यास्यविधानंब्रूहिभूसुर ॥ १ ॥ किंदानंकोविधिस्तस्यपूजनेकिंफलंतथा ॥ एतदाचक्ष्वभूदेवश्रोतुंकौतूहलंहिमे ॥ २ ॥ श्रुतदेवउवाच ॥ शृणुभूपप्रवक्ष्यामिव्रतंपापप्रणाशनं ॥ अशून्यशयनंनामरमायैहरिणोदितं ॥ ३ ॥ येनचीर्णेनदेवेशोजीमूतांभःप्रसीदति ॥ लक्ष्मीभर्ताजगन्नाथःसमस्ताघौघनाशनः ॥ ४ ॥ अकृत्वायस्त्विदंराजन्व्रतंपातकनाशनं ॥ गार्हस्थ्यमनुवर्तेततस्येदंनिष्फलंभवेत् ॥ ५ ॥ श्राव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णेशुक्लपक्षेतुद्वितीयायांमहीपते ॥ अशून्यशयनार्थंहिग्राह्यंव्रतमनुत्तमं ॥
॥ ६ ॥ चतुर्मासंचराजेंद्रहविष्याशीभवेन्नरः ॥ चतुर्भिःपारणंमासैःसमृद्धिः
स्यादितोविभो ॥ ७ ॥ लक्ष्मीयुक्तोजगन्नाथःपूजनीयोजनार्दनः ॥ पारणा-
दिवसेप्राप्तेभक्ष्यंचैवचतुर्विधं ॥ ८ ॥ उपायनंचदातव्यंब्राह्मणायकुटुंबिने ॥
सौवर्णींराजतींवापिमूर्तिंकृत्वामनोरमां ॥ ९ ॥ पीतांबरधरांदिव्यांवनमा-
लाविभूषितां ॥ शुक्लपुष्पैःसुगंधैश्चपूजयेत्पुरुषोत्तमं ॥ १० ॥ शय्यादानैर्व-
स्त्रदानैर्विप्राणांभोजनैस्तथा ॥ दंपत्योर्भोजनैश्चैवदक्षिणाभिःप्रपूजयेत् ॥११॥
एवंतुचतुरोमासान्पूजयित्वाजनार्दनं ॥ मार्गशीर्षादिमासेषुपूजयेत्पूर्ववद्धरिं
॥ १२ ॥ संरक्तचरणंध्यायेद्रुक्मिणीसहितंहरिं ॥ चैत्रादिचतुरोमासाने-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वंसंपूजयेद्धरिं ॥ १३ ॥ भूम्याचसहितंदेवमर्चयेद्भक्तिपूर्वकं ॥ सनंदनाद्यैर्मु-
निभिःस्तूयमानंसमंततः ॥ १४ ॥ आषाढस्यचमासस्यद्वितीयायांसमाप-
येत् ॥ अष्टाक्षरेणमंत्रेणजुहुयादादिपारणे ॥ १५ ॥ मार्गशीर्षादिमासानां
पारणेभूमिपालक ॥ जुहुयाद्विष्णुगायत्र्याचैत्रादीनांनिबोधय ॥ १६ ॥ पौ-
रुषेयेणमंत्रेणजुहुयादनलेशुभे ॥ पंचामृतंपायसंचअपूपंघृतपाचितं ॥ १७ ॥
एवंक्रमेणद्रव्याणिप्रतिमास्तुनिबोधय ॥ ताम्रींतुप्रथमेदद्याल्लक्ष्मीनारायण-
स्यच ॥ १८ ॥ सौवर्णींमध्यमेदद्यात्कृष्णस्यपरमात्मनः ॥ राजतीमंतिमेदद्या-
द्वराहस्यमहात्मनः ॥ १९ ॥ ब्राह्मणान्भोजयेत्पश्चान्नामभिःकेशवादिभिः ॥
वस्त्रयुग्मैरलंकारैर्यथावित्तानुसारतः ॥ २० ॥ अर्चयित्वाततोदद्यादपूपान्घृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तपाचितान् ॥ उपायनानिविप्रेभ्योद्वादशभ्योनिवेदयेत् ॥ २१ ॥ आचार्यायततोदद्यात्प्रतिमांपूर्वकल्पितां ॥ शय्यांसंकल्पितांपूर्वंसर्वालंकारभूषितां ॥ २२ ॥ तस्यामभ्यर्च्यविधिवल्लक्ष्मीनारायणंपरं ॥ कांस्यपात्रेणसहितामपूपैर्बहुभिस्तथा ॥ २३ ॥ वस्त्रालंकारसहितांदक्षिणाभिस्तथैवच ॥ ब्राह्मणायविशिष्टायवैष्णवायकुटुंबिने ॥ २४ ॥ प्रदद्याद्विधिवत्पूज्यब्राह्मणांश्चापि भोजयेत् ॥ लक्ष्म्यात्वशून्यंशयनंयथातवजनार्दन ॥ २५ ॥ शय्याममाप्यशून्यास्याद्दानेनानेनकेशव ॥ एवंसंप्राथ्र्यदेवेशंस्वयंभोजनमाचरेत् ॥ २६ ॥ पुरुषोवासतीवापिविधवावासमाचरेत् ॥ अशून्यशयनार्थंचकर्तव्यंव्रतमुत्तमं ॥ २७ ॥ एवंतवमयाख्यातंविस्तरान्नृपसत्तम ॥ सुप्रसन्नेजगन्नाथेभवेयुर्विवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धाःशुभाः ॥ २८ ॥ तस्मिंस्तुष्टेतुदेवेशेदेवानामपिदुर्लभाः ॥ तस्मात्सर्वप्रय-
त्नेनव्रतमेतत्समाचरेत् ॥ २९ ॥ अवश्यंगंतुकामस्तुतद्विष्णोःपरमंपदं ॥ ए-
वमुक्तंमयासर्वंकिमन्यच्छ्रोतुमिच्छसि ॥ ३० ॥ इत्युक्तस्तेनराजर्षिःपुनरप्या-
हतंमुनिं ॥ वैशाखेछत्रदानस्यमाहात्म्यंविस्तराद्वद ॥ ३१ ॥ शृण्वतोऽपिन
तृप्तिर्मेवैशाखोक्तान्शुभावहान् ॥ इतितद्वचनंश्रुत्वायशस्यंपुण्यवर्धनं ॥ ३२ ॥
प्रत्युवाचमहाभागःश्रुतदेवोमहायशाः ॥ श्रुतदेवउवाच ॥ वैशाखेघर्मतप्ता-
नांमानवानांमहात्मनां ॥३३॥ येकुर्वंत्यातपत्राणंतेषांपुण्यमनंतकं ॥ अत्रैवोदा-
हरंतीममितिहासंपुरातनं ॥३४॥ वैशाखधर्ममुद्दिश्यपुराकृतयुगेकृतं ॥ वंगदेशे
पुराकश्चिद्धेमकांतइतिश्रुतः ॥३५॥ कुशकेतोःसुतोधीमान्राजाशस्त्रभृतांवरः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकदामृगयासक्तोगहनंवनमाविशत् ॥ ३६ ॥ तत्रनानाविधान्हत्वामृगान्[१]क्रो-
डादिकान्बहून् ॥ श्रांतोमध्याह्नवेलायांमुनीनामाश्रमंययौ ॥ ३७ ॥ तदाशत-
चिंनोनामऋषयःशंसितव्रताः ॥ समाधिस्थानजानंतिबाह्यकृत्यंतुकिंचन ॥ ३८ ॥
तान्दृष्ट्वानिश्चलान्विप्रान्क्रुद्धोहंतुंमनोदधे ॥ भूपंनिवारयामास[२]शिष्याणामयु-
तंतदा ॥ ३९ ॥ दुर्बुद्धेशृणुनोवाक्यंगुरवस्तुसमाधिगाः ॥ नोजानंतिबहिःकृ-
त्यंतस्मात्क्रोद्धुंनचार्हसि ॥ ४० ॥ ततःशिष्यानुवाचेदंवचनंक्रोधविह्वलः ॥
यूयंकुरुध्वमातिथ्यमध्वश्रांतस्यमेद्विजाः ॥ ४१ ॥ एवमुक्ताश्चभूपेनशिष्या-
ऊचुस्तदानृप ॥ नाज्ञप्तागुरुभिर्भूपवयंभिक्षाशिनःकथं ॥ ४२ ॥ गुरुतंत्राः

१ पशून् २ । गुर्वधीनाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वतःकर्तुमातिथ्यंनवयंक्षमाः[1] ॥ प्रत्याख्यातो[2]नृपःशिष्यैस्तान्हंतुंधनुराददे ॥ ४३ ॥ मृगदस्युभयादिभ्योवहुधारक्षितामया ॥ तेमामेवोपजीवंतोमयादत्त-प्रतिग्रहाः ॥ ४४ ॥ एतेमांनविजानंतिकृतघ्नाभूरिमानिनः ॥ घ्नतोऽपिमेन दोषःस्यादेतान्खल्वाततायिनः ॥ ४५ ॥ एवंविकत्थमानःसन्शरान्मुंचन्श-रासनात् ॥ तान्विद्रुं[3]ताननुद्रुत्यजघ्नेशिष्यशतत्रयं ॥ ४६ ॥ दुद्रुवुर्भयतः सर्वेविहायाश्रममंजसा[4] ॥ विद्रावितेषुशिष्येषुबलादाश्रमसंस्थितान् ॥ ४७ ॥ संभारान्जगृहुःशीघ्रंसैनिकाःपापबुद्धयः ॥ यथेष्टंभोजनंचक्रुर्नृपेणैवानुमोदि-ताः ॥ ४८ ॥ ततःसेनावृतोराजापुरीमागाद्दिनात्यये ॥ कुशकेतुस्ततःश्रु-

१ समर्थाः । २ निराकृतः । ३ पलायितान् । ४ त्वरितं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वातनयस्यविचेष्टितं ॥ ४९ ॥ पुरान्निर्यापयामासगर्हयन्नात्मनःसुतं ॥ राज्यानर्हंक्षमाहीनंस्वदेशादपिभूमिप ॥ ५० ॥ पित्रात्यक्तस्ततोराजाहेमकांतोऽतिविह्वलः ॥ वनंविवेशगहनंहत्याभिश्चसुपीडितः ॥ ५१ ॥ बहुकालमवात्सीच्चगह्वरेनिर्जनेवने ॥ आहारंकल्पयामासव्याधधर्ममुपाश्रितः॥ ५२॥ नक्वापिस्थितिमापेदेहत्यया़ऽभिद्रुतोभ्रमन् ॥ अष्टाशीतिस्तुवर्षाणिगतान्यस्य दुरात्मनः ॥ ५३ ॥ तीर्थयात्राप्रसंगेनत्रितोनाममहामुनिः ॥ तस्मिन्नरण्येवैशाखेरवौमध्यंदिनंगते ॥ ५४ ॥ गच्छन्नातपविक्रांतस्तृषयाचातिपीडितः ॥ क्वचिद्वृक्षविहीनेतुप्रदेशेमूर्छितोऽपतत् ॥ ५५ ॥ दैवाद्दृष्टाहेमकांतस्त्रितंनाम

For Private and Personal Use Only

महामुनिं ॥ तृषार्तंमूर्छितंश्रांतंकृपांचक्रेनृपाधमः ॥ ५६ ॥ ब्रह्मपत्रैस्तुसं-
वीज्यकृत्वाचातपवारणं ॥ मुनेर्जग्राहशिरसिह्यलाबुस्थंजलंददौ ॥ ५७ ॥
लब्धसंज्ञोऽभवत्तेनसूपचारेणवैमुनिः ॥ ततश्छत्रंक्षत्रदत्तंगृहीत्वागतविक्लमः
॥ ५८ ॥ ग्रामंकंचिच्छनैःप्राप्यकिंचिदाप्यायितेंद्रियः ॥ तेनपुण्यप्रभावेण
ब्रह्महत्याशतत्रयं ॥ ५९ ॥ विनष्टमभवत्तस्यक्षणादेवमहात्मनः ॥ ततोवि-
स्मयमापन्नोहेमकांतोमहारथः ॥ ६० ॥ बहुधापीड्यमानस्यब्रह्महत्याइमाःक-
थं ॥ केनाप्यनिष्कृताह्येताःक्वगताःकेनहेतुना ॥ ६१ ॥ इत्येवंचिंतयामासब्र-
ह्महत्याविमोचनं ॥ एवंचावास्थितेराज्ञियमदूताअथागमन् ॥ ६२ ॥ नेतुमे-

१ पलाशपत्रैः । २ तुंबीफलस्थितं । ३ गतमूर्छः । ४ सुखितगात्रः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंमहात्मानंहेमकांतंवनेस्थितं ॥ ग्रहंणींजनयामासुःप्राणान्हर्तुंमहात्मनः ॥ ६३ ॥ तयाप्राणवियोगार्तःपुरुषांस्त्रीन्ददर्शह ॥ यमदूतान्महाघोरानूर्ध्वकेशान्भयंकरान् ॥ ६४ ॥ चिंतयानःस्वकर्माणितूष्णीमासीत्तदानृप ॥ छत्रदानप्रभावेणजाताविष्णुस्मृतिर्नृप ॥ ६५ ॥ तेनस्मृतोमहाविष्णुर्विष्वक्सेनंस्वमंत्रिणं ॥ उवाचतूर्णंगच्छत्वंयमदूतान्निवारय ॥ ६६ ॥ वैशाखधर्मनिरतंहेमकांतंतुपालय ॥ निष्पापमेनंमद्भक्तंपित्रेदेहिपुरींगतः ॥६७॥ मदीरितेनवाक्येनकुशकेतुंचबोधय ॥ सर्वधर्मोज्झितोवापिब्रह्मचर्यादिवर्जितः ॥ ६८ ॥ वैशाखधर्मनिरतोमत्प्रियःस्यान्नसंशयः ॥ कृतागोअपित्वत्पुत्रोमुनित्राणपरा-

१ रोगविं० संग्रहणीति लोके । २ कृतापराधः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यणः ॥ ६९ ॥ वैशाखेछत्रदानेनानिष्पापोनात्रसंशयः ॥ तेनपुण्यप्रभावेण शांतोदांत[1]श्चिरायुषः ॥ ७० ॥ शौर्यौदार्यगुणोपेतस्त्वत्समोऽयंगुणैरपि ॥ तस्मादेनंराज्यभारेसंस्थापयमहावलं ॥ ७१ ॥ विष्णुनैवंसमाज्ञप्तमित्यादिश्यनृपोत्तमं ॥ पितुर्व[2]शेहेमकांतंस्थाप्यायाहिचमांपुनः ॥ ७२ ॥ इत्यादिष्टो भगवताविष्वक्सेनोमहाबलः ॥ हेमकांतंसमासाद्ययमदूतान्निवार्यच ॥ ७३ ॥ पाणिनाशं[3]तमेनैवपस्पर्शांगेषुभूमिपं ॥ भगवद्भक्तसंस्पर्शाद्गतव्याधिःक्षणादभूत् ॥ ७४ ॥ विष्वक्सेनस्ततस्तेनसहतस्यपुरींययौ ॥ तंदृष्ट्वाविस्मयाविष्टः कुशकेतुर्महाप्रभुः ॥ ७५ ॥ ननामशिरसाभक्त्यादंडवत्पतितोभुवि ॥ गृहंप्रवे-

१ संयमी । २ अधीनत्वे । ३ कल्याणकरेण ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शयामासपार्षदंपरमात्मनः ॥ ७६ ॥ स्तुत्वाचविविधैःस्तोत्रैःपूजयामासवैभ-
वैः॥तस्मैप्रीतमनाःप्राहविष्वक्सेनोमहाबलः ॥ ७७ ॥हेमकांतंसमुद्दिश्ययदु-
क्तंविष्णुनापुरा ॥ तच्छ्रुत्वाकुशकेतुश्चपुत्रंराज्येनिवेश्यच ॥ ७८ ॥ विष्वक्-
सेनाभ्यनुज्ञातःसभार्योवनमाविशत् ॥ विष्वक्सेनोहेमकांतमनुमंत्र्याभिपू-
जितः ॥ ७९ ॥ श्वेतद्वीपंययौधीमान्विष्णुपार्श्वेमहामनाः ॥ हेमकांतस्ततोरा-
जावैशाखोक्तान्शुभावहान् ॥ ८० ॥ विष्णुप्रीतिकरान्धर्मान्प्रतिवर्षंचकारह ॥
ब्रह्मण्योधर्ममार्गस्थःशांतोदांतोजितेंद्रियः ॥ ८१ ॥ दयालुःसर्वभूतेषुसर्व-
यज्ञेषुदीक्षितः ॥ प्रवृद्धःसर्वसंपद्भिःपुत्रपौत्रादिभिर्वृतः ॥ ८२ ॥ भुक्त्वाभो-
न्गासमस्तांश्चविष्णुलोकमवाप्तवान् ॥ नेक्षेतुवैशाखसमांश्चधर्मान्सुखप्रय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्नान्बहुपुण्यहेतून् ॥ पापेंधनौघाग्निनिभान्सुलभ्यान् धर्मादिमोक्षांतपुमर्थहेतून्
॥ ८३ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीपसंवादेछत्रदानप्रशंसनं
नामदशमोऽध्यायः ॥ १० ॥ ॥ ॥ ॥ छ ॥ छ ॥
॥ मैथिलउवाच ॥ वैशाखधर्माःसुलभाःपुण्यराशिविधायकाः ॥ विष्णुप्रीति-
कराःसद्यःपुमर्थानांचहेतवः ॥ १ ॥ नप्रख्याताःकथंलोकेशाश्वताःश्रुतिचोदि-
ताः ॥ प्रख्याताराजसाधर्मास्तामसाअपिभूरिशः ॥ २ ॥ दुर्घटाबहुयत्नाश्च
बहुद्रव्यव्ययावहाः ॥ केचिन्माघंप्रशंसंतिचातुर्मास्यान्परेजगुः ॥ ३ ॥ व्यती-
पातादिधर्मांश्चवर्णयंतीहभूरिशः ॥ एतद्विवेकंविस्तार्यश्रोतुकामायमेवद ॥ ४ ॥
श्रुतदेवउवाच ॥ शृणुभूपप्रवक्ष्यामिनप्रख्याताइमेकथं ॥ इतरेषांचधर्माणांक-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थंख्यातिश्चभूतले ॥ ५ ॥ राजसास्तामसाभूमौबहवःकामुकाजनाः ॥ इच्छं-
त्यैहिकभोगांस्तेपुत्रपौत्रांश्चसंपदः ॥ ६ ॥ क्वचित्कथंचनक्वापिजनेष्वेकोऽति-
कृच्छ्रतः ॥ स्वर्गाययततेलोकेतस्माद्यज्ञादिसत्क्रियाः ॥ ७ ॥ कुरुतेऽतिप्रयत्ने-
नमोक्षंनोपासतेनरः ॥ क्षुद्राशाभूरिकर्माणोजनाःकाम्यानुपासते ॥ ८ ॥ प्र-
ख्याताराजसाधर्मास्तामसाअपितेनवै ॥ नख्याताःसात्विकाधर्माहरिप्रीतिक-
राइमे॥ ९ ॥ निष्कामिकाइमेधर्माऐहिकामुष्मिकप्रदाः ॥नजानंतिजनामूढामो-
हितादेवमायया ॥ १० ॥ यथाधिपत्येसंप्राप्तेसर्वःसिद्धमनोरथः ॥ मेहनार्थस्थ-
लंप्राप्तुमाधिपत्यंनहीष्यते ॥ ११ ॥ कारणंचप्रवक्ष्यामिगोपनेभूतलेंऽजसा ॥
यद्वैशाखोक्तधर्माणांसात्विकानांनृणामिह ॥ १२ ॥ सार्वभौमःपुराकश्चिदि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्ष्वाकुकुलभूषणः ॥ कीर्तिमानितिविख्यातोनृगपुत्रोमहायशाः ॥ १३ ॥ जितेंद्रियोजितक्रोधोब्रह्मण्योराजसत्तमः ॥ एकदामृगयासक्तोवसिष्ठाश्रममाययौ ॥ १४ ॥ गच्छन्मार्गेददर्शासौवैशाखेघर्मनिष्ठुरे ॥ भूयोभूयःकार्यमाणान्शिष्यैस्तस्यमहात्मनः ॥ १५ ॥ क्वचित्प्रपांप्रकुर्वंतिछायामंडपमेवच ॥ तटप्रपातंनिःसार्यवापींकुर्वंतिनिर्मलां ॥ १६ ॥ सूपविष्टान्क्वचिद्वृक्षेव्यजनैर्वीजजयंतिच ॥ क्वचिद्ददुहींक्षुदंडान्क्वचिद्गंधान्क्वचित्फलं ॥ १७ ॥ मध्याह्नेछत्रदानंतुसायाह्नेपानकस्यच ॥ क्वचिद्यच्छंतितांबूलंनेत्रेकर्पूरलेपनं ॥ १८ ॥ सुच्छायेचवनेकेचित्सुसंमृष्टांगणेशुभे ॥ केचिदास्तरयंत्यद्वावालुकानिहितानि च ॥ १९ ॥ कुर्वंत्यांदोलिकांराजन्वृक्षशाखावलंबिनीं ॥ केयूयमितिपप्र-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्छवसिष्ठाइतितेऽब्रुवन् ॥ २० ॥ किमेतदितिपप्रच्छधर्मावैशाखचोदिताः ॥
सद्धर्मतेतवइमंक्रियंतेऽस्माभिरंजसा ॥ २१ ॥ वसिष्ठस्याज्ञयाचेतितेऽब्रुवन्नृ-
पपुंगवं ॥ एतदाचरणेपुंसांकिंफलंकश्चतुष्यति ॥ २२ ॥ एतद्विस्तार्यमेब्रूत
यूयंसम्यग्यथाश्रुतं ॥ इतिराज्ञातुसंपृष्टाःप्रत्यूचुस्तेमहीपतिं ॥ २३ ॥ गुरो-
राज्ञाक्रमेणैवकुर्वतांपथिसत्क्रियाः ॥ नास्माकमवकाशोऽत्रगुरुंपृच्छयथेप्सितं
॥ २४ ॥ सवेत्तितत्वतोनूनंधर्मानेतान्महायशाः ॥ इतिशिष्यैर्वसिष्ठस्यप्रत्यु-
क्तस्तुययौद्रुतं ॥२५॥ वसिष्ठस्याश्रमंपुण्यंविद्यावोषोपबृंहितं ॥ समायांतंनृ-
पंवीक्ष्यवासिष्ठःप्रीतमानसः ॥ २६ ॥ आतिथ्यंविधिवच्चक्रेसानुगस्यमहात्म-
नः ॥ सूपविष्टःकृतातिथ्यस्ततःपप्रच्छतंगुरुं ॥ २७ ॥ ॥ राजोवाच ॥ मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गेदृष्टंमहाश्चर्यत्वच्छिष्यैस्तुकृतंशुभं ॥ मयापृष्टंचतैर्नोक्तंक्रियमाणंशुभावहं ॥ २८ ॥ नास्माकमवकाशोऽत्रह्येतद्धर्मप्रशंसने ॥ कर्तव्याचाक्रियाऽस्माभिर्गुरुणायाचचोदिता ।२९ ॥ गुरुंपृच्छेतितैरुक्तआगतोऽहंतवांतिकं ॥ मृगयासक्तचित्तेनश्रांतेनातिथ्यमिच्छता॥३०॥दृष्टंमार्गेत्विदंपुण्यंतवाशिष्यैश्चकारितं ॥ जिज्ञासासीत्ततश्रोतुंधर्मानेतान्मुनीश्वर ॥ ३१ ॥ त्वमादरादिमान्धर्मान्समाचरसिवैयत ॥ तान्धर्मान्श्रोतुकामायशिष्यायप्रणतायच ॥ ३२ ॥ श्रद्दधानायमेब्रूहिविस्तरान्मुनिपुंगव ॥ इतीक्ष्वाकुकुलीनेनराज्ञापृष्टोमहायशाः ॥ ३३ ॥ मनःसातोषमापेदेसम्यक्पृष्टोऽधुनाऽमुना ॥ अहोव्यवसितावुद्धीराजंस्तेऽद्यसुशिक्षिता ॥ ३४ ॥ यस्माद्विष्णुकथायांचतद्धर्माचरणेऽपिच ॥ म-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिरात्यंतिवजातासुकृतंफलितंतव ॥ ३५ ॥ इतिसंभाष्यतंशिष्यंजातहर्ष-
स्तमब्रवीत् शृणुभूपप्रवक्ष्यामियत्पृष्टोऽहंत्वयाऽधुना ॥ ३६ ॥ यस्यश्रवण-
मात्रेणमुच्यतेसर्वकिल्बिषैः ॥ सर्वधर्मान्परित्यज्यवर्ततेऽविषयात्मकः ॥ ३७ ॥
वैशाखस्नानर्निरतःसप्रियोमधुविद्विषः ॥ सांगान्धर्माननुष्ठायवैशाखोयेननाः-
दृतः ॥ ३८ ॥ स्नानदानार्चनैःपुण्यैस्तस्यदूरतरोहरिः ॥ अस्नात्वाचाप्यद-
त्वाचवैशाखोयेननीयते ॥ ३९ ॥ कर्मणासतुचांडालोनात्रकार्याविचारणा ॥
वैशाखोक्तैर्महाधर्मैर्येनचाराधितोहरिः ॥ ४० ॥ तैश्चतोषंसमायातिप्रददाति
समीहितं ॥ लक्ष्मीभर्ताजगन्नाथोह्यशेषाघौघनाशनः ॥ ४१ ॥ धर्मैःसूक्ष्मै-
श्चप्रीणातिनप्रयासैर्धनैरपि ॥ भक्त्यासंपूजितोविष्णुःप्रददातिसमीहितं ॥ ४२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्माद्राजन्सदाभक्तिःकर्तव्यामधुविद्विषि ॥ जलेनापिजगन्नाथःपूजितःक्लेश-
हाहरिः ॥ ४३ ॥ परितोषंव्रजत्याशुतृषार्तःसलिलैर्यथा ॥ महदप्यल्पदंकर्म
तथालघ्वपिभूरिदं ॥ ४४॥ कर्मणोभूरिहेतुत्वेनहेतूमहदल्पके ॥ किंतुकर्मस्व-
रूपंचगहनाकर्मणोगतिः ॥ ४५॥ वैशाखोक्ताइमेधर्माःस्वल्पायासकृताअपि॥
बहुद्रव्यविहीनाश्चविष्णोःप्रीतिकराःशुभाः ॥ ४६ ॥ तस्मात्त्वमपिभूपालवै-
शाखोक्तंसमाचर ॥ त्वद्राष्ट्रीयैर्जनैःसर्वैःकारयेमान्शुभावहान् ॥ ४७ ॥ नक-
रोतिचयोधर्मान्वैशाखोक्तान्नराधमः ॥ बहुधाशिक्ष्यमाणोऽपिसदंडयस्तवभूपते
॥४८॥ इत्यावश्यकतांसम्यक्शास्त्रैर्व्युत्पाद्यतस्यच॥पश्चाद्वैशाखनिर्दिष्टान्धर्मा-
न्प्रोवाचसर्वशः ॥ ४९ ॥श्रुत्वातान्सकलान्धर्मान्गुरुंसंपूज्यभक्तितः ॥सराजा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहमापन्नःसर्वान्धर्मांश्चकारह ॥ ५० ॥ भक्तिमान्केशवेराजादेवदेवेनिरंजने[1] ॥ नान्यंपश्यतिदेवेशात्पद्मनाभान्महीपतिः ॥ ५१ ॥ भेरीमुद्घाद्यमातंगे[2]स्व-राष्ट्रेऽघोषयद्भटैः ॥ अष्टवर्षाधिकोमर्त्योह्यशीतिर्नहिपूर्यते ॥ ५२ ॥ प्रातर्न स्नातिमेषस्थेसूर्येसर्वोऽपियोनरः ॥ समेदंड्यश्चवध्यश्चनिर्वास्यो[3]विषयाद्[4]ध्रुवं ॥५३ ॥ पितावायदिवापुत्रोभार्यावाथसुहज्जनः ॥ वैशाखधर्महीनिस्तुनिग्राह्यो दस्युवन्मया ॥ ५४ ॥ ददध्वंविप्रमुख्येभ्यःस्नात्वाप्रातर्जलेशुभे ॥ प्रपादाना-दिधर्मांश्चकुरुध्वंशक्तितोऽनघाः ॥ ५५ ॥ विप्रंचधर्मवक्तारंग्रामेग्रामेन्यवेश-यत् ॥ पंचानामेवग्रामाणामकरोदधिकारिणं ॥ ५६ ॥ दंडार्थत्यक्तधर्माणां

१ निर्विकारे । २ गजे । ३ निष्कासनीयः । ४ देशात् । ५ दंड्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दशवाजिनिषेवितं ॥ एवंप्रघुष्टेसर्वत्रसार्वभौमस्यशासनात् ॥ ५७ ॥ प्रवृ-
द्धोधर्मवृक्षोऽयंसर्वदेशेषुविस्तरात् ॥ येकेचिन्निधनंयांतिभूपालविषयेनराः ॥
॥ ५८ ॥ प्रमादाद्वानृपश्रेष्ठतेयांतिहरिमंदिरं ॥ अवश्यंवैष्णवोलोकःप्राप्य-
तेमानवैर्द्रुतं ॥ ५९ ॥ व्याजेनापिसकृत्स्नातःप्रातर्मेषगतेरवौ ॥ सर्वपापवि-
निर्मुक्तोयातिविष्णोःपरंपदं ॥ ६० ॥ नप्राप्नोतियमंधर्मंकृद्वैशाखस्नानतः ॥
वैलेख्यमगमद्राजारविसूनुस्तदानृप ॥ ६१ ॥ लेख्यकर्मणिविश्रांतश्चित्रगु-
प्तोऽभवत्तदा ॥ मार्जितानिचलेख्यानिपुरापापोद्भवानिच ॥ ६२ ॥ गच्छद्भि-
र्वैष्णवंलोकंस्वकर्मस्थैर्जनैःक्षणात् ॥ शून्यास्तुनरकाःसर्वेपापिप्राणिविवर्जि-
ताः ॥ ६३ ॥ भग्नयानोऽभवन्मार्गोवैशाखस्यप्रभावतः ॥ सर्वोऽपिविमला-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारोजनोयातिहरेःपदं ॥ ६४ ॥ दिवौकसांतुयेलोकाःशून्याःसर्वेतथाऽभवन् ॥ शून्येत्रिविष्टपेजातेशून्येषुनरकेषुच ॥ ६५ ॥ नारदोधर्मराजानंगत्वाचेद-मुवाचह ॥ नाक्रंदःश्रूयतेराजन्प्राक्श्रुतोनरकेयथा ॥६६ ॥ तथानक्रियतेले-ख्यांकिंचिद्दुष्कृतकर्मणि॥चित्रगुप्तोमुनिरिवस्थितोऽयंमौनमास्थितः॥६७॥ का-रणंब्रूहिराजेंद्रनायांतितवमंदिरं ॥ मनुष्याःपापकर्माणोमायादंभविवर्धिताः ॥ ६८ ॥ एवमुक्तेतुवचनेनारदेनमहात्मना ॥ प्राहवैवस्वतोराजाकिंचिद्दैन्य-समन्वितः ॥ ६९ ॥ योऽयंनारदभूपालःपृथिव्यांसांप्रतंस्थितः ॥ सोऽतिभ-क्तोहृषीकेशेपुराणपुरुषोत्तमे ॥ ७० ॥ प्रबोधयतिवैशाखधर्मभेरीस्वनेनवै ॥ अष्टवर्षाधिकोमर्त्योह्यशीतिर्नहिपूर्यते ॥ ७१ ॥ योवैह्यकृतवैशाखःसमदंड्यो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नसंशयः ॥ तद्भयाद्विजनाःसर्वैनोल्लंघंतिकदाचन ॥ ७२ ॥ गच्छंतिवैष्णवं धामकर्मणानेननारद ॥ वैशाखसेवनाल्लोकायास्यंतिहरिमंदिरं ॥ ७३ ॥ ते-नराज्ञामुनिश्रेष्ठमार्गोलुप्तोममाधुना ॥ कृताहिनरकाःशून्यालोकाश्चापिदि-वौकसां ॥ ७४ ॥ विश्रांतोलेखकोलेख्याल्लिखितंमार्जितंजनैः ॥ वैशाखमा-सधर्मस्यमाहात्म्यंत्वीदृशंमुने ॥ ७५ ॥ ब्रह्महत्यादिपापानिनभुक्तानिजनैर्द्वि-ज ॥ कृत्वावैशाखकृत्यानियांतिविष्णोःपरंपदं ॥ ७६ ॥ सोऽहंकाष्ठसमोजा-तोनकश्चिन्ममगोचरः ॥ युद्धंकृत्वातुतंहन्मिसर्वथाऽद्यमहाबलं ॥ ७७ ॥ अ-कृत्वास्वामिकार्यंतुनिर्व्यापारोयदिस्थितः ॥ तस्यवित्तंसमश्नातिसयातिनरकं ध्रुवं ॥ ७८ ॥ यदिदैवादवध्योऽयंतदाब्रह्माणमेत्यच ॥ निवेद्यतस्मैतत्सर्वंप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्वात्स्वस्थोभवाम्यहं॥७९॥इत्युक्त्वाद्विजमामंत्र्यसानुगःप्रययौभुवं॥सकालोम-
हिषारूढोदंडमुद्यम्यभीषणं ॥ ८० ॥ मृत्युरोगज्वराद्यैश्चपार्षदैश्चमहोत्कटैः ॥
पंचाशत्कोटिसंख्याकैर्यमदूतेश्वरैर्वृतः ॥८१ ॥ सतूर्णतस्यराजर्षेरुरोधसकलां
पुरीं ॥ शंखंदध्मौमहाघोषंसर्वलोकभयंकरं ॥ ८२ ॥ तच्छ्रुत्वासतुराजर्षि-
र्ज्ञात्वावैवस्वतंयमं ॥ ससज्जीकृतसर्वस्वःपत्तनान्निर्ययौरुषा ॥८३॥ तयो-
र्युद्धमभूत्तत्रभीषणंरोमहर्षणं ॥ मृत्युंकालंतथारोगंयमदूतपतींस्तथा ॥ ८४ ॥
जित्वाक्षणेनराजर्षिर्द्रावयामासदूरतः॥ततःक्रुद्धोयमोराजास्वयमभ्येत्यसंरुषा
॥ ८५ ॥ युयुधेवहुभिर्वाणैःसिंहनादंचकारच ॥ चकर्तराजातस्यापिकार्मुकं

१ पलायनं कारयामास । २ चिच्छेद ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशिखैस्त्रिभिः ॥ ८६ ॥ पुनश्चर्मासिमादाययमोहंतुमथागमत् ॥ तंदृष्ट्वा तुनृपःक्रुद्धःपुनश्छित्त्वाऽसिचर्मणी ॥ ८७ ॥ निचखानललाटेचशरंकालोरगप्रभं ॥ यमस्तेनाहतःक्रुद्धस्ततोदंडमुपाददे ॥ ८८ ॥ ब्रह्मास्त्रेणचसंमंत्र्यदंडं तस्मैमुमोचह ॥ हाहाकारोमहानासीज्जनानांपश्यतांतदा ॥ ८९ ॥ तदाविष्णुःस्वभक्तस्यरक्षायैप्राहिणोदरिं ॥ विष्णुमुक्तंतदाचक्रंशीघ्रमागत्यतद्रणे ॥ ९० ॥ यमदंडेनसंयुध्यतद्ब्रह्मास्त्रंनिवार्यच ॥ यमंहंतुमथारेभेसहस्रारंमहाद्भुतं ॥ ९१ ॥ देवभक्तस्ततोभीतस्तदाऽस्तौच्चक्रमंजसा ॥ सहस्रारनमस्तेस्तुविष्णुपाणिविभूषण ॥ ९२ ॥ त्वंसर्वलोकरक्षायैहरिणाचधृतंपुरा ॥ त्वांया-

१ ढाल इति लोके । २ कृष्णसर्पतुल्यवर्णो । ३ चक्रं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेऽद्ययमंत्रातुंविष्णुभक्तंमहाबलं ॥९३॥ नृणांदेवद्रुहांकालस्त्वमवेहिनचापरः॥
तस्मादेनंयमंरक्षकृपांकुरुजगत्पते ॥ ९४ ॥ नृपेणैवंस्तुतंचक्रंयमंहित्वा नृ-
पांतिकं ॥ पुनर्ययौमहाराजदेवानांपश्यतांदिवि॥९५॥ ततोयमोऽतिनिर्विघ्नो
ब्रह्मणःसदनंययौ॥सददर्शसमासीनंमूर्तामूर्तजनैर्वृतं ॥९६॥ सर्वाश्रयंजगद्बीजं
सर्वलोकपितामहं ॥ उपास्यमानंविबुधैर्लोकपालैर्दिगीश्वरैः ॥ ९७ ॥ इति-
हासपुराणाद्यैर्वेदैर्विग्रहसंस्थितैः ॥ मूर्तिमद्भिःसमुद्रैश्चनदीभिश्चसरोवरैः॥९८॥
देहवद्भिस्तथावृक्षैरश्वत्थाद्यैरशेषतः ॥ वापीकूपतडागैश्चमूर्तिमद्भिश्चपर्वतैः
॥ ९९ ॥ अहोरात्रैस्तथापक्षैर्मासैःसंवत्सरैस्तथा ॥ कलाकाष्ठानिमेषैश्चऋ-

१ देहधारिभिः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुभिश्चायनैर्युगैः ॥ १०० ॥ संकल्पैश्चविकल्पैश्चनिमेषोन्मेषणैस्तथा ॥ ऋ-
क्षैर्योगैश्चकरणैःपौर्णमासींदुसंक्षयैः ॥ १ ॥ सुखैर्दुःखैर्भयैश्चैवलाभालाभैर्जया-
जयैः ॥ सत्वेनरजसाचैवतमसाचसमन्वितं ॥ २ ॥ शांतिमूढातिघोरैश्चविका-
रैःप्राकृतैरपि ॥ वायुनाचैवदेवेनश्लेष्मपित्तादिभिर्वृतं ॥३॥तेषांमध्येऽविशत्सौ-
रिःसव्रीडाचवधूर्यथा॥विलोकयन्धरापृष्ठंम्लानवक्त्रंव्यदर्शयत् ॥४॥ तंप्रविष्टंय-
मंदृष्ट्वासकाशस्थाःसहानुगं ॥ विस्मितास्तेमिथःप्रोचुःकिमयंभास्करिस्त्विह
॥ ५ ॥ संप्राप्तोलोककर्तारंद्रष्टुंदेवंपितामहं ॥ निर्व्यापारःक्षणमपियोऽयंना-
स्तेरवेःसुतः ॥ ६ ॥ सोऽयमभ्यागतःकस्मात्कच्चित्क्षेमंदिवौकसां ॥ आ-

१ इंदुसंक्षयो दर्शः । २ लज्जिता । ३ यमः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्चर्यातिशयोयश्चसंमार्जितपट[1]स्त्वयं ॥ ७ ॥ लेखकस्तमनुप्राप्तोदैन्येनमहता-न्वितः ॥ नकदाचित्पटोह्यस्यमार्जितोऽधर्मभीरुणा ॥ ८ ॥ यन्नदृष्टंश्रुतंवापि तदिहैवप्रपद्यते ॥ एवमुच्चरतांतेषांभूतानांभूतशासनः ॥ ९ ॥ निपपाता-ग्रतोभूमौब्रह्मणोरविनंदनः ॥ कृत्तमूलोयथाशाखीत्राहित्राहीतिवैरुदन् ॥१०॥ परिभूतोऽस्मिदेवेशसंमार्जितपटःकृतः ॥ त्वयानाथेनाविफलंपश्यामिकमला-सन ॥ ११ ॥ एवंब्रुवन्हिनिश्चेष्टोबभूवनृपसत्तम ॥ ततःकोलाहलःशब्दःस-भायांसमजायत॥१२॥योहिरोदयतेमर्त्यान्सर्वान्स्थावरजंगमान्॥सर्वैरोदितिदुः खार्तःकस्माद्दैवस्वतोयमः ॥ १३ ॥ जनसंतापकर्त्तायःसोऽचिराद्यात्यशोभनं ॥

१ संमार्जिता लिपिशून्यः पटः प्राणिनां धर्माधर्मनिर्णायको यस्य सः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नहिदुष्कृतकर्ताहिनरःप्राप्नोतिशोभनं ॥ १४ ॥ ततोनिवारयामासवायुस्ते-
षांवचस्तदा ॥ लोकानांसमवेतानांमतंज्ञात्वासवेधसः ॥ १५ ॥ निवार्यलो-
कान्मार्तंडिंशनैरुत्थापयन्मरुत् ॥ भुजाभ्यांशालपीनाभ्यांलोकसूत्रउदारधीः
॥ १६ ॥ विह्वलंतंप्रलपंतमासनेसंन्यवेशयत्॥आसनस्थमुवाचेदंयोमसूनूरवेः
सुतं ॥१७॥ केनत्वमभिभूतोऽसिकेनस्थानान्निवारितः॥केनायंमार्जितोदेवपटो
लोकपतेस्तव ॥ १८ ॥ ब्रूहिसर्वमशेषेणकुशकेतोःसुताग्रतः ॥ यःप्रभुस्तातस-
र्वेषांसतेकर्तामभापिच॥१९॥अपहरिष्यतिमार्तंडेदुःखंत्वद्धृदयसंस्थितं ॥ सएव-
मुक्तःश्वसेननसत्यमादित्यसूनुर्वचनंबभाषे॥ विलोक्यवक्त्रंकुशकेतुसूनोःसग-

१ शालो वृक्षः सइव पीवरौ ताभ्यां । २ हे यम । ३ वायुना ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वदंचेदमतीवदीनः॥१२०॥इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसं-
वादेकीर्तिमद्विजयवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ ॥ छ ॥ यमउवाच॥
शृणुमेवचनंशंभोर्लोपितोऽहंपितामह ॥ मरणादधिकंमन्येमत्पदस्यचखंडनं
॥१॥ नियोगीननियोगंहिकरोतिकमलासन ॥ प्रभोर्वित्तंसमश्नातिसभवेत्काष्ठ-
कीटकः ॥ २ ॥ योऽश्नातिलोभाद्वित्तानिप्रज्ञावांश्चमहीपते ॥ नियोगीनरकंया-
तियावत्कल्पशतत्रयं ॥ ३ ॥ निःस्पृहोनाचरेद्यस्तुनियोगंपद्मसंभव ॥ भुक्त्वा
तुनरकान्घोरान्सपुमान्वायसोभवेत् ॥ ४ ॥ आत्मकार्यपरोयस्तुस्वामिका-
र्येविलुंपति ॥ भवेद्वेश्मनिपापात्माआखुःकल्पशतत्रयं ॥ ५ ॥ नियोगी

१ भृत्यः । २ स्वाम्याज्ञप्तं कार्यं । ३ मूषकः ।

For Private and Personal Use Only

यस्तुभुक्त्वावैतिष्ठेन्नित्यंस्ववेश्मनि ॥ शक्तस्तुकार्यकरणेमार्जारोजायतेनरः ॥ ६ ॥ सोऽहंदेवतवादेशात्प्रजाधर्मेणपालये ॥ पुण्येनपुण्यकर्तारंपापंपापेनकर्मणा ॥ ७ ॥ सम्यग्विचार्यमुनिभिर्धर्मशास्त्रान्वितैःप्रभो ॥ कल्पादौवर्तमानस्ययावद्द्यदिनंमम ॥ ८ ॥ कर्तुंनियोगमेवंहित्वदीयंनैवशक्नुयां ॥ राज्ञाकीर्तिमताभग्नो नियोगस्तववैक्षितौ ॥ ९ ॥ भयादस्यजगन्नाथपृथिवीसागरांबरा ॥ वैशाखधर्मनिरतानाक्षितौवर्ततेक्वचित् ॥ १० ॥ विहायसर्वधर्मांश्चविहायपितृपूजनं ॥ विहायाग्निसपर्यांतुतीर्थयात्रादिसत्क्रियाः ॥ ११ ॥ योगसांख्यावुभौत्यक्त्वा त्यक्त्वाप्राणनिरोधनं ॥ त्यक्त्वास्वाध्यायहोमौतुकृत्वापापानिभूरिशः ॥ ॥ १२ ॥ प्रयांतिवैष्णवंलोकंकृत्वावैशाखसत्क्रियाः ॥ मनुजाःपितृभिःसार्धंत-

थेंवचपितामहैः ॥ १३ ॥ तेषामतीतपितरःपितॄणांपितरस्तथा ॥ तथामाताम-हायांतितेषांतेजनकादयः ॥ १४ ॥ तेषामपिजनेतारोजनित्रीणांहिपूर्वजाः॥ एतद्दुःखंपुनर्देवममममस्तकभेदनं ॥ १५ ॥ प्रियायाःपितरोयांतिमार्जयित्वा लिपिंमम ॥ पितॄणांबीजजोयस्तुधात्र्याकुक्षौधृतोविभो ॥ १६ ॥ यदेकेनकृतंक-र्मतदेकेनैवभुज्यते ॥ तन्निरस्यकृतंसर्वंजातस्त्वेकःकुलेतुयः ॥१७ ॥ तारयेत्ता-वुभौपक्षौषड्विंशोपर्यलंविभो ॥ प्रियायाश्चापिवैतातसर्वेवैकुक्षिसंभवाः ॥१८ ॥ तेपिसर्वेजगन्नाथयांतिविष्णोःपरंपदं ॥ नमेप्रयोजनंदेवनियोगेनेदृशेनवै ॥१९॥ वैशाखधर्मनिरतःसमांत्यक्त्वाव्रजेद्धरिं ॥त्रिःसप्तकुलमुद्धृत्यत्यक्तपापोऽतिशोभ-नः ॥ २०॥ सत्यक्त्वाममलोकंहिप्रयातिहरिमंदिरं ॥ नयज्ञैस्तादृशैस्तातगतिं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राप्नोतिमानवः॥ २१ ॥ सर्वतीर्थैर्नदानाद्यैर्नतपोभिश्चनव्रतैः॥अपिवासकलैर्ध-
मैर्युक्तोनाप्नोतितांगतिं ॥ २२ ॥ प्रयागपाताद्रणमध्यपाताद्भृगोश्चपातान्मरणा-
च्चकाश्यां ॥ नतांगतिंयांतिजनाश्चसर्वेवैशाखनिष्ठेनतुयाप्रपद्यते ॥२३॥ प्रातः
स्नात्वादेवपूजांचकृत्वाश्रुत्वाकथांमासमाहात्म्यसंज्ञां ॥ धर्मान्कृत्वाचोदितान्वै-
ष्णवांश्चसर्वैभवेद्विष्णुलोकैकनाथः ॥ २४ ॥ अप्रमाणमहंमन्येलोकंविष्णोर्जग-
त्पते ॥ योनपूर्यंतकोट्योघैःसर्वतःकुशलांछनः ॥ २५ ॥ माधवस्यतुधर्मेणसम-
स्तेनपितामह ॥ विकर्मस्थाविकर्मस्थाःशुचयोऽशुचयस्तथा ॥ २६ ॥ कृत्वावै-
शाखकृत्यानिलोकायांतिनृपाज्ञया॥अस्माकंहिमहाशत्रुर्भवतांचविशेषतः॥२७
निग्राह्योजगतांनाथभवताऽसौमहीपतिः ॥ हित्वाहिसकलान्धर्मान्सकृद्वैशाख-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नानतः ॥ २८ ॥ असंस्कृतजनोयातिवैकुंठंहरिवल्लभं ॥ अस्माभिस्तुकृता-
पेक्षोविष्णुपादैकसंश्रयः ॥ २९ ॥ समस्तंनेष्यतेलोकंपार्थिवोनात्रसंशयः ॥ ए-
षदंडःपटोऽप्येषतवपद्मांनिवेदितः ॥ ३० ॥ लोकपालत्वमतुलंमार्जितंतेनभू-
भुजा ॥ किमपत्येनजातेनमातुःक्लेशकरेणवै ॥३१॥ योनतापयतेशत्रुंज्येष्ठमासी-
वभास्करः॥ वृथासूताहियुवतिर्जाताचैवकुपुत्रिणी ॥ ३२ ॥ यस्यनस्फुरतेकी-
र्तिर्घनस्येवशतन्हदा॥ यःपितॄन्नोद्धरेत्पापाद्दियायावाधनेनवा ॥३३॥ मातुर्जठ-
रतोरोगःसप्रसूतोधरातले ॥ धर्मेचार्थेचकामेचप्रतीपोयोभवेत्सुतः ॥ ३४ ॥ मा-
तृहेत्युच्यतेसद्भिःसपुत्रःपुरुषाधमः ॥ तन्मातानृगपत्नीचलोकेविख्यातसत्क्रि-

१ विद्युत् । २ प्रतिकूलः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥३५॥ एकैवववीरसूर्लोकेविरंचेनात्रसंशयः॥ ययावैकीर्तिमान्जातोमल्लिपेर्मा-
र्जनायवै ॥ ३६ ॥ नेदंव्यवसितंदेवकेनचित्क्षात्रियेणहि ॥ पुराणेषुजगन्नाथ
नश्रुतंपटमार्जनं॥ ३७ ॥ सोहंनजानामिजगत्यधीशकृतेक्षितीशंहरितत्परं
तं ॥प्रचोदयंतंपटहंसुघोषंविलोपयानंममवेश्ममार्गे॥ ३८ ॥ ॥ब्रह्मोवाच ॥
किमाश्चर्यंत्वयादृष्टंकिमर्थंखिद्यतेभवान् ॥ सद्गुणेषुकृतस्तापःसतापोमरणां-
तिकः ॥ ३९ ॥ यस्योच्चारणमात्रेणप्राप्यतेपरमंपदं ॥ नगच्छंति
हरेर्लोकंकथंभूपस्यशासनात् ॥ ४० ॥ एकोऽपिकृष्णस्यसकृत्प्रणामःस-
मस्तयज्ञावभृथेनतुल्यः ॥ यज्ञस्यकर्तापुनरेतिजन्महरेःप्रणामीनपुनर्भवाय ॥

१ कर्तुमारब्धं । २ विना । ३ लोपयंतं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥४१॥ कुरुक्षेत्रेणकिंतस्यसरस्वत्याचकिंतथा ॥ जिह्वाग्रेवर्ततेयस्यहरिरित्य-
क्षरद्वयं ॥ ४२ ॥ ब्रह्महाश्वपचींभुंजन्विशेषेणरजस्वलां ॥ समुक्तशमलोया-
तिमरणेहरिमुच्चरन् ॥ ४३ ॥ अभक्ष्यभक्षणाज्जातंविहायाघस्यसंचयं ॥ प्रया-
तिविष्णुसायुज्यंयतोविष्णुप्रियास्मृतिः ॥ ४४ ॥ एवंविष्णुप्रियोमासोवैशा-
खोनामवैयम ॥ यद्धर्मश्रवणादेवमुच्यतेसर्वकिल्बिषैः ॥ ४५ ॥ यातीतिकि-
मुवक्तव्यंतस्यानुष्ठानतत्परः ॥ अस्माकंजगतांनाथोजनितापुरुषोत्तमः ॥
॥ ४६ ॥ तस्येष्टान्माधवेमासिधर्मानेतान्करोतियः ॥ तस्यविष्णुःप्रसन्नात्मा
सहायेसर्वदास्थितः ॥ ४७ ॥ नतस्यभूपतेःसौरेप्रभवामोहिशिक्षणे ॥ नवा-

१ चांडालीं । २ शमलं पापं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुदेवभक्तानामशुभंविद्यतेक्कचित् ॥ ४८ ॥ जन्ममृत्युजराऽव्याधिभयंवाप्युपजा-
यते ॥ नियोगीस्वामिकार्यंतुयावच्छक्तिसमीहते ॥ ४९ ॥ तावतासकृतार्थः
स्यान्नरकान्नैवगच्छति ॥ कार्येचशक्त्यातिक्रांतेस्वामिनेचनिवेदयेत् ॥ ५० ॥
अनृणस्तावताभृत्योनियोगीसुखमश्नुते ॥ तस्मान्निवेदितार्थस्यनानृतंनचपा-
तकं ॥ ५१ ॥ यत्नेकृतेस्वकर्तव्येनापराधोऽस्तिदेहिनः ॥ तस्मादशक्यकार्येऽ
स्मिन्नैवशोचितुमर्हसि ॥ ५२ ॥ इत्युक्तोब्रह्मणासौरिःपुनरत्यंतखिन्नधीः ॥
उवाचदीनयावाचागलद्बाष्पाकुलेक्षणः ॥ ५३ ॥ प्राप्तंतातमयासर्वंत्वदंघ्रि-
भजनेनवै ॥ नाहंयास्येपुनःकर्तुंनियोगंपद्मसंभव ॥ ५४ ॥ प्रशास्तिमहावी-
र्येभूपेऽस्मिन्भूमिमंडलं ॥ चालयित्वास्वधर्माच्चतमेकंभूपतिंकुरु ॥५५॥ कृतकृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्योऽस्मितनयोगयायांपिंडदोयथा ॥ कृपालोतदिदंकार्यंसाधयस्वममाऽव्ययं ॥५६॥ विज्वरस्तुततोभूयःशासनंतेकरोम्यहं ॥ श्रुत्वाब्रह्मायमेनोक्तंपुनश्चिं-तापरायणः ॥ ५७ ॥ अवाङ्मुखंयमंप्राहसांत्वयन्बहुधाप्ययं ॥ ॥ ब्रह्मो-वाच ॥ ॥ ननिग्राह्योमयाराजाविष्णुधर्मपरायणः ॥ ५८ ॥ यदिच्छलयसे कोपाद्गच्छामोद्यंतिकंहरेः ॥ निवेद्यसकलंतस्मैकुर्मःपश्चात्तदीरितं ॥ ५९ ॥ सएवकर्तालोकस्यधर्मस्यपरिपालकः ॥ सचदंडधरोऽस्माकंशास्ताकर्तानि-यामकः ॥ ६० ॥ नतदुक्तेस्तुप्रत्युक्तिरस्माकंविहितावृष ॥ नराजोक्तेस्तु प्रत्युक्तिर्दृश्यतेक्वापिभूतले ॥ ६१ ॥ इत्याश्वास्ययमंतेनसाकंक्षीरांबुधिंययौ ॥ ब्रह्मातुष्टावचिन्मात्रंनिर्गुणंपरमेश्वरं ॥ ६२ ॥ सांख्ययोगैरद्वितीयमेकंतंपुरु-

For Private and Personal Use Only

षोत्तमं ॥ आविरासीत्तदाविष्णुर्ब्रह्मणासंस्तुतोहरिः ॥ ६३ ॥ प्रणामंचक्रतु-
स्तस्मैयमोब्रह्माचसत्वरं ॥ तावुवाचमहाविष्णुर्मेघगंभीरयागिरा ॥ ६४ ॥
कस्माद्युवामिहायातौकिंदुःखंदनुजैरभूत् ॥ म्लानंयममुखंकस्मात्केनवानत-
कंधरः ॥ ६५ ॥ एतद्वदस्वमेब्रह्मन्नित्युक्तःप्राहकंजजः ॥ त्वद्दासवर्येभूपा-
लेभूमिंशासतिवैनराः ॥ ६६ ॥ वैशाखधर्मनिरतायांतितेपदमव्ययं ॥ त-
तोयमपुरीशून्यातेनचातीवदुःखितः ॥ ६७ ॥ तेनयुद्धंचकारासौहंतुंदंडम-
थाददे ॥ त्वच्चक्रेणपराभूतोययावद्यममांतिकं ॥ ६८ ॥ नचशक्तावयंदंडे
त्वद्भक्तानांमहात्मनां ॥ तस्मात्त्वामेवशरणंवयंप्राप्तामहाविभो ॥ ६९ ॥ त-
स्माद्रूपंदंडयित्वापालयैनंयमंस्वकं ॥ इत्युक्तःप्रहसन्प्राहब्रह्माणंयममच्युतः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७० ॥ लक्ष्मींवापिपरित्यक्ष्येप्राणान्देहमथापिवा ॥ श्रीवत्संकौस्तुभंमालां वैजयंतीमथापिवा ॥ ७१ ॥ श्वेतद्वीपंचवैकुंठंक्षीरसागरमेवच ॥ शेषंचगरुडंवापिनभक्तांस्त्यक्तुमुत्सहे ॥ ७२ ॥ विसृज्यसकलान्भोगान्मदर्थेत्यक्तजीवितान् ॥ मदात्मकान्महाभागान्कथंतांस्त्यक्तुमुत्सहे ॥ ७३ ॥ तस्मात्त्वद्दुःखशमनेह्युपायंकल्पयाम्यहं ॥ तस्यचायुर्मयादत्तमयुतंभूपतेर्भुवि ॥ ७४ ॥ गतान्यष्टौसहस्राणितत्रेदानींनरांतक ॥ आयुःशेषेतनर्नीतेमत्सायुज्यंगतेऽपिच ॥ ७५ ॥ भविष्यतिततोराजावेनोनामदुरात्मवान् ॥ तदावैशाखधर्माश्चविच्छिन्नाःस्युर्नसंशयः ॥ ७६ ॥ स्वकृतेनैवपापेनवेनोदग्धोभविष्यति ॥ पश्चादहंपृथुर्भूत्वापुनर्धर्मान्प्रवर्तये ॥ ७७ ॥ तदाजनेषुप्रख्यातान्वैशाखोक्तान्क-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रोम्यहं ॥ मद्भक्तोमद्गतप्राणोयस्तुसंन्यस्तसंग्रहः ॥ ७८ ॥ एकःसहस्त्रेभावि-
तातस्यप्रख्यातयेत्विमान् ॥ कश्चिदेवहिजानातिधर्मानेतान्क्षितौयम ॥ ७९ ॥
ततस्तेभविताकार्यमाविषादिनरांतक ॥ दापयिष्यामितेभागंमासेऽस्मिन्मा-
धवेपिच ॥ ८० ॥ नरैःसर्वैश्चवैशाखधर्मनिष्ठैर्महात्माभिः ॥ भूपेनापिचकाले
ऽस्मिन्खेदंशमयतेनच ॥ ८१ ॥ वीर्यशुल्कंतुयोभागंशत्रोर्भुंक्तेबलाधिका-
त् ॥ गृह्णन्गृह्णन्स्वकंभागंन्भागीदुःखमर्हति ॥ ८२ ॥ त्वामुद्दिश्यनकुर्वं-
तिप्रत्यहंयेनराभुवि ॥ स्नानंचार्घ्यंसोदकुंभंदध्यन्नंचांतिमेदिने ॥ ८३ ॥
वैशाखेसकलंकर्मतेषांवैविफलंभवेत् ॥ तस्मात्क्रोधंत्यजनृपेभागदेमत्परायणे ॥
॥८४॥ येकेचनापिकुर्वंतिलंकेतेभागदानराः ॥ वैशाखोक्तेमहाधर्मेतेषांविघ्नंच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माकुरु॥ ८५ ॥ मामेवयेयउत्यद्धात्वांहित्वाधर्मपालकं ॥ मदाज्ञयामहाभागते-
षांदंडंचत्वंकुरु॥८६ ॥ नृपाद्भागंदापयितुंसुनंदंप्रेषयामिच ॥ मच्छासनात्स
तंगत्वाभागंतेदापयिष्यति॥ ८७ ॥ तिष्ठत्येवंयमेस्वस्यसान्निधौगरुडासनः ॥
सुनंदंप्रेषयामासनृपंबोधयितुंविभुः ॥ ८८ ॥ सोऽपिगत्वाबोधयित्वापार्श्वेचपु-
नरागमत् ॥ इत्याश्वास्ययमंशंभुर्विष्णुरंतरधीयत॥ ८९ ॥ यमंस्वयंसांत्वयि-
त्वातमनुज्ञाप्यवैततः ॥ आतेविस्मयमापन्नोययौधामसहानुगैः॥ ९० ॥ यमोऽ-
पिस्वपुरींप्रायात्किंचित्संहृष्टमानसः ॥ पश्चाद्विष्णोर्निदेशेनसुनंदपरिभाषिताः
॥९१॥भागदाःसकलालोकायेवैशाखपरायणाः ॥ धर्मराजंसमुद्दिश्ययेनकुर्वंति
मानवाः॥ ९२॥ तेषांहिस्वयमादत्तेपुण्यंवैशाखसंभवं ॥ कुर्याच्चप्रत्यहंस्नानं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दद्यादर्घ्यंयमायवै ॥ ९३ ॥ वैशाखेसकलंपुण्यमन्यथाविफलंभवेत् ॥ सोद-
कुंभंचदध्यन्नंपौर्णमास्यांचमाधवे ॥ ९४ ॥ धर्मराजंसमुद्दिश्यदातव्यंप्रथमं
जनैः ॥ पश्चात्पितॄन्समुद्दिश्यगुरूमुद्दिश्यवैततः ॥ ९५ ॥ मधुसूदनमुद्दि-
श्यपश्चाद्देवंजनार्दनं ॥ शीतलोदकदध्यन्नंसतांबूलंसदक्षिणं ॥९६ ॥ स-
फलंकांस्यपात्रस्थंब्राह्मणायनिवेदयेत्॥ दद्याच्चप्रातिमांदिव्यांमधुसूदनदैवतां
॥ ९७ ॥ मासधर्मप्रवक्त्रेचदद्याद्विप्रायसीदते ॥ तमेवधर्मवक्तारंपूजयेद्विभ-
वैःस्वकैः ॥ ९८ ॥ इत्यादिष्टःसुनंदेनतथाराजाचकारह ॥ सनीत्वाचायुषः
शेषंभुक्त्वाभोगान्यथेप्सितान् ॥ ९९ ॥ पुत्रपौत्रादिभिर्युक्तोजगामहरिमंदि-
रं ॥ वैकुंठस्थेनृपेतस्मिन्वेनोराजाधमोऽभवत् ॥ १०० ॥ सर्वेधर्माश्चवैशाख-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्माअपिविशेषतः ॥ दुरात्मनाचतेनैवलुप्ताएतेबभूविरे ॥ १ ॥ नप्रख्याताःपुनर्भूमौभूरिशोमोक्षहेतवः ॥ यःकश्चनैवजानातिवैशाखोक्तानिमान्शुभान् ॥ २ ॥ बहुजन्मार्जितेपुण्येपरिपाकमुपागते ॥ वैशाखोक्तेषुधर्मेषुमतिरात्यंतिकीभवेत् ॥ ३ ॥ ॥ मैथिलउवाच ॥ ॥ पूर्वमन्वंतरस्थोहिवेनोराजादुरात्मवान् ॥ अयंवैवस्वतःपुत्रोराजाचेक्ष्वाकुभूपतिः ॥ ४ ॥ इतिश्रुतंमयापूर्वमिदानींतूच्यतेत्वया ॥ अयंवैकुंठगःपश्चाद्वेनोराजाभविष्यति ॥ ५ ॥ इत्येतंसंशयंछिंधिश्रुतदेवमहामते ॥ ॥ श्रुतदेवउवाच ॥ ॥ पुराणेषुचवैषम्यंयुगकल्पव्यवस्थया ॥ ६ ॥ नचाप्रामाण्यशंकातेकथायाव्यत्ययेक्कचित् ॥ गतदैनंदिनेकल्पेकथैषाशाश्वतीशुभा ॥ ७ ॥ मार्कंडेयेनमेप्रोक्ता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साचोक्तातवभूपते ॥ तस्मान्नख्यातिमायाताधर्मावैशाखसंभवाः ॥ ८ ॥ क-
श्चिदेवहिजानातिविरक्तोविष्णुतत्परः ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येना-
रदांबरीषसंवादेयमदुःखसांत्वनंनामद्वादशोऽध्यायः ॥ १२ ॥ ॥ छ ॥ ॥
॥ श्रुतदेवउवाच ॥ ॥ यःप्रातःस्नातिवैशाखेमेषसंस्थेदिवाकरे ॥ मधुसू-
दनमभ्यर्च्यकथांश्रुत्वाहरेरिमां ॥ १ ॥ सतुपापविनिर्मुक्तोयातिविष्णोः
परंपदं ॥ वाच्यमानांकथांहित्वायोऽन्यांसेवेतमूढधीः ॥ २ ॥ रौरवंनरकंप्रा-
प्यपैशाचींयोनिमाप्नुयात् ॥ अत्रैवोदाहरंतीदंचरितंपरमहंसयोः ॥ ३ ॥
पापघ्नंपावनंधर्म्यंसद्योहृद्यंपुरातनं ॥ पुरागोदावरीतीरेक्षेत्रेब्रह्मेश्वरेशुभे ॥
॥ ४॥ दुर्वासशिष्यौपरमहंसौब्रह्मैकनिष्ठितौ ॥ सत्यनिष्ठस्तपोनिष्ठइतिख्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तौजगत्त्रये ॥ ५ ॥ तयोर्मध्येसत्यनिष्ठःसदाविष्णुकथापरः ॥ श्रोतॄणामप्य-
भावेचव्याख्यातॄणांतथानृप ॥ ६ ॥ तदाकर्मकलापानिकरोत्यद्धामुनीश्वरः
॥ श्रोताचेदस्तियःकश्चित्तस्मैव्याख्यात्यहर्निशं ॥ ७ ॥ यदिव्याख्यातिकश्चि-
द्वापुण्यांविष्णुकथांशुभां ॥ तदासंकोच्यकर्माणिशृणोतिश्रवणेरतः॥ ८ ॥ अ-
तिदूरस्थतीर्थानिदेवतायतनानिच ॥ हित्वाकथाविरोधीनितथाकर्माणिभूरि-
शः ॥ ९ ॥ शृणोतिचकथांदिव्यांश्रोतृभ्योवक्तिवैस्वयं ॥ विनाकथांनजा-
नातिसेव्यमन्यन्नरेश्वर ॥ १० ॥ व्याख्यातियोगृहेस्वस्यवक्तारोगाद्युपद्रुतः
॥ कूपस्नानपरोभूत्वाशृणोत्येवकथांमुनिः ॥ ११ ॥ कथायाश्चविरामेतुस्व-
कृत्यंसाधयत्यलं ॥ कथांवैशृण्वतःपुंसोजन्मबंधोनविद्यते ॥ १२ ॥ सत्वशु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धिस्ततोविष्णावरतिश्चैवगच्छति ॥ रतिश्चजायतेविष्णौसौहृदंचैवसाधुषु ॥ १३ ॥ निरंजनगुणंब्रह्मसद्योहृद्यवरुध्यते ॥ ज्ञानहीनस्यवैपुंसःकर्मवैनिष्फलं भवेत् ॥ १४ ॥ बहुधाधारितंचापियथैवांधस्यदर्पणं ॥ कर्माणिक्रियमाणा-निबहुशोभावितात्मभिः ॥ १५ ॥ सत्वशुद्ध्यैभवंत्यंगसत्वद्ध्यानश्रुतिंव्रजेत् ॥ श्रुतेस्तुज्ञानमासाद्यज्ञानाद्ध्यानायकल्पते ॥ १६ ॥ बहुधाश्रवणंध्यानंमननंश्रु-तिचोदितं ॥ यत्रविष्णुकथानास्तियत्रसाधुजनानहि ॥ १७ ॥ साक्षाद्गंगातटं वापित्याज्यमेवनसंशयः ॥ यद्देशेतुलसीनास्तिसाधवोवातदाश्रयाः ॥ १८ ॥ यत्रविष्णुस्मृतिर्नास्तिमृतस्तत्रतमोव्रजेत् ॥ यद्ग्रामेवैष्णवंधामनास्तिकृष्णमृ-गोऽपिवा ॥ १९ ॥ मृतस्तत्रपुमान्क्षिप्रंश्वानयोनिशतंव्रजेत् ॥ विचार्योपनि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षड्विद्यामितिनिश्चित्यवैमुनिः ॥ २० ॥ सदाविष्णुकथासक्तोविष्णुस्मृतिप-
रायणः ॥ नाकिंचिदधिकंजातुमन्यतेश्रवणात्परं ॥ २१ ॥ इतरस्तुतपो-
निष्ठःकर्मनिष्ठोदुराग्रहः ॥ नव्याख्यातिस्वयंवापिनशृणोतिचसत्कथां ॥ २२ ॥
वाच्यमानांकथांहित्वातीर्थेस्नानायगच्छति ॥ तीर्थेऽपिचप्रवृत्तायांकथायांभू-
मिपालक ॥ २३ ॥ कर्मलोपभयाद्दूरंयातिचांचल्यशंकितः ॥ व्रजंतिगृह-
कृत्यार्थंसंगवात्परतोजनाः ॥ २४ ॥ नश्रोतारोनवक्तारस्तस्यपार्श्वेतुकर्मि-
णः ॥ दुराग्रहस्यदुर्बुद्धेःकालएवंक्षयंगते ॥ २५ ॥ जिह्वाश्रुतिश्चनक्कापिसंप्राप्ता
हिकथांविभोः ॥ अश्रोतृत्वादवक्तृत्वाद्दुर्बुद्धित्वाद्दुराग्रहात् ॥ २६ ॥ पश्चा-

१ संगवोनाम पंचधा विभक्तदिवसस्य द्वितीयो भागः । २ कर्णः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्पंचत्वंमासाद्यकालधर्मेणवैमुनिः ॥ पिशाचोऽभूच्छमीवृक्षेछिन्नकर्णाह्वयोऽबलः ॥ २७ ॥ निराश्रयोनिराहारःशुष्ककंठोष्ठतालुकः ॥ एवंवैखिद्यमानस्य सर्मादिव्यायुतागताः ॥ २८ ॥ नापश्यत्स्वस्यत्रातारंनिराहारोऽतिदुःखितः ॥ स्वकृतंचिंतयानश्वमत्तोन्मत्तइवाभ्रमत् ॥ २९ ॥ क्षुधयापर्यटन्क्वापिनिर्वृतिं नापमूढधीः ॥ कृपाणसदृशावायुरगंस्पृष्टस्तदागमत् ॥ ३० ॥ कालाग्नितुल्याआपश्चफलपुष्पादिकंविषं ॥ नक्वापिसुखमापेदेकर्मठोदीनधीरयं ॥ ३१ ॥ एवंव्यवसितेतस्मिन्नरण्येजनवर्जिते ॥ कथयारहितेक्षेत्रेस्वाश्रमेसाधुवर्जिते ॥ ॥ ३२ ॥ दैवादायात्सत्यनिष्ठस्तदापैठीनसींपुरीं ॥ गच्छन्मार्गेददर्शासौछि-

१ मरणं प्राप्य । २ वर्षाणि । ३ सुखं । ४ खड्गतुल्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्नकर्णबहुव्यथं ॥ ३३ ॥ दृष्ट्वात्मानंखादयंतंरुदंतंक्षुधयातुरं ॥ माभैषीरिति
चाभाष्यकोऽसीत्याहमुनीश्वरः ॥ ३४ ॥ दशेदृशीचकस्मात्तेनतेदुःखमतः
परं ॥ इत्याश्वस्तोऽमुनाछिन्नकर्णःप्राहातिविह्वलः ॥ ३५ ॥ तपोनिष्ठोयति-
रहंशिष्योदुर्वाससःप्रभो ॥ ब्रह्मेश्वरक्षेत्रवासीकर्मनिष्ठोदुराग्रहः ॥ ३६ ॥ क-
र्मलोपभयान्मौढ्यान्मयादुर्बुद्धिनामुने ॥ साधुभिर्वाच्यमानापिनादृताविष्णुस-
त्कथा ॥ ३७ ॥ नव्याख्याताचश्रोतृभ्यःकथाकर्मनिकृंतनी[1] ॥ तेनकर्मविपा-
केनमहतादुर्गतिंगतः ॥ ३८ ॥ छिन्नकर्णोऽभवंनाम्नापिशाचोदुःखविह्वलः ॥
नपश्यामिचत्रातारंदुःखादस्मात्कथंचन ॥ ३९ ॥ तवदृष्टिपथंयातोदिष्ट्या[2]ऽ-

१ कर्मपाशच्छेदिनी । २ दैवात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हंगतकल्मषः ॥ अद्यमेदेवतास्तुष्टागुरवःसाधवश्चये ॥ ४० ॥ हरिश्चमेप्रसन्नोऽभूद्यतस्तेदर्शनंमम ॥ पपातपादयोर्भूमौत्राहित्राहीतिवैरुदन् ॥ ४१ ॥ ततस्तुकृपयाविष्टःसत्यानिष्ठोमहायशाः ॥ दोर्भ्यामुत्थापयामासशंतेमाभ्यांमुनीश्वरः ॥ ४२ ॥ ततस्त्वपउपस्पृश्यददौपुण्यमनुत्तमं ॥ वैशाखमासमाहात्म्यश्रवणस्यमुहूर्तजं ॥ ४३ ॥ तेनपुण्यप्रभावेणसद्योध्वस्ताखिलाशुभः ॥ पिशाचदेहान्निर्मुक्तोदिव्यदेहधरोऽभवत् ॥ ४४ ॥ दिव्यंविमानमारुह्यतंप्रणम्यमहामुनिं ॥ आमंत्र्यचपरिक्रम्यययौविष्णोःपरंपदं ॥ ४५ ॥ सत्यानिष्ठस्ततोधीमान्ययौपैठीनसींपुरीं ॥ माहात्म्यश्रवणस्यैवचिंतयानःपुनःपुनः ॥

१ बाहुभ्यां । २ कल्याणकराभ्यां ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४६ ॥ ॥ श्रुतदेवउवाच ॥ ॥ यत्रविष्णुकथापुण्याशुभालोकमलापहा ॥
तत्रसर्वाणितीर्थानिक्षेत्राणिविविधानिच ॥ ४७ ॥ यत्रप्रवहतेपुण्याशुभावि-
ष्णुकथापगा ॥ तद्देशवासिनांमुक्तिःकरसंस्थानसंशयः ॥ ४८ ॥ इतिश्री-
स्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेकथाप्रशंसायां पिशाचमुक्तिप्रा-
प्तिर्नामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ श्रुतदेवउवाच ॥ ॥ भूयःशृणुष्वभू-
पालमाहात्म्यंपापनाशनं ॥ पुण्यंमाधवमासस्यवल्लभस्यमधुद्विषः ॥ १ ॥ पु-
रापांचालदेशेतुराजापुरुयशाअभूत् ॥ तनयोभूरियशसःपुण्यशीलस्यधीमतः
॥ २ ॥ पितरिप्रास्थितेस्वर्गेराज्यस्थोधर्मपालकः ॥ शौर्यौदार्यगुणोपेतोधनुर्विद्या-
विशारदः॥ ३ ॥शशासपृथिवींसर्वांस्वधर्मेणमहामतिः ॥ पूर्वजन्मकृतेनैवदोषेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महतावृतः ॥४॥ संपद्धानिमवापासौकालेनकियताऽनघ ॥ हयागजामृतिंयाता महारोगेणपीडिताः ॥ ५ ॥ दुर्भिक्षमतुलंचासीन्निर्मानुषविधायकं ॥ राज्यं कोशस्तदाचासीद्गजभुक्तकपित्थवत् ॥ ६ ॥ बलहीनंनृपंज्ञात्वाकोशराष्ट्रवि- वर्जितं ॥ तंजेतुमेषसमयइतिनिश्चितमानसाः ॥ ७ ॥ आजग्मुःशतशोभू- पाविषयंतस्यभूपतेः ॥ जिग्युर्युद्धेचतंभूपंपांचालविषयाधिपं ॥ ८ ॥ परा- जितस्ततोराजाविवेशगिरिगह्वरं ॥ शिखिन्याभार्ययासाकंधात्र्यादिगणसंयु- तः ॥ ९ ॥ अज्ञातपद्धतिश्चान्यैर्बहुदुःखसमाकुलः ॥ त्रिपंचाशत्समानीतास्ते- नराज्ञानिलीयता ॥ १० ॥ चिंतयामासभूपालःकिमेतदितिभूरिशः ॥ क- र्मणाजन्मशुद्धोऽहंमातापितृहितेरतः ॥ ११ ॥ गुरुभक्तःसदाक्षिण्योब्रह्मण्यो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मतत्परः ॥ दयावान्सर्वभूतेषुदेवभक्तोजितेंद्रियः ॥ १२ ॥ नभ्रातामेनपु-
त्रोमेनचमेसुहृदोहिताः ॥ दयापौरुषविख्यातकुलीनस्यापिमेकुतः ॥ १३ ॥
केनवाकर्मणाप्राप्तंदारिद्र्यंभूरिदुःखदं ॥ केनवाऽपजयोमेऽद्यकेनवावनवासिता ॥
॥१४॥ इतिचिंताकुलोराजागुरुंसस्मारखिन्नधीः ॥ याजोपयाजकौनामसर्व-
ज्ञौमुनिसत्तमौ ॥ १५ ॥ आजग्मतुर्मुनींद्रौतुराज्ञाहूतौमहामती ॥ तौदृष्ट्वा
सहसोत्थायराजापांचालवल्लभः ॥ १६ ॥ ननामशिरसाभक्त्याप्रवासेना-
तिपीडितः ॥ राजचिह्नविहीनत्वात्केनाप्यज्ञातपद्धतिः ॥ १७ ॥ तूष्णींत-
स्थौमुहूर्तंहिपतितोभुविपादयोः ॥ दोर्भ्यामुत्थापितस्ताभ्यांपरिमृष्टाश्रुलोच-
नः ॥ १८ ॥ विधिवत्पूजयामासवन्यैरेवार्हणैःशुभैः ॥ सूपविष्टौतुतौविप्रौपप्र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्छानतकंधरः ॥ १९ ॥ ब्रह्मिष्ठौवदतंदुःखकारणंचक्षितीशितुः ॥ कर्मणा जन्मशुद्धस्यपितृदेवप्रियस्यच ॥ २० ॥ पापभीरोःकृपालोश्चगुरुभक्तस्यमेकुतः ॥ दारिद्र्यंकोशहानिश्चरिपुभिश्चपराभवः ॥ २१ ॥ कस्मादरण्यवासश्च कुतएकाकितामम ॥ नपुत्रोनचमेभ्रातानाहिताःसुहृदश्चमे ॥ २२ ॥ दुर्भिक्षंवाकुतश्चासीद्देशेमत्पालितेऽनघे ॥ एतद्विस्तार्यमेब्रूतंकारणंमुनिपुंगवौ ॥ ॥ २३ ॥ इत्युक्तौतौमुनिश्रेष्ठौभूपेनात्यंतदुःखिना ॥ प्रत्यूचतुर्महात्मानौकिंचिद्ध्यानपरायणौ ॥ २४ ॥ ॥ याजोपयाजावूचतुः ॥ ॥ शृणुभूपप्रवक्ष्यावस्तवदुःखस्यकारणं ॥ पुराभूपमहापापीव्याधस्त्वंदशजन्मसु ॥ २५ ॥ निष्ठुरःसर्वलोकानांसदाहिंसापरायणः॥ धर्मलोपकरःक्वापिनदयानापिवैशमः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२६ ॥ नजिह्वावक्तिनामानिविष्णोर्वापिकथंचन ॥ नचेतःस्मरतिश्रीशचरणां-
बुरुहद्वयं ॥ २७ ॥ नप्रणामःकृतःक्वापिकृष्णायपरमात्मने ॥ नवजन्मानि
तेभूपगतान्येवंदुरात्मनः ॥ २८ ॥ दशमेजन्मनिप्राप्तेऽथाधस्त्वंसह्यभूधरे ॥
निष्ठुरःसर्वलोकानांनराणांत्वंनरांतकः ॥ २९ ॥ दयाहीनःशस्त्रजीवीसदा
हिंसापरायणः ॥ निर्गुणःसकलत्रस्त्वंमार्गपीडाकरःशठः ॥ ३० ॥ प्रजानां
गौडदेश्यानांराक्षसोमानुषाशनः ॥ एवंचाब्दान्यतीतानिनैजंहितमजानतः ॥
॥ ३१ ॥ बालापत्यमृगाणांचपाक्षिणांचवधात्तव ॥ दयाहीनस्यदुर्बुद्धेर्जन्मन्य-
स्मिन्नपुत्रता ॥ ३२ ॥ विश्वासघातकत्वेनभ्रातरोनैवसोदराः ॥ मार्गपी-
डाकरत्वेनसुहृज्जनविवर्जितः ॥ ३३ ॥ साधूनांचतिरस्काराच्छत्रुभिस्तेप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजयः ॥ कदाप्यदत्तदोषेणदारिद्र्यंपतितंगृहे ॥ ३४ ॥ सदैवोद्वेगकारित्वात्प्रवासोऽयंदुरासदः ॥ सर्वेषामाप्रियत्वाच्चदुःखमत्यंतदुःसहं ॥ ३५ ॥ निराधारोयतःपूर्वंसदाक्रूरेणकर्मणा ॥ तस्माद्राज्यापहारस्तेजन्मन्यस्मिन्महीपते ॥ ३६ ॥ अथतेसत्कुलीनत्वेहेतुंचापिब्रवीम्यहं ॥ यदाऽभूर्गौडदेशीयो ह्यंतिमेव्याधजन्मनि ॥ ३७ ॥ स्वकर्मनिरतेक्रूरेविपिनेकंटकाविले ॥ तिष्ठत्येवंदयाहीनेसर्वभूतांतकेपथि ॥ ३८ ॥ वैश्यावाजग्मतुर्दैवाद्धनाढ्यौघर्मपीडितौ ॥ मुनिश्चकर्षणोनामवेदवेदांगपारगः ॥ ३९ ॥ जटाचीरधरःपुण्यःकमंडलुपरिग्रहः ॥ तान्दृष्ट्वाधनुरादायमार्गंरुद्ध्वाऽव्यवस्थितः ॥ ४० ॥ अथोद्धृत्यशरौवैश्यौकृत्वाछिन्नशरीरकौ ॥ तयोरेकंचहत्वातुगृहीत्वातत्पणंखलु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ४१ ॥ अपरंहंतुमुद्युक्तेसदुद्रावभयाद्द्रुतं ॥ पर्णंगुल्मेविनिक्षिप्यभीतःप्राणपरीप्सुकः ॥ ४२ ॥ कर्षणोऽपिमुनिःशीघ्रंव्याधान्मृतिविशंकया ॥ आतपे धावमानःसंस्तृषाघर्मप्रपीडितः ॥ ४३ ॥ मूर्छामापगतश्वासःसंज्ञामात्रावशेषितः ॥ विहायैनंदुद्रुवेचवैश्योजीवनतत्परः ॥ ४४ ॥ त्वंतावनुद्रुतौदृष्ट्वा मूर्छितंपथिभूसुरं ॥ पर्णंकुत्रविनिक्षिप्तंकियद्दूरंगतोवणिक् ॥ ४५ ॥ इति पृष्टंद्विजंश्रांतमुज्जीवयितुमुद्यतः ॥ फूत्कृत्यकर्णयोस्तस्यफूत्कारंस्मृतिकारणं ॥ ४६ ॥ पल्वलस्थोदकेनैवकर्दमिकर्दमसंयुजा ॥ नेत्रेसंमृज्यश्रांतस्यपर्णैःसंवीज्यतन्मुखं ॥ ४७ ॥ ससंज्ञंचमुनिंकृत्वात्वमात्थस्वस्थमानसः ॥ माशंका तेमुनेकार्यामत्तःशस्त्रभृतोवने ॥ ४८ ॥ निष्किंचनःसुखीलोकेकुतस्तेभय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुल्बणं ॥ भिन्नपात्रेणचीरेणनमेकिंचिद्भविष्यति ॥ ४९ ॥ एतावद्वदमेविद्व-
न्वणिक्कुत्रपलायितः ॥ कुत्रगुल्मेधनंक्षिप्तंतेनशीघ्रंपलायता ॥ ५० ॥ अ-
न्यथात्वांहनिष्यामियदिमिथ्यावदिष्यसि ॥ ॥ कर्षणउवाच ॥ ॥ धनं
गुल्मेविनिक्षिप्तंमार्गादस्मापलायितः ॥ ५१ ॥ इतिप्राहत्वयासोऽपिपृष्टःप्रा-
णपरीप्सया ॥ गच्छविप्रसुखंमार्गमत्तोभीतिंविहायच ॥ ५२ ॥ इतोविदू-
रेसलिलंतडागेवर्ततेशुभं ॥ तत्पीत्वासलिलंपुण्यंगच्छग्रामंगतश्रमः ॥ ५३ ॥
अधुनैवागमिष्यंतिराजकीयाःपथाऽमुना ॥ मत्पदान्वेषणेसक्ताःश्रुत्वारावंवणि-
क्पतेः ॥ ५४ ॥ तृषार्तमनुगंतुंमेनशक्यंत्वांततोद्विज ॥ वीजयानेनपर्णेन
घर्मःकिंचिद्भमिष्यति ॥ ५५ ॥ तस्मैदत्वापलाशंचत्वमगाविपिनंपुनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनपुण्यप्रभावेणवैशाखेघर्मनिष्ठुरे ॥ ५६ ॥ स्वकार्यार्थंकृतेनापिमुनित्राणाय पद्धतौ ॥ जन्मासीत्तेमहापुण्येराजवंशेऽतिविस्तृते ॥ ५७ ॥ यदीच्छासि सुखंराज्यंधनधान्यादिसंपदः ॥ स्वर्गापवर्गौयदिवासायुज्यंवाहरेःपदं ॥ ५८॥ कुरुवैशाखधर्मांस्त्वंसर्वसौख्यमवाप्स्यासि ॥ मासोऽयंमाधवोनामतृतीयाचा-क्षयाह्वया ॥ ५९ ॥ गांसवत्सांचसंपूज्यदेहिविप्रायसीदते ॥ तेनतेकोश-पूर्तिःस्याच्छय्यांदेहिमुखंभवेत् ॥ ६० ॥ कुरुच्छत्रप्रदानंचसाम्राज्यंतेभविष्य-ति ॥ स्नानंकुरुयथान्यायंतथैवार्चयमाधवं ॥ ६१ ॥ देहिचप्रतिमांदिव्यांतेन शत्रुजयोभवेत् ॥ आत्मतुल्यगुणान्पुत्रान्यदिकामयसेनृप ॥ ६२ ॥ सर्वभू-तहितार्थायप्रपादानंचत्वंकुरु ॥ वैशाखोक्तानिमान्धर्मान्सम्यगाचरभूपते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६३ ॥ तेनतेसकलालोकावशंयांतिनसंशयः ॥ निष्कामेणचचित्तेनयदि धर्मान्करिष्यसि ॥ ६४ ॥ वैशाखेपुण्यमासेऽस्मिन्प्रीतयॆमधुघातिनः ॥ प्रत्यक्षोभविताविष्णुस्तवनिर्मलचेतसः ॥ ६५ ॥ येनचाचरिताःपुंसाधर्माह्येते शुभावहाः ॥ तस्यचैवाक्षयालोकाःपुराणेकवयोविदुः ॥ ६६ ॥ एतत्सर्वंतव प्रोक्तंयथादृष्टंयथाश्रुतं ॥ इतिराजानमामंत्र्यब्राह्मणौचपुरोधसौ ॥ ६७ ॥ याजोपयाजकौनामजग्मतुस्तौयथागतं ॥ ततोराजामहावीर्यःपुरोधोभ्यांचबोधितः ॥ ६८ ॥ वैशाखधर्मान्सकलांश्चकारश्रद्धयान्वितः ॥ यथोपदिष्टंचतथामधुसूदनमार्चयत् ॥ ६९ ॥ ततोलब्धप्रभावःसन्बंधुभिःसकलैर्वृतः ॥ पांचालनगरींप्रापहतशेषबलान्वितः ॥ ७० ॥ ततस्तुशत्रवोभूपाउपश्रुत्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चमूपतेः ॥ प्रवेशंस्वपुरेऽस्याथपुनराजग्मुरुद्धताः ॥ ७१ ॥ तदापांचाल-
भूपेननृपाणामभवद्रणः ॥ जिग्येसर्वान्महाबाहूनेकएवमहारथः ॥ ७२ ॥
पलायितेषुभूपेषुनानादेशपतिष्वपि ॥ राजाकोशंगजानश्वान्स्वयंजग्राह-
वीर्यवान् ॥ ७३ ॥ अश्वानामर्बुदंचैवगजानांचत्रिकोटयः ॥ रथानाम-
र्बुदंचैवदीर्घग्रीवायुतंतथा ॥ ७४ ॥ रासभानांत्रिलक्षाणिप्रापयामासवै
पुरीं ॥ वैशाखधर्ममाहात्म्यात्क्षणात्सर्वेपिभूभृतः ॥ ७५ ॥ करदाभ-
ग्नसंकल्पाः पादाक्रांताबभूविरे ॥ सुभिक्षमतुलंचासीत्पांचालविषयेषुच ॥
॥७६॥ एकच्छत्रमभूद्राज्यंप्रसादान्मधुघातिनः ॥ पुत्राःपंचापितस्यासन्शौर्यौ-

१ उष्ट्राणां दशसहस्रं । २ आनाययामास ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दार्यगुणान्विताः ॥ ७७ ॥ धृष्टकीर्तिर्धृष्टकेतुर्धृष्टद्युम्नस्तथापरः ॥ विजयाश्चित्र-
केतुश्चमयूरध्वजसंनिभः ॥ ७८ ॥ अनुरक्ताःप्रजाश्चासन्धर्मेणप्रतिपालिताः ॥
वैशाखस्यप्रभावेणप्रत्यक्षंतत्क्षणादभूत् ॥ ७९ ॥ पुनश्चकारतान्धर्मान्पांचा-
लनगरीश्वरः ॥ अकामुकेनचित्तेनप्रीतयेमधुघातिनः ॥ ८० ॥ धर्मेणानेनसं-
तुष्टोभगवान्मधुसूदनः ॥ अक्षय्यायांतृतीयायांप्रत्यक्षःसमजायत ॥ ८१ ॥
तंदृष्ट्वाविस्मितोभूत्वापरमात्मानमच्युतं ॥ नारायणंचतुर्बाहुंशंखचक्रगदाधरं ॥
॥ ८२ ॥ पीतांबरधरंदेवंवनमालाविभूषितं ॥ सलक्ष्मीकंसानुगंचगरुडोपरि
संस्थितं ॥ ८३ ॥ निरीक्ष्यदुःसहंतेजःसद्योमीलितलोचनः ॥ उत्पतन्संपत-
न्हर्षान्मतोन्मत्तइवभ्रमन् ॥ ८४ ॥ पुलकांकितसर्वांगोगलद्बाष्पाकुलेक्षणः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुष्टावपरयाभक्त्याप्रांजलिःप्रणतोभुवि ॥ ८५ ॥ ॥ इतिश्रीस्कंदपुराणेवै-
शाखमाहात्म्येनारदांबरीषसंवादेपांचालदेशाधिपतेर्जयप्राप्तिर्नामचतुर्दशो ऽ-
ध्यायः ॥ १४ ॥ ॥ श्रुतदेवउवाच ॥ ॥ तद्दर्शनाह्लादपरिप्लुताशयःसद्यः
समुत्थायननाममूर्ध्ना ॥ चिरंनिरीक्ष्याकुललोचनैरमुंविश्वात्मदेवंजगतामधी-
शं ॥ १ ॥ दधारपादाववनिज्यतज्जलंयत्पादआब्रह्मजगत्पुनाति ॥ समर्च-
यामासमहाविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ २ ॥ स्त्रग्धूपदीपामृतभक्ष-
णादिभिःस्वगात्रचित्तात्मसमर्पणेन ॥ तुष्टावविष्णुंपुरुषंपुराणंनारायणंनिर्गु-
णमद्वितीयं ॥ ३ ॥ निरंजनंविश्वसृजामधीशंपरात्परंपद्मभवादिवंदितं ॥
॥ यन्मायतत्त्वविश्वदुत्तमाजनाविमोहिताविश्वसृजामधीश्वरे ॥ ४ ॥ मु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुह्यंतिमायारचितेषुमूढागुणेषुचित्रंभगवद्विचेष्टितं ॥ अनीह[1]एतद्बहुधैकआत्मनासृजत्यवत्यत्तिनसज्जतेऽप्यथ ॥ ५ ॥ समस्तदेवासुरसौख्यदुःखप्राप्त्यैभवान्पूर्णमनोरथोऽपि ॥ तत्रापिकालेस्वजनाभिगुप्त्यैबिभर्षिसत्वंखलनिग्रहाय ॥ ६ ॥ तमोगुणंराक्षसबंधनायरजोगुणंनिर्गुणविश्वमूर्ते ॥ दिष्ट्या त्वदंघ्रिःप्रणताघनाशनंतीर्थास्पदं हृदिधृतंसुविपक्वयोगैः ॥ ७ ॥ उत्सिक्त[3]भक्त्यपहृताशयजीवभावाःप्रापुर्गतिंतवपदस्मृतिमात्रतोये ॥ भवाख्यकालोरगपाशबद्धाःपुनःपुनर्जन्मजरादिदुःखैः ॥ ८ ॥ भ्रमामियोनिष्वहमाखु[4]भक्षवत्प्रवृद्धतृष्णस्तवपादविस्मृतेः ॥ नूनंनदत्तंनचतेकथाश्रुतानसाधवोजातुम-

१ निष्कामः । २ संहराति । ३ उत्सिक्ता प्रवृद्धा । ४ मार्जारवत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यापिसेविताः ॥ ९ ॥ तेनारिभिर्ध्वस्तपरार्ध्यलक्ष्मीर्वनंप्रविष्टःस्वगुरूअहं
स्मरन् ॥ स्मृतौचतौमांसमुपेत्यदुःखात्संबोधयांचक्रतुरार्तबंधू ॥१० ॥ वै-
शाखधर्मैःश्रुतिचोदितैःशुभैःस्वर्गापवर्गादिपुमर्थहेतुभिः ॥ तद्बोधतोऽहंकृतवा-
न्समस्तान्शुभावहान्माधवमासधर्मान् ॥ ११ ॥ तस्मादभून्मेपरमःप्रसा-
दस्तेनाखिलाःसंपदऊर्जिताइमाः ॥ नाग्निर्नसूर्योनचचंद्रतारकानभूर्जलंखं
श्वसनोऽथवाङ्मनः ॥ १२ ॥ उपासितास्तेपिहरंत्यघंचिराद्विपश्चितोघ्नंति
मुहूर्तसेवया ॥ यन्मन्यसेत्वंभजतोऽपिभूरिशस्त्यक्तैषणांस्त्वत्पदन्यस्तचित्ता-
न् ॥ १३ ॥ नमःस्वतंत्रायविचित्रकर्मणेनमःपरस्मैसदनुग्रहाय ॥ त्वन्मा-

१ श्रेष्ठसंपत् । २ वायुः । ३ त्यक्तसंगान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ययामोहितोऽहंगुणेषुदारार्थरूपेषुभ्रमाम्यनर्थदृक् ॥ १४ ॥ त्वत्पादपद्मंस्मृतिमूलनाशनंसमस्तपापापहरंसुनिर्मलं ॥ सुखेच्छयाऽनर्थनिदानभूतैःसुतात्मदारैर्ममताभियुक्तः ॥ १५ ॥ नक्कापिनिद्रांनलभेचशर्मप्रवृद्धतर्षःपुनरेव तास्मिन् ॥ लब्ध्वादुरापंनरदेहजन्मत्वयत्नतःसर्वपुमर्थहेतुं ॥ १६ ॥ पदारविंदंनभजामिदेवसंमूढचेताविषयेषुलालसः ॥ करोमिकर्माणिसुनिष्ठितःसन्प्रवृद्धतर्षस्तदपेक्षयादहन् ॥ १७ ॥ पुनश्चभूयामहमद्यभूयामित्येवचिंताशतलोलमानसः॥ यदैवजीवस्यभवेत्कृपाविभोदुरंतशक्तेस्तवविश्वमूर्तेः॥ १८ ॥ समागमःस्यान्महतांहिपुंसांभवांबुधिर्येनहिगोष्पदायते ॥ सत्संगमोदेवयदै-

१ गोष्पदमात्रइव भवति । सुतरत्वादिति भावः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूयात्तदेवदेवत्वयिजायतेमतिः ॥ १९ ॥ समस्तराज्यापगमंहिमन्येह्यनुग्रहं तेमयिजातमंजसा ॥ यःप्रार्थ्यतेब्रह्मसुरासुराद्यैर्निवृत्ततर्षैरपिहंसयूथैः ॥ २० ॥ इतःपरंचाच्युतमेवसादरंभवापहंपादसरोरुहंविभो ॥ नकिंचनप्रार्थ्यममंद-भाग्यदंनकामयेऽन्यत्तवपादपद्मतः ॥ २१ ॥ अतोनराज्यंनसुतादिकोशंन दासदासीर्नचजीवितंहिमे ॥ भजामिनित्यंतदुपासितव्यंपादारविंदंमुनिभि-र्विचिंत्यं ॥ २२ ॥ प्रसीददेवेशजगन्निवासभक्तिर्यथास्यात्तवपादपद्मे ॥ स-क्तिःसदागच्छतुदारकोशपुत्रात्मवित्तेषुगुणेषुमेप्रभो ॥ २३ ॥ भूयान्मनःकृ-ष्णपदारविंदयोर्वाचाचतोदिव्यकथानुवर्णने ॥ नेत्रेममस्तांतवविग्रहेक्षणेश्रो-त्रेकथायांरसनात्वदर्पिते ॥ २४ ॥ घ्राणंचतेपादसरोजसौरभेत्वद्भक्तगंधादि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विलेपनेत्वक् ॥ स्यातांचहस्तौतवमंदिरेविभोसंमार्जनादौममनित्यदेव ॥ २५॥
पादौहरेःक्षेत्रपथानुसर्पणेमूर्धाचमेस्यात्तववंदनेऽनिशं॥कामश्चमेस्यात्तवसत्कथा-
यांबुद्धिश्चमेस्यात्तवचिंतनेऽनिशं ॥ २६ ॥ दिनानिमेस्युस्तवसत्कथोदयै-
रुद्गीयमानैर्मुनिभिर्गृहागतैः ॥ हीनप्रसंगैस्तवमेनभूयात्क्षणंनिमेषार्धमथापि
विष्णो ॥ २७ ॥ नपारमेष्ठ्यंनचसार्वभौमतांनचापवर्गंस्पृहयामिविष्णो ॥
त्वत्पादसेवाचसदैवमेस्यात्प्रार्थ्याश्रियाब्रह्मभवादिभिःसुरैः ॥ २८ ॥ इतिरा-
ज्ञास्तुतोविष्णुःप्रसन्नःकमलेक्षणः ॥ मेघगंभीरयावाचातमुवाचक्षितीश्वरं ॥
२९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ जानेत्वांदादासवर्यंमेनिष्कामुकमक-
ल्मषं ॥ अथापितेप्रदास्यामिवरंदैवतदुर्लभं ॥ ३० ॥ आयुष्यंचार्बुदंदि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यंसंपदश्चननश्वराः ॥ भक्तिर्मयिदृढाभूयादंतेसायुज्यमाप्नुयाः ॥ ३१ ॥ त्व-
याकृतेनस्तोत्रेणमांस्तुवंतिचयेभुवि ॥ तेषांतुष्टःप्रदास्यामिभुक्तिंमुक्तिंनसंश-
यः ॥ ३२ ॥ तृतीयैषाऽक्षयानामभुविख्याताभविष्यति ॥ यस्यांतवप्र-
सन्नोऽहंभुक्तिमुक्तिफलप्रदः ॥ ३३ ॥ येकुर्वंतिनरामूढाअपिस्नानादिसत्क्रि-
याः ॥ व्याजेनापिस्वभावाद्वायांतिमत्पदमव्ययं ॥ ३४ ॥ येचाक्षयतृतीया-
यांपितॄनुद्दिश्यमानवाः ॥ श्राद्धंकुर्वंतितेषांवैतदानंत्यायकल्पते ॥ ३५ ॥
नचानयातिथिर्लोकेसमावानाधिकाभवेत् ॥ अस्यांकृतंस्वल्पमपितदक्षय्यफलं
भवेत् ॥ ३६ ॥ योगांदद्यान्नृपश्रेष्ठब्राह्मणायकुटुंबिने ॥ सर्वसंपत्प्रवर्षाख्या
भुक्तिर्मुक्तिःकरेस्थिता ॥ ३७ ॥ योहिदद्यादनड्वाहंसर्वपापविनाशनं ॥ काल-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृत्युविमुक्तःसदीर्घायुष्यमवाप्नुयात् ॥ ३८ ॥ वैशाखेमासियेधर्मान्कुर्वतेम-
त्प्रियावहान् ॥ तेषांमृत्युजराजन्मभयंपापंहराम्यहं ॥ ३९ ॥ यथावैशाख-
धर्मैस्तुतुष्टःस्यांसकलैरपि ॥ मासधर्मैर्नतुष्टःस्यामासोमेमाधवःप्रियः ॥ ४० ॥
सर्वधर्मोज्झितोवापिब्रह्मचर्यविवर्जितः ॥ वैशाखमासनिरतोयातिमत्पदम-
व्ययं ॥ ४१ ॥ यद्दुरापंतपोभिश्चसांख्ययोगैर्मखैरपि ॥ तद्धामपरमंयांति
वैशाखनिरतानराः ॥ ४२ ॥ अपिपापसहस्त्रंवामासोऽयंहरतेऽनघ ॥ प्राय-
श्चित्तविहीनानांमत्पादस्मरणंयथा ॥ ४३ ॥ गुरूपदिष्टःकांतारेवैशाखेनिर-
तोभवान् ॥ मामाराध्यजगन्नाथंतेनाप्तमखिलंनृप ॥ ४४ ॥ धर्मेणानेनसं-
प्रीतःप्रत्यक्षोऽहंभवामिते ॥ भुक्त्वाभोगान्यथाकामंदेवैरपिसुदुर्लभान् ॥ ४५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इतितस्मैवरंदत्वादेवदेवोजनार्दनः ॥ पश्यतामेवसर्वेषांतत्रैवांतरधीयत ॥
४६ ॥ ततोभूपालवर्योऽसौबभूवात्यंतविस्मितः ॥ हृष्टपुष्टतनुर्भूपलब्धनष्टध-
नोयथा ॥ ४७ ॥ ततःशशासपृथिवींतच्चित्तस्तत्परायणः ॥ महद्भिर्बोधि-
तोनित्यंगुरुभिश्चनिरंतरं ॥ ४८ ॥ नान्यत्प्रियतरंमेनेवासुदेवस्मृतेर्नृपः ॥
यत्संपर्कात्प्रियाआसन्दारामात्यसुतादयः ॥ ४९ ॥ सर्वान्धर्मांश्चकरासौवै-
शाखोक्तान्पुनःपुनः ॥ तेनपुण्यप्रभावेणपुत्रपौत्रादिभिर्वृतः ॥ ५० ॥ भु-
क्त्वामनोरथान्सर्वान्देवानामपिदुर्लभान् ॥ अंतेजगामसायुज्यंविष्णोर्देवस्यच-
क्रिणः ॥ ५१ ॥ यइदंपरमाख्यानंशृण्वंतिश्रावयंतिच ॥ तेसर्वेपापनिर्मुक्ता
यांतिविष्णोःपरंपदं ॥ ५२ ॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनार-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दांबरीषसंवादेपांचालाधिपतेःसायुज्यप्राप्तिर्नामपंचदशोऽध्यायः ॥ १५ ॥ ॥
॥ मैथिलउवाच ॥ ॥ वैशाखधर्मानखिलानिहामुत्रफलप्रदान् ॥ भूयोऽपि
शृण्वतश्चासीत्तृप्तिर्नाद्यापिमानद ॥ १ ॥ यत्रचाकैतवोधर्मोयत्रविष्णुकथाः
शुभाः ॥ तच्छास्त्रंशृण्वतोनैवतृप्तिःकर्णरसायनं ॥ २ ॥ पूर्वजन्मकृतंपुण्यंदि-
ष्ट्यापाकमुपागतं ॥ आतिथ्यव्यपदेशेनयद्भवान्गृहमागतः ॥ ३ ॥ वाचा-
ऽमृतंमुखांभोजनिःसृतंतेमहाद्भुतं ॥ पीत्वातृप्तःपारमेष्ठ्यंमोक्षंवानचकामये ॥
॥ ४ ॥ तस्मात्तानेवधर्मान्मेभुक्तिमुक्तिप्रदायकान् ॥ विष्णुप्रीतिकारान्दिव्या-
न्भूयोविस्तरतोवद ॥ ५ ॥ इतिपृष्टस्तदाराज्ञाश्रुतदेवोमहायशाः ॥ संहृष्टा-
त्माशुभान्धर्मान्पुनर्व्याहर्तुमारभत् ॥ ६ ॥ ॥ श्रुतदेवउवाच ॥ ॥ शृणु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजन्प्रवक्ष्यामिकथांपापप्रणाशिनीं ॥ वैशाखधर्मविषयांभाषितांमुनिभिर्मुहुः ॥
॥ ७ ॥ पंपातीरेद्विजःकश्चिच्छंखोनाममहायशाः ॥ गुरौसिंहगतेचागान्नदीं
गोदावरींशुभां ॥ ८ ॥ तीर्त्वाभीमरथींपुण्यांकांतारेकंटकाविले ॥ निर्जले
निर्जनेघोरेवैशाखेतपकर्शितः ॥ ९ ॥ वृक्षेचोपविवेशासौमध्याह्नसमयेद्विजः
॥ तदाकश्चित्क्रूरवाक्योव्याधश्चापधरःशठः ॥ १० ॥ निर्घृणःसर्वभूतेषुका-
लांतकइवापरः ॥ तंकुंडलधरंविप्रंदीक्षितंभास्करोपमं ॥ ११ ॥ दृष्ट्वाबद्ध्वास
जग्राहकुंडलादिकमुग्रधीः ॥ उपानहौचछत्रंचअक्षमालांकमंडलुं ॥ पश्चाद्वि-
सृज्यतंविप्रंगच्छेत्याहसमूढधीः ॥ १२ ॥ ततःसगच्छन्पथिशर्करावलेसूर्यां-

१ निदाघपीडितः । २ वालुकाभिर्व्याप्ते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुतप्तेजलवर्जितेवने ॥ १३ ॥ संतप्तपादस्तृणछादितेस्थलेक्कचिच्चचारोप-
रिसंनिवेशनं ॥ सर्वैद्रुतंसंपतन्क्कापितिष्ठन्हाहेतिवादीचजगामतूर्णं ॥ १४ ॥
दृष्ट्वामुनिंखिद्यमानंपृथिव्यांमध्यंगतेपूषिणदयाबभूव ॥ व्याधस्यधर्मविमुख-
स्यचपापबुद्धेस्तस्मैददामीतिचपादरक्षां ॥ १५ ॥ चौर्येणैवस्वधर्मेणयद्गृही-
तंवनांतरे ॥ तदीयमेवतत्सर्वंव्याधानांधर्मनिर्णयः ॥ १६ ॥ तस्मादुपानहौ
दास्येमुहुर्दुःखापनुत्तये ॥ तेनश्रेयोभवेद्यच्चतद्भवेन्ममपापिनः ॥ १७ ॥ जी-
र्णेचोपानहौदिव्येवर्तेतेपादयोर्मम ॥ नैताभ्यामस्तिमेकृत्यंतस्मात्तेवैददाम्यहं
॥ १८ ॥ इतिनिश्चित्यमनसितूर्णंगत्वाददौचते ॥ शर्करातप्तपादायद्विजव-
र्यायसीदते ॥ १९ ॥ उपानहौगृहीत्वातेनिर्वृतिंचपरांययौ ॥ सुखीभवेतितं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याधमाशीर्भिरभिनंद्यच ॥ २० ॥ नूनंसुपक्कपुण्योऽयंवैशाखेदत्तवानमू ॥
व्याधस्यापिचदुर्बुद्धेःप्रायोविष्णुःप्रसीदति ॥ २१ ॥ सर्वस्वाह्याचभूयोऽपि
यत्सुखंतदभून्मम ॥ ततोऽभिश्रुत्यतद्वाक्यंकिमेतदितिविस्मितः ॥ २२ ॥
व्याजहारपुनर्विप्रंब्राह्मिष्ठंधर्मवादिनं॥त्वदीयंतुमयादत्तंकथंपुण्यंभवेन्मम॥२३॥
प्रशंससिचवैशाखंहरिस्तुष्टोभवेदिति ॥ एतदाचक्ष्वमेब्रह्मन्कोवैशाखस्तुको
हरिः ॥ २४ ॥ कोधर्मःकिंफलंतस्यशुश्रूषोर्मेदयानिधे ॥ इतिव्याधवचःश्रु-
त्वाशंखस्तुष्टमनाअभूत् ॥ २५ ॥ प्रशंसन्सचवैशाखंपुनर्विस्मितमानसः ॥ इ-
दानींदत्तवान्पादत्राणेमेलुब्धकःशठः ॥ २६ ॥ सद्योबुद्धेश्चवैषम्यंजातंचित्र-
महोबत ॥ पापाचारस्यदुर्बुद्धेर्व्याधस्यापिदुरात्मनः ॥ २७ ॥ दैवादुपानहो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दानात्सत्वशुद्धिरभूदहो ॥ यच्चविष्णोःप्रियंकर्मयत्तत्संतोषकारणं ॥ २८ ॥
तदेवधर्ममित्याहुर्मन्वाद्याधर्मवित्तमाः ॥ धर्मामाधवमासीयाःप्रियाविष्णोर-
तीवते ॥ २९ ॥ धर्मैर्माधवमासीयैर्यथातुष्यातिकेशवः ॥ नतथासर्वदानैश्च
तपोभिश्चमहामखैः ॥ ३० ॥ नानेनसदृशोधर्मःसर्वधर्मेषुविद्यते ॥ मागयां
यांतुमागंगांमाप्रयागंचपुष्करं ॥ ३१ ॥ माकेदारंकुरुक्षेत्रंमाप्रभासंस्यमंतकं
॥ मागोदांमाचकृष्णांचमासेतुंमामरुद्वृधं ॥ ३२ ॥ वैशाखधर्ममाहात्म्यशं-
सिनीचकथापगा ॥ तत्रस्नातस्यवैविष्णुःसद्योत्हृद्यवरुध्यते ॥ ३३ ॥मासेमा-
धवसंज्ञेऽस्मिन्यत्स्वल्पेनैवसाध्यते ॥ नतद्बहुव्ययैर्दानैर्नधर्मैर्नापिवामखैः ॥
॥ ३४ ॥ मासोऽयंमाधवोनामव्याधपुण्यविवर्धनः ॥ तस्मिन्मह्यंत्वयादत्तेपादु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केतापनाशने ॥ ३५ ॥ तेनतेपूर्वकालीनंपुण्यंपाकमुपागतं ॥ तुष्टस्तुभगवा-
न्प्रायःप्रायःश्रेयोभाविष्यति ॥ ३६ ॥ अन्यथातेकथंभूयाद्बुद्धिरेतादृशीशुभा ॥
मुनावेवंब्रुवाणेचमृत्युनाप्रेरितोबली ॥ ३७ ॥ सिंहोव्याघ्रवधार्थायप्राद्रवत्क्रो-
धविह्वलः ॥ मध्येदृष्ट्वाचमातंगंदैवाद्देवेनकल्पितं ॥ ३८ ॥ तंहंतुमुद्यतोऽगच्छ-
त्पदव्यांसंव्यवस्थितं ॥ तयोर्युद्धमभूद्घोरंसिंहमातंगयोर्वने ॥ ३९ ॥ श्रां-
तौयुद्धाच्चविरतौनिरीक्षंतौचतस्थतुः ॥ व्याधमुद्दिश्ययत्प्रोक्तंमुनिनाचमहा-
त्मना ॥ ४० ॥ समस्तपातकध्वंसिदैवाच्छुश्रुवतुश्चतौ ॥ तेनैवमासमाहा-
त्म्यश्रवणेनामलौशुभौ ॥ ४१ ॥ पाशान्मुक्तौचतौदेहात्सद्योमुक्त्वादिवंगतौ॥
दिव्यरूपधरौदिव्यौदिव्यगंधानुलेपनौ ॥४२॥ दिव्यंविमानमारूढौदिव्यनारी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षेवितौ ॥ सद्योऽवनतमूर्धानौप्रांजलीचोपतस्थतुः ॥ ४३ ॥ मुनींद्रोधर्मवक्ता चव्याधमुद्दिश्यवैपथि ॥ तौदृष्ट्वाविस्मितःप्राहकौयुवामितिनिश्चलः ॥ ४४ ॥ दुर्योनौतुकुतोजन्मयुवयोर्वाकथंमृतिः ॥ अहेतोर्विपिनेचास्मिन्परस्परवधोद्यतौ ॥ ४५ ॥ एतत्सर्वंसुविस्तार्यसम्यग्ब्रूतंचमेऽनघौ ॥ इत्युक्तौमुनिनातेनवचः प्रत्यूचतुःपुनः ॥ ४६ ॥ मतंगस्यमुनेःपुत्रौदंतिलःकोहलोऽपरः ॥ शापदोषेणतौजातौनाम्नादंतिलकोहलौ ॥ ४७ ॥ रूपयौवनसंपन्नौसर्वविद्याविशारदौ ॥ आवामुद्दिश्यप्रोवाचपिताधर्मार्थकोविदः ॥ ४८ ॥ मतंगोनामधर्मर्षिः सर्वधर्मविदुत्तमः ॥ वैशाखेमासितनयौमधुसूदनवल्लभे ॥ ४९ ॥ प्रपांचकुरुतं मार्गेजनान्वीजयतंक्षणं ॥ मार्गेछायांविधत्तंचभूर्यन्नंदत्तमंबुच ॥ ५० ॥ कुरु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तंस्नानमुषसितथैवार्चयतंविभुं ॥ कथांचशृणुतंनित्यंयेनबंधोनिवर्तते ॥ ५१ ॥ एवंचबहुभिर्वाक्यैर्बोधितावपिदुर्मती ॥ क्रुद्धोऽभवंदंतिलोऽहंमत्तोऽहंकोहलाह्वयः ॥ ५२ ॥ क्रुद्धःशशापनौसद्यःपिताधर्मेषुलालसः ॥ पुत्रंचधर्मविमुखंभार्यांचाप्रियवादिनीं ॥ ५३ ॥ अब्रह्मण्यंचराजानंत्यजेत्सद्योऽन्यथाभवेत् ॥ दाक्षिण्यादर्थलोभाद्वासंसर्गंयेप्रकुर्वते ॥ ५४ ॥ तेसर्वेनरकंयांतियावदिंद्राश्चतुर्दश ॥ इतिज्ञात्वाशशापावांमदक्रोधपरिप्लुतौ ॥ ५५ ॥ क्रुद्धस्त्वंदंतिलोभूयाःसिंहःक्रोधपरिप्लुतः ॥ मत्तस्तुकोहलोभूयामत्तमातंगयूथपः ॥ ५६ ॥ कृतानुतापौपश्चात्तुप्रार्थयावविमोचनं ॥ आवाभ्यांप्रार्थितोभूयोविशापंचददौपिता ॥ ५७ ॥ युवांप्राप्यचदुर्योनिंकियत्कालांतरेपिच ॥ संगमोभवितातत्रप-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रस्परवधैषिणोः ॥ ५८ ॥ तस्मिन्नेवाहिसमयेसंवादोऽव्याधशंखयोः ॥ वैशाख-
धर्मविषयेदैवाद्वांश्रवणस्यच ॥ ५९ ॥ गमिष्यतिक्षणान्मार्गेतस्मान्मुक्तिर्भ-
विष्यति ॥ शापान्मुक्तौपूर्वमेवरूपमास्थायपुत्रकौ ॥ ६० ॥ मामेवप्राप्यवस-
तंनान्यथामेवचोभवेत् ॥ इतिशप्तौचगुरुणादुर्योनिंप्राप्यदुर्मती ॥ ६१ ॥ प्रा-
प्यदैवात्संगतिंचपरस्परवधैषिणौ ॥ संवादंयुवयोर्दिव्यंशुभंतंशुश्रुवावहे ॥ ६२ ॥
तेनसद्योविमुक्तिश्चक्षणादेवावयोरभूत् ॥ इतिसर्वंसमाख्यायप्रणम्यचमुनीश्व-
रं ॥ ६३ ॥ समामंत्र्याभ्यनुज्ञातौजग्मतुःपितुरंतिकं ॥ तदेवसंप्रदर्श्याहमुनि-
र्व्याधंदयानिधिः ॥ ६४ ॥ पश्यवैशाखमाहात्म्यश्रवणस्यफलंमहत् ॥ मुहू-
र्तश्रवणादेवतयोर्मुक्तिःकरेस्थिता ॥ ६५ ॥ इतिब्रुवाणंमुनिपुंगवंतंदयानिधिं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःस्पृहमग्न्यबुद्धिं ॥ विशुद्धसत्वंसुकृतैकपात्रंसंन्यस्तशस्त्रःपुराहव्याधः॥ ६६॥
इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेदंतिलकोइलयोर्मुक्तिप्रा-
प्तिर्नामषोडशोऽध्यायः ॥ १६ ॥ ॥ व्याधउवाच ॥ ॥ भवताऽनुगृहीतोऽ
स्मिमुनेपापोऽतिदुष्टधीः ॥ दयालवोमहांतोहिस्वभावादेवसाधवः ॥ १ ॥ क्क
वाव्याधकुलीनोहंक्कचवामतिरीदृशी ॥ केवलंभवतामेवमन्येऽनुग्रहमुत्तमं ॥२॥
अद्यसाधुचशिष्योऽस्मिकृपापात्रोऽस्मिमानद ॥ अनुग्राह्योऽस्मिपुत्रोऽस्मिकृ-
पांकुरुदयानिधे ॥ ३ ॥ यथामेनपुनर्भूयादसन्मतिरनर्थदा ॥ सद्भिश्चसंगतः
क्कापिनभूयोदुःखमश्नुते ॥ ४ ॥ तस्माद्बोधयमांविप्रसूक्तैस्तैर्वृजिनापहैः ॥ ये-
नचाद्धातरिष्यंतिसंसाराब्धिंमुमुक्षवः ॥ ५ ॥ साधूनांसमचित्तानांसर्वभूतद-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यावतां ॥ नहीनोनोत्तमःक्वापिनात्मीयोनपरस्तथा ॥ ६ ॥ एकमेवविचिन्वंतिचित्तशुद्धिंचपृच्छति ॥ सर्वदोषयुतोवापिसर्वधर्मोज्झितोऽपिवा ॥ ७ ॥ कृतानुतापश्चयदातदापृच्छतिवैगुरुं ॥ तदैवोपदिशंत्यद्धाज्ञानंसंसारमोचकं ॥ ॥ ८ ॥ यथागंगामनुष्याणांपापनाशस्वभाविनी ॥ तथामंदसमुद्धारस्वभावाः साधवःखलु ॥ ९ ॥ माविचारयमांबोद्धुंदयालोदीनवत्सल ॥ शुश्रूषुत्वात्प्रपन्नत्वाच्छुद्धत्वात्तवसंगतेः ॥ १० ॥ इतिव्याधवचःश्रुत्वापुनर्विस्मितमानसः ॥ साधुसाध्वितिसंभाष्यधर्मानेतानुवाचह ॥ ११ ॥ ॥ शंखउवाच ॥ ॥ विष्णुप्रीतिकरान्दिव्यान्संसाराब्धिविमोचकान् ॥ कुरुधर्मांश्चवैशाखेयदिव्याधशर्मिच्छसि ॥ १२ ॥ आतपोबाधतेघोरोनच्छायानांबुचात्रच ॥ तस्मात्स्थ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लांतरंयावोयत्रच्छायांबुवर्तते ॥ १३ ॥ तत्रगत्वाजलंपीत्वासुच्छायांचसमा-
श्रितः ॥ तत्रतेवर्णयिष्यामिमाहात्म्यंपापनाशनं ॥ १४ ॥ विष्णोर्माधवमा-
सस्ययथादृष्टंयथाश्रुतं ॥ इत्युक्तोमुनिनातेनव्याधःप्राहकृतांजलिः ॥ १५ ॥
इतोविदूरेसलिलंवर्ततेचसरोवरे ॥ कपित्थास्तत्रवैसंतिफलभारेणपीडिताः ॥
॥ १६ ॥ गच्छावस्तत्रसंतुष्टिर्भवितानात्रसंशयः ॥ व्याधेनैवंसमादिष्टस्ते-
नसाकंययौमुनिः ॥ १७ ॥ कियद्दूरंततोगत्वाददर्शाग्रेसरोवरं ॥ बककारंड-
वाकीर्णंचक्रवाकोपशोभितं ॥ १८ ॥ हंससारसक्रौंचाद्यैःसमंतात्परिशोभितं ॥
क्रीडत्कोकिलघोषैश्चकूजितंभ्रमरैरपि ॥ १९ ॥ नक्रकच्छपमीनाद्यैरगाह्यंसु-
मनोहरं ॥ कुमुदोत्पलकह्लारपुंडरीकाविलंमहत् ॥ २० ॥ शतपत्रैःकोकनदैः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समंतात्परिशोभितं ॥ पक्षिणांचकलारावैर्मुखरंनयनोत्सवं ॥ २१ ॥ तटे कीचकगुल्मैश्चरम्यवृक्षैश्चशोभितं ॥ वटैःकरंजैर्नीपैश्चातिंतिणीभिस्तथैवच ॥ ॥२२॥ निंबैःप्लक्षैःप्रियालैश्चपनसैश्चंपकैरपि ॥ पुंनागैस्तुवरैश्चैवकपित्थामलकैरपि ॥ २३ ॥ निष्पेषणैश्चजंबूभिःसमंतात्परिशोभितं ॥ वन्यमातंगसारंगवराहमहिषादिभिः ॥ २४ ॥ शशैश्चभल्लकैश्चैवगवयैरुपशोभितं ॥ खड्गाभिमृगाद्यैश्चव्याघ्रैःसिंहैर्वृकैस्तथा ॥ २५ ॥ खरांतकैश्चशरभैश्चमरीभिःसुमंडितं ॥ शाखाच्छाखांतरंशीघ्रंप्लवमानैःप्लवंगमैः ॥ २६ ॥ मार्जारैश्चैवभल्लूकैर्भीषणंरुरुभिस्तथा ॥ झिल्लीशब्दैश्चचक्रवाकैःकीचकानांरवैस्तथा ॥ २७ ॥ घोरवायुविनिर्घातदारुघर्षारवैर्वृतं ॥ एतादृशंसरोदिव्यंव्याधेनैवप्रदर्शितं ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ २८ ॥ ददर्शमुनिशार्दूलस्तृषयाबाधितोभृशं ॥ स्नात्वामध्याह्नवेलायांस-
रस्यस्मिन्मनोरमे ॥ २९ ॥ वाससीपरिधायाथकृत्वामाध्याह्निकीःक्रियाः ॥
देवपूजांततःकृत्वाभुक्त्वाफलमतंद्रितः ॥ ३० ॥ व्याधोपनीतंसुस्वादुकपित्थं
श्रमहारिच ॥ सुखोपविष्टःपप्रच्छव्याधंधर्मरतंपुनः ॥ ३१ ॥ किंवक्तव्यंमया
पृच्छतवादौधर्मतत्पर ॥ धर्माश्चबहवःसंतिनानामार्गाःपृथग्विधाः ॥ ३२ ॥
तत्रवैशाखमासोक्ताःसूक्ष्माअपिमहार्थदाः ॥ सर्वेषामेवजंतूनामिहामुत्रफल-
प्रदाः ॥ ३३ ॥ यत्प्रष्टव्यंमनसितेयच्चादौतच्चपृच्छमां ॥ इत्युक्तोमुनिनाते-
नव्याधःप्रांजलिरब्रवीत् ॥ ३४ ॥ ॥ व्याधउवाच ॥ ॥ केनवाकर्मणा
चासीद्व्याधजन्मतमोमयं ॥ केनवाचेदृशीबुद्धिःसंगतिर्वामहात्मनः ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतदादौममाचक्ष्वयदिमांमन्यसेप्रभो ॥ इत्युक्तःपुनरप्याहशंखोनाममहामुनिः ॥ ३६ ॥ मेघगंभीरयावाचास्मयमानमुखांबुजः ॥ ॥ शंखउवाच ॥ ॥ शाकलेनगरेपूर्वंद्विजस्त्वंवेदपारगः ॥ ३७ ॥ स्तंबोनाममहापापस्तथाश्रीवत्सगोत्रजः ॥ तवेष्टागणिकाकाचिदासीत्तत्संगदोषतः ॥ ३८ ॥ त्यक्त्वानित्यक्रियांनित्यंशूद्रवन्मूर्खमार्गतः ॥ शून्याचारस्यदुष्टस्यपरित्यक्तक्रियस्यच ॥ ॥ ३९ ॥ ब्राह्मणीचतदाचासीद्भार्याकांतिमतीतव ॥ सात्वांपर्यचरत्सुभ्रूःसवेश्यंब्राह्मणाधमं ॥ ४० ॥ उभयोःक्षालयंतीचपादांस्त्वत्प्रियकारिणी ॥ उभयोरप्यधःशेतेउभयोर्वचनेरता ॥ ४१ ॥ वेश्ययावार्यमाणापिहितकार्यैतयोः

१ स्मयमानं मंदहास्ययुतं । २ सेवामकरोत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थिता ॥ एवंशुश्रूषयंत्याहिभर्तारंवेश्ययासह ॥ ४२ ॥ जगामसुमहान्कालो दुःखितायामहीतले ॥ अपरस्मिन्दिनेभर्तामाहिष्यंमूलकान्वितं ॥ ४३ ॥ अभक्षयच्छूद्रधर्मानिष्पावांस्तिलमिश्रितान् ॥ तदपथ्यमशित्वातुवमंश्चैवविरेचयन् ॥ ४४ ॥ अपथ्याद्दारुणोरोगोऽयजायतभगंदरः ॥ सदह्यमानोरोगेण दिवारात्रंतुभूरिशः ॥ ४५ ॥ यावदास्तेगृहेवित्तंतावद्वेश्याचसंस्थिता ॥ गृहीत्वातस्यसावित्तंपश्चान्नोवासमंदिरे ॥ ४६ ॥ अन्यस्यपार्श्वमासाद्यगताघोरासुनिर्घृणा ॥ ततःसुदीनवचनोऽव्याधिबाधाप्रपीडितः ॥ ४७ ॥ उक्तवान्सरुदन्भार्यांरुजाऽव्याकुलमानसः ॥ परिपालयमांदेविवेश्यासक्तंसुनिष्ठुरं ॥ ४८ ॥

१ मलं विसृजन् । २ वासं न चकार । ३ रुजा पीडा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमयोपकृतंकिंचित्त्वयिसुंदरिपापिना ॥ कोभार्यांप्रणतांपापोनानुमन्येतगर्हि-
तः ॥ ४९ ॥ सषंढोभविताभद्रेदशजन्मानिपंचच ॥ दिवारात्रंमहाभागेनिं-
दितःसाधुभिर्जनैः ॥ ५० ॥ पापयोनिमवाप्स्यामित्वांसाध्वीमवमत्यवै ॥ अ-
हंक्रोधेनदग्धोऽस्मितवपुण्येनबोधितः ॥ ५१ ॥ एवंब्रुवाणंभर्त्तारंकृतांजलिपु-
टाऽब्रवीत् ॥ नदैन्यंभवताकार्यंनव्रीडाकांतमांप्रति ॥ ५२ ॥ नचापित्वयिमे
क्रोधोयेनदग्धेतिवक्ष्यासि ॥ पुराकृतानिपापानिदुःखानीहभवंतिहि ॥ ५३ ॥
तानियाक्षमतेसाध्वीपुरुषोवासउत्तमः ॥ यन्मयापापयापापंकृतंवैपूर्वजन्मनि
॥ ५४ ॥ तद्भुंजंत्यानमेदुःखंनविषादःकथंचन ॥ इत्येवमुक्त्वाभर्तारंसासुभ्रूर-
न्वपालयत् ॥ ५५ ॥ आनीयजनकाद्वित्तंबंधुभ्योवरवर्णिनी ॥ क्षीरोदवासि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंदेवंभर्तारंसमचिंतयत् ॥ ५६ ॥ शोधयंतीदिवारात्रौपुरीषंमूत्रमेवच ॥ न-
खेनकर्षतीभर्तुःकृमीन्कष्टाच्छनैःशनैः ॥ ५७ ॥ नसास्वपितिरात्रौतुनदिवाव-
रवर्णिनी ॥ भर्तुर्दुःखेनसंतप्तादुःखाच्चेदमवोचत ॥ ५८ ॥ देवाश्चपांतुभर्ता-
रंपितरोयेचविश्रुताः ॥ कुर्वंतुरोगहीनंमेभर्तारंहतकल्मषं ॥ ५९ ॥ चंडिका-
यैप्रदास्यामिरक्तमांससमुद्भवं ॥ सुष्ठ्वन्नंमहिषोपेतंभर्तुरारोग्यहेतवे ॥ ६० ॥
मोदकान्कारयिष्यामिविघ्नेशायमहात्मने ॥ मंदवारेकरिष्यामिचोपवासान्स-
दैवहि ॥ ६१ ॥ नोपभुंजामिमधुरंनोपभुंजामिवैघृतं ॥ तैलाभ्यंगविहीनाऽहं
स्थास्येनैवात्रसंशयः ॥ ६२ ॥ जीवतांरोगहीनोऽयंभर्तामेशरदांशतं ॥ एवं
साव्याहरद्देवीवासरेवासरेगते ॥ ६३ ॥ तदाचागान्मुनिःकश्चिन्महात्मादेव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लाह्वयः ॥ वैशाखेमासिघर्मार्तःसायाह्नेतस्यवैगृहं ॥ ६४ ॥ तदातुभार्यया चोक्तंभिषग्वैगृहमागतः ॥ तेनतेरोगहानिःस्यात्तस्यातिथ्यंकरोम्यहं ॥ ६५ ॥ ज्ञात्वात्वांधर्मविमुखंभिषग्व्याजेनवंचितः ॥ पादावनेजनंकृत्वातज्जलंमूर्ध्नि तेऽक्षिपत् ॥ ६६ ॥ पानकंचददौतस्मैघर्मार्तायमहात्मने ॥ त्वयाऽनुमोदिता सायंघर्मतापनिवारणं ॥ ६७ ॥ सप्रातरुदितेसूर्येमुनिःप्रायाद्यथागतं ॥ अ-थचाल्पेनकालेनसंनिपातोऽभवत्तव ॥ ६८ ॥ त्रिकूटंनीयमानायाभर्ताऽगुलिम-खंडयत् ॥ उभयोर्दंतयोःश्लेषःसहसासमपद्यत ॥ ६९ ॥ तत्खंडमंगुलेर्वक्त्रे स्थितंभर्तुःसुकोमलं ॥ खंडयित्वांऽगुलिंभर्तापंचत्वमगमत्क्षणात् ॥ ७० ॥ शय्यायांसुमनोज्ञायांस्मरंस्तांपुंश्चलींशुभां ॥ मृतंविज्ञायभर्तारंभार्याकांतिम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीतदा ॥ ७१ ॥ विक्रीयसास्ववलयंगृहीत्वाचेंधनंबहु ॥ चक्रेचितिंतेनसा-
ध्वीमध्येकृत्वापतिंतदा ॥ ७२ ॥ अवगूह्यभुजाभ्यांचपादौचाश्लिष्यपादयोः ॥
मुखेमुखंविनिक्षिप्यत्वृदयंत्वृदयेतथा ॥ ७३ ॥ जघनेजघनंदेवीह्यात्मनःसं-
निवेश्यच ॥ दाहयामासकल्याणीभर्तृदेहंरुजान्वितं ॥ आत्मनासहतन्वंगी
ज्वलितेजातवेदसि ॥ ७४ ॥ विमुच्यदेहंसहसाजगामपतिंसमालिंग्यमुरा-
रिलोकं ॥ पानीयदानेनचमाधवेऽस्मिन्पादावनेजादपियोगिगम्यं ॥ ७५ ॥
त्वमंतकालेगणिकाविचिंतयादेहंत्यक्त्वामुक्तसत्कर्मजातः ॥ जन्मव्याधंप्रा-
प्यतेघोररूपंहिंसासक्तःसर्वदोद्वेगकारी ॥ ७६ ॥ दत्तंत्वयापानकस्या-
पिदानेमासेऽनुज्ञामाधवेमासिसत्यं ॥ व्याजाद्दत्तातेःनजातासुबुद्धिर्धर्मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्प्रष्टुंसर्वसौख्यैकहेतून् ॥ ७७ ॥ धृतंमूर्ध्नापादशौचावशिष्टंजलंमुनेःसर्वपा-
पौघहारि ॥ तेनेयंतेसंगतिमेवनेऽस्मिन्ययाभूयात्संपदःसंततिश्च ॥ ७८ ॥
इत्येतत्सर्वमाख्यातंपूर्वजन्मनियत्कृतं ॥ कर्मपुण्यंपातकंचदृष्टंदिव्येनचक्षुषा
॥ ७९ ॥ गोप्यंवातेप्रवक्ष्यामियद्भवान्श्रोतुमिच्छति ॥ जातातेचित्तशुद्धिर्वै
स्वस्तिभूयान्महामते ॥ ८० ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांब-
रीषसंवादेव्याधोपाख्यानेव्याधस्यपूर्वजन्मकथनंनामसप्तदशोऽध्यायः ॥१७॥
॥ व्याधउवाच ॥ ॥ विष्णुमुद्दिश्यकर्तव्याधर्माभागवताःशुभाः ॥ तत्रापि
माधवीयाश्चइत्युक्तंतुत्वयापुरा ॥ १ ॥ सविष्णुःकीदृशोब्रह्मन्किंवातस्यहिल-
क्षणं ॥ किंमानंतस्यसद्भावेकैर्ज्ञेयोभगवान्विभुः ॥ २ ॥ कीदृशावैष्णवाधर्माः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केनवाप्रीयतेहरिः ॥ एतदाचक्ष्वमेब्रह्मन्किंकरायमहामते ॥ ३ ॥ इतिपृष्टस्तु व्याधेनपुनःप्राहसवैद्विजः ॥ प्रणम्यजगतामीशंनारायणमनामयं ॥ ४ ॥ ॥ शंखउवाच ॥ ॥ शृणुव्याधप्रवक्ष्यामिविष्णुरूपमकल्मषं ॥ यदचिंत्यं विरिंचाद्यैर्मुनिभिर्भावितात्मभिः ॥ ५ ॥ पूर्णशक्तिःपूर्णगुणोनिर्दिष्टःसकलेश्वरः ॥ निर्गुणोनिष्कलोऽनंतःसच्चिदानंदविग्रहः ॥ ६ ॥ यदेतदखिलंविश्वंचराचरमतोंद्रितः॥ साधीशंसाश्रयंयच्चयद्वशेनियतंस्थितं ॥ ७ ॥ अथतेलक्षणंवच्मिब्रह्मणःपरमात्मनः ॥ उत्पत्तिस्थितिसंहाराव्यावृत्तिर्नियमस्तथा ॥ प्रकाशोबंधमोक्षौचवृत्तिर्यस्माद्भवंत्यमी ॥ सविष्णुर्ब्रह्मसंज्ञोऽसौकवीनांशाश्वतोविभुः ॥ ९ ॥ साक्षाद्ब्रह्मेतितंप्राहुःपश्चाद्ब्रह्मादिकानपि ॥ ब्रह्मशब्दंसोपपदं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मादिषुविदोविदुः ॥ १० ॥ नान्येषांब्रह्मताक्कापितच्छत्तयेकांशभागिनां ॥
तदेतच्छास्त्रगम्यंहिजन्माद्यस्यमहाविभोः ॥ ११ ॥ शास्त्रंचवेदाःस्मृतयःपुरा-
णंचैतदात्मकं॥ इतिहासःपंचरात्रंभारतंचमहामते ॥ १२ ॥ एतैरेवमहाविष्णु-
र्ज्ञेयोनान्यैःकथंचन ॥ नावेदविदमुंविष्णुंमनुतेचवरंक्वचित् ॥ १३ ॥ नेंद्रियै-
र्नानुमानैश्चनतर्कैःशक्यतेविभुं ॥ ज्ञातुंनारायणंदेवंवेदवेद्यंसनातनं ॥ १४ ॥
अस्यैवजन्मकर्माणिगुणान्ज्ञात्वायथामति ॥ मुच्यंतेजीवसंघाश्चसदातद्वशव-
र्तिनः ॥ १५ ॥ क्रमाद्विष्णोश्चमाहात्म्यंयथासातिशयंभवेत् ॥ एकैकस्मिन्स्थि-
तांशक्तिंदेवर्षिपितृपादितां ॥ १६ ॥ प्रत्यक्षेणागमेनापितथैवानुमयापिच ॥
आदौनरोत्तमंविद्याद्बलेज्ञानेसुखेतथा ॥ १७ ॥ तस्माद्रूपंशतगुणंविद्यादज्ञाना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिभिर्वृतं ॥ भूपान्मनुष्यगंधर्वांस्तेभ्यआजानजान्सुरान् ॥१८॥ आजानेभ्यः कर्मजांश्चविद्याच्छतगुणाधिकान् ॥ तत्वाभिमानिनोदेवांस्तेभ्योविद्याच्छताधिकान् ॥१९॥ तत्वाभिमानिदेवेभ्यःसप्तवाऋषयोवराः ॥ सप्तर्षिभ्योवरोह्यग्निरग्नेःसूर्योयमस्तथा ॥ २० ॥ सूर्याद्गुरुर्गुरोःप्राणःप्राणादिंद्रोमहाबलः ॥ इंद्राच्च गिरिजादेवीदेव्याःशंभुर्जगद्गुरुः ॥ २१ ॥ शंभोर्बुद्धिर्महादेवीबुद्धेःप्राणोबलाधिकः ॥ नप्राणात्परमंकिंचित्प्राणेसर्वंप्रतिष्ठितं ॥२२॥ प्राणाज्जातमिदंसर्वंप्राणादेवहिचेष्टितं ॥ सर्वाधारमिमंप्राहुःसूत्रंनीलांबुदप्रभं ॥२३॥ लक्ष्मीकटाक्षमात्रेणप्राणस्यास्यस्थितिर्भवेत् ॥ सालक्ष्मीर्देवदेवस्यकृपालेशैकभागिनी ॥ २४ ॥ नविष्णोःपरमंकिंचिन्नसमोवाकथंचन ॥ ॥ व्याधउवाच ॥ ॥ कथंजीवेष्वयं

For Private and Personal Use Only

प्राणःसूत्रनामाधिकोऽभवत् ॥ २५ ॥ निर्णयोवाकथंह्यस्यप्राणाधिक्येकथंवि-
भो ॥ एतदाचक्ष्वमेब्रह्मन्कथंप्राणाद्विभुःपरः ॥ २६ ॥ शंखउवाच ॥ ॥ शृ-
णुव्याधप्रवक्ष्यामियत्पृष्टंनिर्णयेत्वया ॥ प्राणाधिक्यंसमुद्दिश्यजीवैश्वसकलैर-
पि ॥ २७ ॥ पुरानारायणोदेवःपद्मसृष्टौसनातनः ॥ सृष्ट्वाब्रह्मादिकान्देवानिदं
प्राहजनार्दनः ॥ २८ ॥ साम्राज्येऽहंस्थापयेयंब्रह्माणंवःपतिंप्रभुं ॥ योयुष्मा-
स्वधिकोदेवोयौवराज्येसुरेश्वराः ॥ २९ ॥ तंस्थापयतशीलाढ्यंशौर्यौदार्यगु-
णान्वितं ॥ इत्युक्ताविभुनादेवाःसर्वेशक्रपुरोगमाः ॥३०॥ एवंविवादिनोऽन्यो-
न्यमहंभूयामहंत्विति ॥ सर्वेविवदमानाश्चसूर्येकेचित्परंजगुः ॥ ३१ ॥ शक्रंके-
चित्परंकालंकेचित्तूष्णींवितष्ठिरे ॥ तेनिर्णयमपश्यंतःप्रष्टुंनारायणंययुः ॥३२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नमस्कृत्यपुनःप्राहुःसर्वेप्रांजलयोऽमराः ॥ विचारितंमहाविष्णोसर्वैरस्माभिरं-
जसा ॥ ३३ ॥ नास्मासुदेवमधिकंद्रक्ष्यामोहिकथंचन ॥ त्वमेवनिर्णयंब्रूहिदे-
वाःसंशयिनोऽभवन् ॥ ३४ ॥ इतिपृष्टोऽमरैःसर्वैःप्रहसन्निदमब्रवीत् ॥ देहाद-
स्माच्चवैराजाद्यस्मिन्निष्क्रामतिह्ययं ॥ ३५ ॥ पतिष्यतिप्रविष्टेतुयस्मिन्वाउ-
त्थितोभवेत् ॥ सदेवोह्यधिकोनूनंनापरस्तुकथंचन ॥ ३६ ॥ इत्युक्तास्तेततः
सर्वेतथास्त्वितिवचोऽब्रुवन् ॥ निश्चक्रामजयंताह्वःपादात्पूर्वंसुरेश्वरः ॥३७॥ त-
दापंगुममुंप्राहुर्नदेहःपतितस्तदा ॥ शृण्वन्पिबन्वदन्जिघ्रन्पश्यन्नास्तेचलन्नपि
॥ ३८ ॥ पश्चाद्गुह्याद्विनिष्क्रांतोदक्षोनामप्रजापतिः ॥ तदाषंढममुंप्राहुर्नदेहः०
॥ ३९ ॥ शृण्वन्पिबन्व० ॥ पश्चाद्धस्ताद्विनिष्क्रांतइंद्रःसर्वामरेश्वरः ॥४० ॥

For Private and Personal Use Only

हस्तहीनममुंप्राहुर्नदेहः० ॥ शृण्वन्पिबन्वदन्० ॥ ४१ ॥ लोचनाभ्यांविनिष्क्रांतःसूर्यस्तेजस्विनांवरः॥ तदांऽधकममुंप्राहुर्नदेहः० ॥ ४२ ॥ शृण्वन्पिब० ॥ घ्राणात्पश्चाद्विनिष्क्रांतौनासत्यौविश्वभेषजौ ॥ अजिघ्राणममुंप्राहुर्नदेहः० ॥ ४३ ॥ शृण्वन्पिबन्श्वसन्नास्तेवदन्नपिचलन्नपि ॥ श्रोत्राद्दिशोविनिष्क्रांतानदेहः० ॥ तदाऽमुंबधिरंप्राहुर्नमृतेतिकथंचन ॥ ४४ ॥ श्वसन्पिबन्वदन्नास्तेनदन्नपिचलन्नपि ॥ वरुणोरसनायास्तुविनिष्क्रांतस्ततःपरं ॥ तदाऽरसज्ञमेवाहुर्नदेहः० ॥ ४५ ॥ जीवन्नदंश्चलन्नास्तेतथाजिघ्रन्श्वसन्नपि ॥ ततोवाचोविनिष्क्रांतोवह्निर्वागीश्वरोविभुः ॥ ४६ ॥ तदामूकममुंप्राहुर्नदेहः० ॥ जीवन्छ्वसंश्चलन्नास्तेजानन्नेषपुनःपुनः ॥ ४७॥ पश्चाद्रुद्रोविनिष्क्रांतोमनसोबो-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनात्मकात् ॥ तदाजडममुंप्राहुर्नदेहः० ॥४८॥ श्वसंश्चलंस्तथाचास्तेनमृतेतिचतंविदुः ॥ पश्चात्प्राणोविनिष्क्रांतोमृतमेनंतदाविदुः ॥ पुनरेवंतदाप्राहुर्देवाविस्मितमानसाः ॥४९॥ देहमुत्थापयेद्यस्तुपुनरेवंव्यवस्थितः ॥ सएवह्यधिकोऽस्मासुयुवराजोभविष्यति ॥ ५० ॥ इत्येवंतुप्रतिश्रुत्यविविशुश्चयथाक्रमं ॥ जयंतःप्राविशत्पादौनोत्तस्थौतत्कलेवरं ॥ ५१ ॥ गुह्यंचप्राविशद्दक्षोनोत्तस्थौ० ॥ इंद्रोहस्तौविवेशाथनोत्तस्थौ० ॥५२॥ दिशःश्रोत्रंप्रविविशुर्नोत्तस्थौ० ॥ चक्षुःसूर्यःप्रविष्टोऽभून्नोत्तस्थौ० ॥ ५३ ॥ नासांविविशतुर्दस्त्रौनोत्तस्थौ० ॥ वरुणःप्राविशज्जिह्वांनोत्तस्थौ० ॥ ५४ ॥ वह्निश्चप्राविशद्वाचंनोत्तस्थौ० ॥ मनासिप्राविशद्रुद्रोनोत्तस्थौतत्कलेवरं ॥ ५५ ॥ पश्चात्प्राणोविवे-

For Private and Personal Use Only

शासौतदोत्तस्थौकलेवरं ॥ तदादेवाविनिश्चित्यप्राणंदेवाधिकंविभुं ॥ ५६ ॥
बलेज्ञानेचधैर्येचवैराग्येप्राणनेपिच ॥ ततोऽभिषेचयांचक्रुर्यौवराज्येमहाप्रभुं ॥
॥ ५७ ॥ उत्कृष्टस्थितिहेतुत्वादुक्थमेकंतदाजगुः ॥ तस्मात्प्राणात्मकंविश्वंस-
र्वंस्थावरजंगमं ॥ ५८ ॥ अंशैःपूर्णैर्बलाद्यैश्चपूर्णोऽयंजगतांपतिः ॥ नप्राणहीनं
जगदस्तिकिंचित्प्राणेनहीनंनचवैसमेधते ॥ ५९ ॥ प्रातेनहीनंस्थितिमन्नकिं-
चित्प्राणेनहीनंनचकिंचिदस्ति ॥ तस्मात्प्राणःसर्वजीवाधिकोऽभूद्बलाधिकः
सर्वजीवांतरात्मा ॥ ६० ॥ प्राणात्कोपिह्यधिकोवासमोवाशास्त्रेदृष्टःश्रुतपूर्वो
नचास्ते ॥ तत्तत्कार्यानुगःप्राणएकोदेवोह्यनेकधा ॥ ६१ ॥ तस्मात्प्राणंवरंप्रा-
हुःप्राणोपासनतत्पराः ॥ लीलयैवजगत्स्रष्टुंहंतुंपालयितुंप्रभुः ॥ ६२ ॥ शेषा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिशिवशक्राद्यांश्चेतनांश्चजडानिमान् ॥ वासुदेवादृतेकोपिनैनंपरिभाविष्यति ॥ ॥ ६३ ॥ सर्वदेवात्मकःप्राणःसर्वदेवमयोविभुः ॥ वासुदेवानुगोनित्यंसदावि-ष्णुवशेस्थितः ॥ ६४ ॥ वासुदेवप्रतीपंतुनशृणोतिनपश्यति ॥ देवाःप्रतीपं कुर्वंतिरुद्रेंद्राद्याःसुरेश्वराः ॥ ६५ ॥ प्रतीपंक्वापिकुरुत्तेनप्राणःसर्वगोचरः ॥ तस्मात्प्राणान्महाविष्णोर्बलमाहुर्मनीषिणः ॥ ६६ ॥ एवंज्ञात्वामहाविष्णोर्मा-हात्म्यंलक्षणंतथा ॥ पूर्वबंधानुगंलिंगंजीर्णांत्वचमिवोरगः ॥ ६७ ॥ विसृज्य परमंयातिनारायणमनामयं ॥ श्रुत्वाशंखोदितंवाक्यंपुनर्व्याधःप्रसन्नधीः ॥ ॥ ६८ ॥ प्रश्रयावनतोभूत्वापुनःपप्रच्छतंमुनिं ॥ ब्रह्मन्महानुभावस्यप्राण-स्यास्यजगद्गुरोः ॥ ६९ ॥ नख्यातोमहिमालोकेकथंसर्वेश्वरस्यवै ॥ देवानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चमुनीनांचभूपानांचमहात्मनां ॥ ७० ॥ महिमाश्रूयतेलोकेपुराणेषुसहस्रशः
॥ एतदाचक्ष्वमेब्रह्मन्श्रोतुंकौतूहलंहिमे ॥ ७१ ॥ ॥ शंखउवाच ॥ ॥
पुराप्राणोहरिंदेवंनारायणमनामयं ॥ अश्वमेधैर्यष्टुकामोगंगातीरंययौमुदा ॥
॥ ७२ ॥ हलैश्चकारभूशुद्धिंनानामुनिगणैर्युतः॥ अंतर्वल्मीकलीनस्तुकण्वोना-
मसमाधिगः ॥ ७३ ॥ हलोत्कृष्टोविनिष्क्रांतःक्रोधादिदमुवाचह ॥ दृष्ट्वापुरः
स्थितंप्राणंशशापहमहाविभुं ॥ ७४ ॥ अद्यप्रभृतिनख्यातिंमहिमाभुवनत्रये
॥ तवप्राप्नोतिदेवेशभूलोकेतुविशेषतः ॥ ७५ ॥ प्रख्यातास्तेभविष्यंतिह्यव-
ताराजगत्त्रये ॥ इत्युक्तोमुनिनातेनवायुःक्रोधात्तमब्रवीत् ॥ ७६ ॥ विनापरा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धंशप्तो[1]ऽसितितिक्षुंमांनिरागसं ॥ तस्मात्कण्वमहाबाहोगुरुद्रोहीभवाशुच ॥
॥ ७७ ॥ लोकेनिंदितवृत्तिश्चभवेत्याहसदागतिः[2] ॥ ततःप्रभृतिलोकेऽस्मिन्प्रा-
णस्यास्यमहाप्रभो ॥ ७८ ॥ नख्यातोमहिमालोकेभूलोकेतुविशेषतः ॥ शा-
पात्कण्वोगुरुद्रोहीसूर्यशिष्योऽभवत्तदा ॥ ७९ ॥ इत्येतत्कथितंसर्वंयत्पृष्टंतु
त्वयाऽधुना ॥ यच्छ्रोतव्यमितोव्याधपृच्छमामाविचारय[3] ॥ ८० ॥ इतिश्री-
स्कंदपुराणे वैशाखमाहात्म्ये नारदांबरीषसंवादे वायुशापकथनंनामाष्टादशोऽ
ध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ व्याधउवाच ॥ किंजीवाविभुनासृष्टाःको-
टिशोऽथसहस्रशः ॥ देहद्वारेणवासृष्टाःसृष्टाश्चेतिविनिश्चितं ॥ १ ॥ दृश्यंते

१ शापं दत्तवानसीत्यर्थः । २ वायुः । ३ शंकां मा कुर्वित्यर्थः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिन्नकर्माणोनानामार्गाःसनातनाः ॥ नैकस्वभावाएतेहिकुतएवंमहामते ॥२॥
तदेतत्पृच्छतेमह्यंविस्तरात्तत्वतोवद ॥ ॥ शंखउवाच ॥ ॥ त्रिविधाजीवसं-
घाहिरजःसत्वतमोगुणाः ॥ ३ ॥ राजसाराजसंकर्मतामसास्तामसंतथा ॥ सा-
त्विकाःसात्विकंकर्मकुर्वंत्येतेयथाक्रमं ॥ ४ ॥ क्वचिच्चगुणवैषम्यमेतेषांसंसृतौ
भवेत् ॥ तेनैवोच्चावचंकर्मकुर्वंतःफलभागिनः ॥५॥ क्वचित्सुखंक्वचिद्दुःखंक्वचि-
च्चोभयमेवच ॥ गुणानामेववैषम्यात्प्राप्नुवंतिनराइमे ॥ ६ ॥ प्रकृतिस्थाइमे
जीवाबद्धाएतैर्गुणैस्त्रिभिः ॥ गुणकर्मानुरूपेणकर्मणोऽव्यत्ययःफलं ॥ ७ ॥ गु-
णानुगुणभूयस्त्वेप्रकृतिंयांत्यमीजनाः॥प्रकृतिस्थाःप्रकृतिजागुणकर्माभिपूरिताः
॥ ८ ॥ गतिंप्राकृतिकींयांतिऽव्यत्ययःप्रकृतेर्नहि ॥ तामसादुःखबहुलाःसदा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तामसवृत्तयः ॥ ९ ॥ निर्दयानिष्ठुराःक्रूरालोकद्वेषैकजीविनः ॥ राक्षसाद्याःपि-
शाचांतास्तामसींयांतिवैगतिं ॥१०॥ राजसामिश्रमतयःकर्तारःपुण्यपापयोः॥
पुण्यात्स्वर्गंप्राप्नुवंतिक्वचित्पापाच्चयातनां ॥ ११ ॥ अतएतेमंदभाग्याआव-
र्तंतेपुनःपुनः॥ धर्मशीलादयावंतःश्रद्धावंतोऽनसूयकाः ॥१२॥ सात्विकाःसात्वि-
कींवृत्तिमनुतिष्ठंतआसते ॥ तेचोर्ध्वंयांतिविमलागुणापायेमहौजसः ॥१३॥
अतोविभिन्नकर्माणोनानारूपाःपृथग्विधाः॥ गुणकर्मानुरूपेणतेषांविष्णुर्महाप्र-
भुः ॥ १४ ॥ कर्माणिकारयत्यद्धास्वस्वरूपाश्रयेविभुः ॥ विष्णोर्वैषम्यनैर्घृण्ये
पूर्णकामस्यनैवहि ॥ १५ ॥ सृष्टिंस्थितिंल्हतिंचैवसमामेवकरोत्ययं॥ स्वगुणा-
नुगुणाएतेकर्मणःफलभागिनः ॥ १६ ॥ आरामोत्तायथासर्वान्समंवर्धयतिद्रु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मान् ॥ एककुल्याजलाद्यंगाद्रुमाश्वप्रकृतिंगताः ॥ १७ ॥ नारामोप्तरिवै-
षम्यंनैर्घृण्यंवाकदाचन ॥ ॥ व्याधउवाच ॥ ॥ जीवानांपूर्णभो-
गानांकदामुक्तिर्भवेन्मुने ॥ १८ ॥ सृष्टिकालेऽथवाह्यंतकालेवास्थापनस्य
वा ॥ क्वचिच्चसृष्टिकालस्यसंहारस्यापिवैस्थितेः ॥ १९ ॥ एतद्विस्तार्यमे
ब्रह्मन्भगवच्चेष्टितंवद ॥ ॥ शंखउवाच ॥ ॥ चतुर्युगसहस्राणिब्रह्मणोदि-
नमुच्यते ॥ २० ॥ रात्रिश्चतावतीतस्यह्यहोरात्रंदिनंभवेत् ॥ दशपंचदिना-
न्याहुःपक्षंमासोद्वयात्मकः ॥ २१ ॥ मासद्वयमृतुंप्राहुरयनंचऋतुत्रयं ॥ अ-
यनेद्वेवत्सरःस्यात्तादृक्शतसमायदि ॥ २२ ॥ गच्छंतिब्रह्मणोह्यस्यब्रह्मक-
ल्पंतदाविदुः ॥ तावान्हिप्रथमःकल्पइतिवेदविदांमतं ॥ २३ ॥ प्रलयस्त्रिवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धःप्रोक्तोमानवोमानवेऽत्यये ॥ दैनंदिनोद्वितीयोहिब्रह्मणोदिवसात्यये ॥२४॥ ब्रह्मणोऽथलयेपश्चाद्ब्राह्मंचप्रलयंविदुः ॥ ब्रह्मणस्तुमुहूर्तेतुमनोस्तुप्रलयोभवे-त् ॥ २५ ॥ प्रलयेषुव्यतीतेषुचतुर्दशसुवैक्रमात् ॥ दैनंदिनंलयंप्राहुःप्रलया-नांस्थितिंपुनः ॥ २६ ॥ त्रयाणामेवलोकानांलयोमन्वंतरेभवेत् ॥ चेतनानां तदानाशोनलोकानांक्षयोभवेत् ॥ २७ ॥ उदकैरेवपूर्तिश्चयथापूर्वंतथापुनः ॥ मन्वंतरांतेभूयात्तुचेतनानांपुनर्भवः ॥ २८ ॥ दैनंदिनलयेऽव्याधसर्वस्यापिक्ष-योभवेत् ॥ सत्यलोकंविनासर्वेलोकानश्यंतिसाधिपाः ॥ २९ ॥ सचेतनाः साधिभूताःप्रसुप्तेचतुरानने ॥ तत्वाभिमानिनोदेवाःकेचिच्चमुनयस्तथा ॥ ॥ ३० ॥ शिष्यंतिसुप्ताःसर्वेपिसत्यलोऽव्यवास्थिताः ॥ तत्वाभिमानिनोदेवा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ब्रह्मलोकेऽव्यवस्थिताः ॥ ३१ ॥ तिष्ठंतिसुप्तिमापन्नायावत्कल्पमतंद्रिताः ॥ पुनर्निशात्ययेब्रह्मायथापूर्वमकल्पयत् ॥ ३२ ॥ ऋषीन्देवान्पितॄंल्लोकान्धर्माधर्मान्पृथक्पृथक् ॥ पुनर्दशावताराहिविष्णोर्देवस्यचक्रिणः ॥ ३३ ॥ नियमेन भवंत्येतेतथान्येऽपिचभूरिशः ॥ देवताऋषयश्चैवआकल्पंचागिरांपते: ॥३४॥ पुनरेवाभिवर्तंतेब्रह्मणासहमुक्तिगाः ॥ भूपाश्चसाधवोयेचसिद्धिंप्राप्ताःपरंगताः ॥ ३५ ॥ तेनैवचाभिवर्त्ततेसत्यलोकव्यवस्थिताः॥ तद्राशिगाःपुनर्यांतितन्नाम्नाश्रुतिसंस्थिताः ॥३६॥ तत्तद्गोत्रेषुजायंतेतत्तत्कर्मरताःसदा ॥ दैत्यानामपिसर्वेषांयदाकलियुगात्ययः ॥३७॥ कलिनासहगच्छंतियांगातिंनिरयालयाः ॥ तेषांचराशिसंस्थायेतन्नामानोऽपरेपिच ॥ ३८ ॥ जायंतेकर्मणास्वेनतत्तत्क-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्मविधायकाः ॥ सृष्टिकालंप्रवक्ष्यामिमुक्तिकालंतथैवच ॥ ३९ ॥ ब्रह्मादीनां
चदेवानांसमाहितमनाभव ॥ निमेषोदेवदेवस्यब्रह्मकल्पसमोमतः ॥ ४० ॥
तस्यावसानेचोन्मेषोदेवदेवशिखामणेः ॥ निमेषांतेभवेदिच्छास्त्रष्टुंलोकांश्चकु-
क्षिगान् ॥४१॥ सोऽपश्यत्स्वोदरेसर्वान्जीवसंघाननेकशः॥ सृज्यान्मुक्तानमु-
क्तांश्चलिंगभंगमुपागतान् ॥ ४२ ॥ सुप्ताःसृतिस्थाःसर्वेपितमोगाअपिसर्वशः
॥ पूर्वकल्पेलिंगभंगमापन्नाविधिपूर्वकाः ॥ ४३ ॥ मानवांताजीवकोशाजीव-
न्मुक्ताश्चमुक्तिगाः ॥ पूर्वकल्पेविमुक्ताश्चब्रह्माद्यामानवांतकाः ॥ ४४ ॥ ध्या-
नसंस्थाहितिष्ठंतिविष्णुकुक्षिगताअपि ॥ उन्मेषप्रथमेभागेचतुर्व्यूहात्मकोवि-
भुः॥ ४५ ॥ भूत्वातुपूर्वषाड्गुण्याद्वासुदेवाच्चव्यूहगात् ॥ दत्वातुब्रह्मणोमुक्तिं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सायुज्याख्यांमहाविभुः ॥ ४६ ॥ सालोक्यंचयथान्यायंदत्वादेवोजनार्दनः ॥
प्रद्युम्नस्यवशेसर्वान्स्थितांल्लोकानलोकयत् ॥ ४७ ॥ अनिरुद्धवशेदत्वासृष्टिं
कर्तुंमनोदधे ॥ मायांजयांकृतिंशांतिमुपयेमेस्वयंहरिः ॥ ४८ ॥ चतुर्व्यूहैःपू-
र्णगुणैर्वासुदेवादिभिःक्रमात् ॥ ताभिर्युक्तोमहाविष्णुश्चतुर्व्यूहोमहाविभुः॥४९॥
भिन्नकर्माश्रयंलोकंपूर्णकामोऽव्यजीजनत् ॥ उन्मेषांतेपुनर्विष्णुर्योगमायामुपा-
श्रितः ॥ ५० ॥ संकर्षणाद्व्यूहनाच्चहरत्येतच्चराचरं ॥ तदेतत्सर्वमाख्यातं
कर्माचिंत्यंमहात्मनः ॥ ५१ ॥ यदचिंत्यंदुर्विभाव्यंब्रह्माद्यैरपियोगिभिः ॥
॥ व्याधउवाच ॥ ॥ केवाभागवताधर्माःकैर्विष्णुश्चप्रसीदति ॥ ५२ ॥ ता-
नहंश्रोतुमिच्छामिसांप्रतंवदमांमुने ॥ ॥ शंखउवाच ॥ ॥ येनचांतर्विशु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्भिःस्याद्यःसतामुपकारकः ॥ ५३ ॥ तंविद्धिसात्विकंधर्मंयश्चकेनाप्यनिंदितः
॥ श्रुतिस्मृत्युदितोयस्तुयदिनिष्कामकोभवेत् ॥ ५४ ॥ यस्तुलोकाविरुद्धोऽ
पितंधर्मंसात्विकंविदुः ॥ चतुर्विधाहितेधर्मावर्णाश्रमविभागतः ॥ ५५ ॥ नि-
त्यानैमित्तिकाःकाम्याइतितेचत्रिधामताः॥ तेसर्वेपिहिधर्माश्चयदाविष्णौसम-
र्पिताः॥५६॥ तदावैसात्विकोज्ञयाधर्माभागवताःशुभाः॥येदेवांतरदेवत्याःसका-
माराजसामताः ॥ ५७ ॥ यक्षरक्षःपिशाचादिदेवत्यालोकनिष्ठुराः ॥ हिंसा-
त्मकानिंदिताश्चधर्मास्तेतामसाःस्मृताः ॥ ५८ ॥ सत्वस्थाःसात्विकान्धर्मा-
न्विष्णुप्रीतिकरान्शुभान् ॥ कुर्वंत्यनीहयानित्यंतेवैभागवताःस्मृताः ॥ ५९ ॥
येषांचित्तेसदाविष्णुर्जिह्वायांनामवैहरेः ॥ पादौचत्हृदयेयेषांतेवैभागवताः० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ६० ॥ सदाचाररतायेचसर्वेषामुपकारकाः ॥ सदैवममताहीनास्तेवै० ॥
॥ ६१ ॥ येषांचशास्त्रेविश्वासोगुरौसाधुषुकर्मसु ॥ येविष्णुभक्ताःसततंतेवै०
॥ ६२ ॥ येषांहिसंमताधर्माःशाश्वताविष्णुवल्लभाः ॥ श्रुतिस्मृत्युदितायेच
तेधर्माःसात्विकामताः ॥ ६३ ॥ अटनंसर्वदेशेषुवीक्षणंसर्वकर्मणां ॥ श्रवणं
सर्वधर्माणांविषयासक्तचेतसां ॥ ६४ ॥ अकिंचित्करमेतेषांषंढस्येववरास्त्रियः
॥ साधूनांदर्शनेनैवमनोद्रवतिवैसतां ॥ ६५ ॥ चंद्रस्यकौमुदीसंगाच्चंद्र-
कांतशिलायथा ॥ क्वचित्सच्छास्त्रश्रवणाद्विषयेभ्योज्वलन्मनः ॥ ६६ ॥ ति-
ष्ठत्येवसतांपुंसांतेजोरूपमकल्मषं ॥ पद्मबंधोःप्रभासंगात्सूर्यकांतशिलायथा
॥ ६७ ॥ निष्कामैर्हिजनैर्यस्तुश्रद्धयासमुपार्जितः ॥ योविष्णुवल्लभोनित्यंध-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोभागवतोमतः ॥ ६८ ॥ तैर्दृष्टाबहवोधर्माइहामुत्रफप्रदाः ॥ विष्णुप्रीतिक-
राःसूक्ष्माःसर्वदुःखविमोचकाः ॥ ६९ ॥ उद्धृत्यसर्वशास्त्राणिधर्मंवैशाखसंभ-
वं ॥ रमायैभगवानाहक्षीराब्धौहितकाम्यया ॥ ७० ॥ मार्गेच्छायाविनिर्माणं
प्रपादानंचवैतथा ॥ व्यजनैर्वीजनंचैवप्रश्रयाणांसमर्पणं ॥ ७१ ॥ छत्रस्यो-
पानहोर्दानंदानंकर्पूरगंधयोः ॥ वापीकूपतडागानांतटेपानाविमोचनं ॥ ७२ ॥
सायाह्नेपानकस्यापिदानामिक्षुरसस्यच ॥ तांबूलदानंपापघ्नंरोगघ्नंतुविशेष-
तः ॥ ७३ ॥ लवणान्विततक्रस्यदानंश्रांतायवैपथि ॥ अभ्यंगकरणंचैवद्विज-
पादावनेजनं ॥ ७४ ॥ कटकंवलपर्यंकदानंगोदानमेवच ॥ मधुयुक्तांतिला-
नांचदानंपापविनाशनं ॥ ७५ ॥ सायाह्नेचेक्षुदंडानांदानमुर्वारुकस्यच ॥ र-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सायनप्रदानंचपितृनिर्वापणंतथा ॥ ७६ ॥ एतेधर्माविशिष्योक्तामासेऽस्मि-
न्माधवप्रिये ॥ प्रातःसूर्योदयेस्नात्वाशृण्वन्द्विजकुलेरितं ॥ ७७ ॥ नित्यकर्मा-
णिकृत्वैवमधुसूदनमर्चयेत् ॥ कथांमाधवमासीयांशृणुयाच्चसमाहितः॥ ७८ ॥
तैलाभ्यंगंवर्जयेच्चकांस्यपात्रेतुभोजनं ॥ निषिद्धभक्षणंचैववृथालापंचवर्जये-
त् ॥ ७९ ॥ अलाबुगृंजनंचैवलशुनंतिलपिष्टकं ॥ आरनालंभिस्सटांचघृत-
कोशातकींतथा ॥ ८० ॥ उपोदकींकलिंगंचशिग्रुशाकंजवर्जयेत् ॥ निष्पावां-
श्चकुलित्थानिमसूराणिचवर्जयेत् ॥ ८१ ॥ वृंताकानिकलिंगानिकोद्रवाणिचव-
र्जयेत् ॥ तंडुलीयकशाकंचकौसुंभंमूलकंतथा ॥ ८२ ॥ औदुंबरंबिल्वफलंतथा
श्लेष्मातकीफलं ॥ सर्वथावर्जयेद्विद्वान्मासेऽस्मिन्माधवप्रिये ॥ ८३ ॥ एतेष्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यतमंभुक्त्वासचांडालोभवेद्ध्रुवं ॥ तिर्यग्योनिशतंयातिनात्रकार्याविचारणा ॥ ८४ ॥ एवंमासव्रतंकुर्यात्प्रीतयेमधुघातिनः ॥ एवंव्रतेसमाप्तेतुप्रतिमांकारयेद्विभोः ॥ ८५ ॥ मधुसूदनदेवत्यांसवस्त्रांचसदक्षिणां ॥ स्वर्चितांविभवैःसवैर्ब्राह्मणायनिवेदयेत् ॥ ८६ ॥ वैशाखेमासिद्वादश्यांदद्याद्दध्यन्नमंजसा ॥ सोदकुंभंसतांबूलंसफलंचसदक्षिणं ॥ ८७ ॥ ददामिधर्मराजायतेनप्रीणातुवैयमः ॥ अपसव्यात्समुच्चार्यनामगोत्रेपितॄंस्ततः ॥ ८८ ॥ दद्याद्दध्यन्नमक्षय्यंपितॄणांमुक्तिहेतवे ॥ गुरुभ्यश्चतथादद्यात्पश्चाद्दद्याच्चविष्णवे ॥ ८९ ॥ शीतलोदकदध्यन्नंकांस्यपात्रस्थमुत्तमं ॥ सदक्षिणंसतांबूलंसभक्ष्यंचफलान्वितं ॥ ९० ॥ ददामिविष्णवेतुभ्यंविष्णुलोकजिगीषया ॥ इतिदत्वायथाश-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्तयागांचदद्यात्कुटुंबिने ॥ ९१ ॥ एवंमासव्रतंकुर्यात्सदादंभविवर्जितः ॥ सस-
र्वैःपातकैर्हीनःकुलान्युद्धृत्यवैशतं ॥ ९२ ॥ पश्यतामेवभूतानांभित्त्वावैसूर्यमंड-
लं ॥ यातिविष्णोःपरंधामयोगिनामपिदुर्लभं ॥ ९३ ॥ व्याख्यात्येवंद्विजकुलव-
रोमाधवीयांश्चधर्मान्विष्णोरिष्टान्सकलफलदान्व्याधपृष्टान्समस्तान् ॥ वटःस-
द्यःपश्यतामेवभूमौपपताहोपंचशाखोद्रुमोऽयं ॥ ९४ ॥ वृक्षादस्मात्कोटरेसं-
स्थितोहिव्यालःकश्चिद्दीर्घदेहःकरालः ॥ हित्वादेहंपापयोनिंचसद्यःसवैतस्थौ
प्रांजलिर्नम्रमूर्धा ॥ ९५ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीष-
संवादेभागवतधर्मकथनंनामैकोनविंशोऽध्यायः ॥ १९ ॥ ॥ श्रुतदेवउवाच ॥
॥ ततस्तुविस्मितोभूत्वाशंखोव्याधसमन्वितः ॥ कोभवानितितंप्राहदशैषाच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुतस्तव ॥ १ ॥ केनवाकर्मणाचासीद्दुर्योनिरशुभावहा ॥ अकस्मात्तेकथंमु-
क्तिरेतदाचक्ष्वविस्तरात् ॥ २ ॥ शंखेनैवंतदापृष्टोदंडवत्पतितोभुवि ॥ प्रश्र-
यावनतोभूत्वाप्रांजलिर्वाक्यमब्रवीत् ॥ ३ ॥ अहंपुराद्विजःकश्चित्प्रयागेबहु-
भाषणः ॥ रूपयौवनसंपन्नोविद्यामदसुगर्वितः ॥ ४ ॥ धनाढ्योबहुपुत्राढ्यः
सदाऽहंकारदूषितः ॥ कुसीदस्यमुनेःपुत्रोनाम्नारोचनइत्यहं ॥ ५ ॥ आस-
नंशयनंनिद्राऽव्यायोऽक्षपरिक्रिया ॥ लोकवार्ताकुसीदंवाऽव्यापारास्तुममाभव-
न् ॥ ६ ॥ तंतुमात्राणिकर्माणिलोकनिंदाविशंकितः ॥ सदंभश्चसदाकुर्वेनश्र-
द्धामेकदाचन ॥७॥ दुर्बुद्धेर्मेसुदुष्टस्याकियत्कालोगतोऽभवत् ॥ तदावैशाखमासेऽ
स्मिन्जयंतोनामवैद्विजः ॥ ८ ॥ श्रावयामासतन्मासधर्मान्भागवतप्रियान्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ तत्क्षेत्रवासिनांपुण्यकर्मणांचद्विजन्मनां ॥ ९ ॥ नारीनराःक्षत्रियाश्चवै-
श्याःशूद्राःसहस्त्रशः ॥ प्रातःस्नात्वासमभ्यर्च्यमधुसूदनमव्ययं ॥ १० ॥ क-
थांशृण्वंतिसततंजयंतेनसमीरितां ॥ शुचिभूतामौनधरावासुदेवकथारताः ॥
॥ ११ ॥ वैशाखधर्मनिरतादंभालस्यविवर्जिताः ॥ तांसभांचप्रविष्टोऽहंतत्कौ-
तुकदिदृक्षया ॥ १२ ॥ सोष्णीषेणमयामूर्ध्नानमस्कारोऽपिनोकृतः ॥ तांबू-
लंचंदनंदेहेकंचुकंचमयाधृतं ॥ १३ ॥ कथाविक्षेपमकरवंलोकवार्ताभिरंजसा ॥
सर्वेषांचित्तचांचल्यमभूद्वैलोकवार्तया ॥ १४ ॥ क्वचिद्दासःप्रसार्याहंक्वचिन्निं-
दन्क्वचिद्धसन् ॥ एवंकालोमयानीतःकथायावत्समाप्यते ॥ १५ ॥ पश्चात्ते-
नैवदोषेणसद्योऽल्पायुर्विनष्टधीः ॥ संनिपातेनपंचत्वंप्राप्तोऽहंचपरेदिने ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तप्तसीसजलैःपूर्णंनिरयंचहलाहलं ॥ प्राप्यभुक्त्वायातनांचमन्वंतानिचतुर्दश
॥ १७ ॥ युक्तेष्वथचलक्षेषुतथाचतुरशीतिभिः ॥ क्रमाद्योनिषुजातोऽहमिदा-
नींचवटद्रुमे ॥ १८ ॥ दशयोजनविस्तीर्णेशतयोजनमुन्नते ॥ व्यालोऽहंताम-
सःक्रूरःसप्तयोजनकोटरे ॥ १९ ॥ भूत्वावसामिविप्रर्षेकर्मणावाधितःपुरा ॥
अयुतंचसमायातानिराहारस्यकोटरे ॥ २० ॥ दैवात्तवमुखांभोजसमीरितक-
थामृतं ॥ श्रुत्वाचचक्षुश्श्रुलकैःसद्योध्वस्ताशुभोमुने ॥ २१ ॥ व्यालयोनिंवि-
सृज्याहंदिव्यरूपधरःपुमान् ॥ प्रांजलिःप्रणतोभूत्वापादौतेशरणंगतः ॥ २२ ॥
कस्मिन्जन्मनित्वंबंधुर्नजानेमुनिसत्तम ॥ नमयोपकृतंक्कापिसानुबंधःकुतःस-
तां ॥ २३ ॥ साधूनांसमचित्तानांसदाभूतदयावतां ॥ परोपकारप्रकृतिर्नचै-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षामन्यथामतिः ॥ २४ ॥ मामद्यानुगृहाणत्वंयथाधर्मेमतिर्भवेत् ॥ यथाचसु-
गतिर्भूयाद्यथाविष्णौरतिर्भवेत् ॥ २५ ॥ नभूयाद्विस्मृतिःक्वापिविष्णोर्देवस्य
चक्रिणः ॥ महतांसाधुवृत्तानांसंगतिश्चसदाभवेत् ॥ २६ ॥ नामर्षःक्वापिमे
भूयान्नाहंकारोमदोऽपिवा ॥ दारिद्र्यमेवमेभूयान्मदांधानांयदंजनं ॥ २७ ॥
इतितंबहुधास्तुत्वाप्रणम्यचपुनःपुनः ॥ प्रांजलिःप्रणतस्तस्थौतूष्णीमेवतदग्र-
तः ॥ २८ ॥ ततोदोर्भ्यांसमुत्थाप्यशंखःप्रेमपरिप्लुतः ॥ पस्पर्शपाणिनाचांगं
शंतमेनहतांहसः ॥ २९ ॥ चक्रेसोऽनुग्रहंतस्मिन्दिव्यरूपधरेद्विजे ॥ प्राहतं
कृपयाविष्टोभाविवृत्तांतमंजसा ॥ ३० ॥ द्विजतेमासमाहात्म्यश्रवणाच्चहरेर-
पि ॥ माहात्म्यश्रवणात्सद्योध्वस्तनष्टाखिलाशुभः ॥ ३१ ॥ अतिवाहकलो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कांश्चक्रमाद्गत्वापुनर्भुवि ॥ दशार्णविषयेपुण्येभविताव्वंद्विजोत्तमः ॥ ३२ ॥
देवशर्मेतिविख्यातःसर्वविद्याविशारदः ॥ तत्रतेभविताजातिस्मृतिरात्यंतिकी
शुभा ॥ ३३ ॥ तयास्मृतानुबंधस्त्वंत्यक्तसर्वैषणःशुभः ॥ करोषिसकलान्ध-
र्मान्वैशाखोक्तान्हरिप्रियान् ॥ ३४ ॥ निर्द्वंद्वोनिःस्पृहोऽसंगोगुरुभक्तोजितेंद्रि-
यः॥ सदाविष्णुकथालापोभविताजन्मनि ॥ ३५ ॥ तेनसिद्धिमवाप्याथ
विध्वस्ताखिलबंधनः ॥ प्राप्नोषिपरमंधामयोगैरपिदुरासदं ॥ ३६ ॥ माभैषीः
पुत्रभद्रंतेभवितामत्प्रसादतः ॥ हास्याद्भयात्तथाक्रोधाद्द्वेषात्कामादथापिवा ॥
॥ ३७ ॥ स्नेहाद्वासकृदुच्चार्यविष्णोर्नामाघहारिच ॥ पापिष्ठाअपिगच्छंतिवि-
ष्णोर्धामनिरामयं ॥ ३८ ॥ किमुतश्रद्धयायुक्ताजितक्रोधाजितेंद्रियाः॥ दयावं-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तःकथांश्रुत्वागच्छंतीतिद्विजोत्तम ॥३९॥ केचित्केवलयाभक्त्याकथालापैकत-
त्पराः ॥ सर्वधर्मोज्झितावापियांतिविष्णोःपरंपदं ॥४०॥ द्वेषादिपूर्णभक्त्यावा
केचिद्विष्णुमुपासते ॥ तेऽपियांतिपरंधामपूतनेवासुहारिणी ॥ ४१ ॥ मह-
द्भिःसंगमोनित्यंवाग्विसर्गस्तदाश्रयः ॥ मुमुक्षुणाचकर्तव्यःसविधिःश्रुतिचोदि-
तः ॥ ४२ ॥ सवाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥
नामान्यनंतस्ययशोऽंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः ॥ ४३ ॥ यःक-
ष्टसेवांनचकांक्षतेविभुर्नवाधनंभूरिनरूपयौवने ॥ स्मृतःसकृद्यच्छतिधामभा-
स्वरंकंवादयालुंशरणंव्रजेम ॥ ४४ ॥ तमेवशरणंयाहिनारायणमनामयं ॥ भ-
क्तवत्सलमव्यक्तंचेतोगम्यंदयानिधिं ॥ ४५ ॥ कुरुसर्वानिमान्धर्मान्वैशाखो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्तान्महामते ॥ तेनतुष्टोजगन्नाथःशर्मतेसंविधास्यति ॥ ४६ ॥ इत्युक्त्वावि-
रराामाथव्याधंदृष्ट्वासुविस्मितः ॥ सदिव्यःपुरुषःप्राहपुनस्तंमुनिपुंगवं ॥ ४७॥
॥ दिव्यपुरुषउवाच ॥ ॥ धन्योऽस्म्यनुगृहीतोऽस्मित्वयाशंखदयालुना ॥
दिष्ट्यागतामेदुर्योनिर्यामिचैवपरांगतिं ॥ ४८ ॥ इतितंचपरिक्रम्यह्यनुज्ञातो
दिवंययौ ॥ ततःसायमभूद्राजन्शंखोव्याधेनतोषितः ॥ ४९ ॥ संध्यांसायं-
तनींकृत्वारात्रिशेषंनिनायच ॥ नानाख्यानैश्चभूपानांदेवानांचमहात्मनां ॥
॥ ५० ॥ लीलाभिरवताराणामिष्टगोष्ठीभिरेवच ॥ ब्राह्मेमुहूर्तेचोत्थायपादौ
प्रक्षाल्यवाग्यतः ॥ ५१ ॥ ध्यायंश्चतारकंब्रह्मकृत्वाशौचादिसत्क्रियां ॥ वैशा-
खेमेषगेसूर्येस्नात्वाप्रातर्भगोदयात् ॥ ५२ ॥ कृत्वासंध्यादिकंकर्मतथासंत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्यंचाखिलान् ॥ व्याधमाहूयहृष्टात्मामूर्ध्निप्रोक्ष्यनिरीक्ष्यच ॥ ५३ ॥ रामे-
तिद्व्यक्षरंनामददौव्याधायवैशुभं ॥ विष्णोरेकैकनामापिसर्ववेदाधिकंमतं ॥
॥ ५४ ॥ तेभ्यश्चानंतनामभ्योऽधिकंनाम्नांसहस्रकं ॥ तादृङ्नामसहस्रेणरा-
मनामसमंमतं ॥ ५५ ॥ तस्माद्रामेतितन्नामजपव्याधनिरंतरं ॥ धर्मानेता-
न्कुरुव्याधयावदामरणांतिकं ॥ ५६ ॥ ततस्तेभविताजन्मवल्मीकस्यऋषेः
कुले ॥ वाल्मीकिरितिनाम्नाचभूमौख्यातिमवाप्स्यसि ॥ ५७ ॥ इतिव्याधं
समादिश्यप्रतस्थेदक्षिणांदिशं ॥ व्याधोऽपितंपरिक्रम्यप्रणम्यचपुनःपुनः ॥
॥ ५८ ॥ किंचिद्दूरानुगोभूत्वासरुदन्विरहातुरः ॥ यावद्दृष्टिपथंतावत्पश्यं-
स्तस्यगतिंपुनः ॥ ५९ ॥ पुनर्निवृत्तस्तच्चित्तस्तमेवहृदिचिंतयन् ॥ वनंनि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मायतन्मार्गेप्रपांकृत्वासुनिर्मलां ॥ ६० ॥ अतियोग्यानिमान्धर्मान्वैशाखो-
क्तांश्चकारह ॥ वन्यैःकपित्थपनसजंबुचूतादिभिःफलैः ॥ ६१ ॥ मार्गगानां
श्रमार्तानामाहारंपर्यकल्पयत् ॥ उपानद्भिश्चंदनैश्चछत्रैश्चव्यजनैरपि ॥ ६२ ॥
वालुकास्तरणोपेतच्छायाभिश्चक्वचित्क्वचित् ॥ अपाजहारपांथानांश्रमंस्वेदो-
द्रवंतथा ॥ ६३ ॥ प्रातःस्नात्वादिवारात्रंजपन्रामेतिवैमनुं ॥ व्याधजन्मनि
नायासौवल्मीकस्यसुतोऽभवत् ॥ ६४ ॥ कृणुर्नाममुनिःकश्चित्तस्मिन्नेवसरो-
वरे ॥ तपोवैदुश्चरंतेपेअन्नाहारविवर्जितः ॥ ६५ ॥ वल्मीकमभवद्देहेतस्यका-
लेनभूयसा ॥ वाल्मीकिरितितंप्राहुस्ततोवैमुनिपुंगवं ॥ ६६ ॥ पश्चात्तपोवि-
रामांतेकृणोस्मृतिपथंगते ॥ वयोविस्तरतोराजन्स्खलितंचेंद्रियंमुनेः ॥ ६७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जग्राहचोरगीकाचित्तस्यांजज्ञेवनेचरः ॥ वाल्मीकिरितिविख्यातोभुवनेषुमहा-
यशाः ॥ ६८ ॥ योवैरामकथांदिव्यांस्वेप्रबंधैर्मनोरमैः ॥ लोकप्रख्यापयामा-
सकर्मबंधनिकृंतनीं ॥ ६९ ॥ ॥ श्रुतदेवउवाच ॥ ॥ पश्यवैशाखमाहा-
त्म्यंभूपलब्धपिभूरिदं ॥ व्याधोऽप्युपानहौदत्वाऋषित्वंप्रापदुर्लभं ॥ ७० ॥
यइदंपरमाख्यानंपापघ्नंरोमहर्षणं ॥ शृणुयाच्छ्रावयेद्वापिनभूयःस्तनपोभवे-
त् ॥ ७१ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेव्याधोपा-
ख्यानेवाल्मीकेर्जन्मकथनंनामविंशोऽध्यायः ॥ २० ॥ ॥ मैथिलउवाच ॥
॥ काह्यस्मिंस्तिथयःपुण्यामासेवैशाखसंज्ञके ॥ कानिदानानिशस्तानितासु
तासुविशेषतः ॥ १ ॥ कैःप्रख्याताश्चतालोकेएतदाचक्ष्वविस्तरात् ॥ ॥ श्रु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदेवउवाच॥ ॥त्रिंशच्चतिथयःपुण्यावैशाखेमेषगेरवौ ॥ २ ॥ एकैकस्यांकृतंपु-
ण्यंकोटिकोटिगुणंभवेत् ॥ सर्वदानेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं ॥ ३ ॥ तत्फलं
समवाप्नोतिह्येकैकस्यांजलाप्लुतः ॥ स्नानंदानंतपोहोमोदेवतार्चनसत्क्रियाः ॥
॥ ४ ॥ कथायाःश्रवणंचैवसद्योमुक्तिविधायकं ॥ रोगाद्युपहतोयस्तुदारिद्र्येणा-
पिपीडितः ॥ ५ ॥ श्रुत्वाकथामिमांपुण्यांकृतकृत्योभवेन्नरः ॥ अस्नात्वाचा-
प्यदत्वाचयेननीताइमाःशुभाः ॥ ६ ॥ सगोघ्नश्चकृतघ्नश्चपितृघ्नश्चात्महा
स्मृतः ॥ जलाशयाश्चस्वाधीनाःस्वाधीनंचकलेवरं ॥ ७ ॥ माधवोमनसासे-
व्यःसकलैश्चगुणैस्तथा ॥ साधवश्चदयावंतःकोनसेवेतमाधवं ॥ ८ ॥ दरिद्रै-
श्चधनाढ्यैश्चपंगुभिश्चांधकैस्तथा ॥ षंढैश्चविधवाभिश्चनारीभिश्चनरैस्तथा ॥

For Private and Personal Use Only

॥ ९ ॥ कुमारयुववृद्धैश्चरोगार्तैरपिभूमिप ॥ अतीवसुखसाध्योहिधर्मोवैशाख-
गोचरः ॥ १० ॥ मासमेनमनुप्राप्यधर्माकरमिमंशुभं ॥ कोनयत्नेनकुरुतेत-
स्मात्कोन्वपरःपशुः ॥ ११ ॥ योऽतीवसुलभान्धर्मान्निकरोतिनराधमः ॥ त-
स्यैवशाश्वतालोकानारकानात्रसंशयः ॥ १२ ॥ अथातःसंप्रवक्ष्यामितस्मि-
न्मासेनृपोत्तम ॥ तांतिथिंसर्वपापघ्नींदध्नःसारमिवोद्धृतं ॥ १३ ॥ चैत्रेमा-
सिमहापुण्येमेषसंस्थेदिवाकरे ॥ पापघ्नींपितृदेवत्यांयज्ञकोटिफलप्रदां ॥
॥ १४ ॥ अत्रैवश्रूयतेपुण्यापितृगाथापुरातनी ॥ नरकेपितृनुद्दिश्यसावर्णौ
शासातिक्षितिं ॥ १५ ॥ त्रिंशत्कलियुगस्यांतेसर्वधर्मविवर्जिते ॥ आनर्तेतु
द्विजःकश्चिद्धर्मवर्णइतिश्रुतः ॥ १६ ॥ दृष्ट्वाकलियुगेघोरेजनान्पापरतान्मुनिः

॥ तस्यैवप्रथमेपादेवर्णधर्मविवर्जिते ॥ १७ ॥ सकदाचित्सत्रयागंमुनीनांतुम-
हात्मनां ॥ अगमत्पुष्करक्षेत्रेकुर्वतांमौनधारिणां ॥ १८ ॥ तत्रचासन्पुण्यक-
थाऋषीणांशास्त्रगोचराः ॥ तत्रकेचित्कलियुगंप्रशशंसुर्धृतव्रताः ॥ १९ ॥ कृ-
तेयद्वत्सरात्साध्यंपुण्यंमाधवतोषणं ॥ त्रेतायांमासतःसाध्यंद्वापरेपक्षतोनृप ॥
॥ २० ॥ तस्माद्दशगुणंपुण्यंकलौविष्णुस्मृतेर्भवेत् ॥ अत्यल्पमपिवैपुण्यंकलौ
कोटिगुणंभवेत् ॥ २१ ॥ दयापुण्यविहीनेतुदानधर्मविवर्जिते ॥ दयादानंच
कुरुतेसकृदुच्चार्यवैहरिं ॥ २२ ॥ सएवचोर्ध्वगोनूनंदुर्भिक्षेचान्नदोयथा ॥ ए-
तत्प्रसंगावसरेनारदोऽभ्येत्यवैमुनिः ॥२३॥ करेणैकेनशिश्नंचजिह्वामेकेनवैहस-
न् ॥ प्रगृह्योन्मत्तवत्तत्रननर्तमुनिपुंगवः ॥२४॥ सभ्यास्तदातमित्यूचुःकिमेत-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दितिनारद ॥ प्रत्युवाचसतान्सर्वान्नृत्यन्वैप्रहसन्सुधीः ॥२५॥ ॥नारदउवाच॥
सिद्धावयंनसंदेहः पुण्योऽयंकलिरागतः॥ संतोषाद्यदिहप्रोक्तंनृत्यद्भिर्भावितात्म-
भिः ॥ २६ ॥ तत्सत्यंनचसंदेहोबहुस्वल्पेनसाध्यते ॥ स्मरणात्तोषमायातिके-
शवःक्लेशनाशनः ॥ २७ ॥ तथापिवःप्रवक्ष्यामिदुर्घटंचद्वयंध्रुवं ॥ शिश्नस्य
निग्रहःपुत्राजिह्वायाअपिनित्यशः ॥ २८ ॥ द्वयंवशेभवेद्यस्यसएवस्याज्जना-
र्दनः ॥ भवद्भिर्नात्रस्थातव्यंतस्मात्कलियुगागमे ॥ २९ ॥ खंडंचभारतंहि-
त्वासंचरध्वंयथासुखं ॥ यत्रकुत्रापिदेशेषुमनोयत्रप्रसीदति ॥ ३० ॥ इतित-
द्वचनंश्रुत्वामुनयःशंसितव्रताः॥ सत्रंसमाप्यसहसाययुस्तेचयथागतं ॥ ३१ ॥
धर्मवर्णोऽपितच्छ्रुत्वात्यक्तुंभूमिंमनोदधे ॥ सुव्रतंचोर्ध्वरेतस्त्वंधृत्वादंडकमंडलु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३२ ॥ जटावल्कलधारीचभुवमेवययौपुनः ॥ कलौयुगेत्वनाचारान्दृष्ट्वावि-
स्मितमानसः ॥ ३३ ॥ तत्रापश्यज्जनान्घोरान्पापाचाररतान्खलान् ॥ पा-
खंडिनोद्विजाःसर्वेशूद्राःप्रव्रंजिनस्तथा ॥ ३४ ॥ भर्तारंद्वेष्टिभार्याचशिष्योद्वे-
ष्टिगुरुंतथा ॥ भृत्यश्चस्वामिनंहंतिपुत्रःपितृवधोद्यतः ॥ ३५ ॥ शूद्रप्रायाद्वि-
जाःसर्वेबस्तप्रायाश्चधेनवः ॥ गाथाप्रायास्तथावेदाःक्रियासाम्याःशुभाःक्रियाः
॥ ३६ ॥ भूतप्रेतपिशाचाद्याःफलदास्तत्रदेवताः ॥ ताएवश्रद्धयाऽर्चंतिजनाः
पापरताःशठाः ॥३७॥ सर्वेव्यवायनिरतास्तदर्थेत्यक्तजीविताः ॥ कूटसाक्ष्य-
प्रवक्तारःसदाकैतवमानसाः ॥ ३८ ॥ मनस्येकंवचस्येकंकर्मण्येकंसदाकलौ ॥

१ संन्यासिनः । २ छागतुल्याः । ३ सुरतासक्ताः । ४ अनृतसाक्ष्यवक्तारः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वेषांकौतुकीविद्यासापूज्यानृपमंदिरे ॥ ३९ ॥ गीताद्याश्चकलौविद्यानृपाणां
चप्रियावहाः ॥ हीनाश्चपूज्यतांयांतिनोत्तमाश्चकलौयुगे ॥ ४० ॥ श्रोत्रिया-
श्चद्विजाःसर्वेदरिद्राःस्युःकलौयुगे ॥ विष्णुभक्तिर्नराणांतुप्रायशोनैववर्तते ॥
॥ ४१ ॥ प्रायःपाखंडभूयिष्ठंपुण्यक्षेत्रंभविष्यति ॥ शूद्राधर्मप्रवक्तारोजटिला-
स्तापसाःकलौ ॥ ४२ ॥ सर्वेचाल्पायुषोमर्त्यादयाहीनाःशठाजनाः ॥ सर्वेध-
र्मप्रवक्तारःसर्वेचग्रहणेच्छवः ॥ ४३ ॥ सुजनान्नोपगच्छंतिवृथानिंदापराय-
णाः ॥ असूयानिरताःसर्वेपरेप्रभुगृहंगते॥ ४४॥ भ्राताचभगिनींगंतापितापु-
त्रींचवैकलौ ॥ सर्वेपिशूद्रीनिरताःसदावारांगनारताः॥ ४५ ॥ साधूनेवावजा-
नंतिवहुपापांश्चमन्वते ॥ व्यक्तीकुर्वंतिसाधूनांदोषमेवंदुराग्रहाः ॥ ४६ ॥ पा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पानांदोषजातानिगुणत्वेनवदंतिहि ॥ दोषमेवप्रगृह्णंतिकलौनतुगुणंजनाः ॥ ॥४७॥ जलूकःस्तनसंयुक्तोरक्तंपिबतिनोपयः ॥ रसाःस्वादुगुणान्हित्वाऋतूनांव्यत्ययस्तथा ॥ ४८ ॥ दुर्भिक्षंसर्वराष्ट्रेषुकन्याकालेनसूयते ॥ नटनर्तकविद्यासुप्रीतिमंतोनराःकलौ ॥ ४९ ॥ वेदवेदांतविद्यासुनिरतायेगुणाधिकाः॥ भृत्यान्पश्यंतितान्मूढास्ततोभ्रष्टाखिलाशिषः ॥ ५० ॥ त्यक्तश्राद्धक्रियाःसर्वे त्यक्तवेदोदितक्रियाः ॥ जिह्वायांविष्णुनामानिनवर्ततेकदाचन ॥ ५१ ॥ न विष्णुसेवानचशास्त्रवार्तानयागदीक्षानविचारलेशः ॥ नतीर्थयात्रानचदानधर्माःकलौजनेक्वापिबभूवचित्रं ॥ ५२ ॥ शृंगाररतिनिर्वाणास्तद्गीतान्येवतेजगुः

१ जळू इति लोके । २ आशीः क्षेमं । ३ निर्वाणं परमार्थः ।

For Private and Personal Use Only

॥ तान्दृष्ट्वाधर्मवर्णोऽपिसुभीतोऽत्यंतविस्मितः ॥ ५३ ॥ वंशंपापात्क्षयंयांतंदृष्ट्वाद्वीपांतरंययौ ॥ संचरन्सर्वद्वीपेषुलोकेष्वेवतुसर्वशः ॥ ५४ ॥ पितृलोकंययौधीमान्कदाचित्कौतुकान्वितः॥ तत्रापश्यन्महाघोरान्भ्राम्यमाणांश्चकर्मभिः ॥ ५५ ॥ धावतोरुदमानांश्चपततःपतितानपि ॥ तत्रापश्यच्चांधकूपेपतितान्स्वपितॄनथ ॥ ५६ ॥ दूर्वाग्रालंबिनोदीनान्दूर्वाच्छेदेनकर्शितान् ॥ तत्राखुः[1]खादयत्यद्धादूर्वामूलंतदाश्रयं ॥ ५७ ॥ तेनभागत्रयंचोत्तमेकोभागोऽवशेषितः[2] ॥ तद्दृष्ट्वातेक्षीयमाणंमूलंदुःखेनकर्शितां[3]॥ ५८ ॥ अधोदृष्ट्वाचांधकूपंत[4]टपातादिभीषणं ॥ दुरुत्तरंमहाघोरंकर्मणाप्तंसुदुःखिताः ॥ ५९ ॥ अग्रेचापि

१ मूषकः । २ भाक्षतं । ३ कृशतां प्राप्ताः । ४ नरकविशेषणं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुरुत्तारमवलंबविवर्जितं ॥ तान्दृष्ट्वाविस्मितोभूत्वादयालुर्वाक्यमब्रवीत् ॥
॥ ६० ॥ केयूयंपतिताह्यस्मिन्केनदुस्तरकर्मणा ॥ कस्यगोत्रेसमुत्पन्नाःकथंवै
मुक्तिमाप्स्यथ ॥ ६१ ॥ एतद्यूयंवदध्वंमेशर्मवोऽथभविष्यति॥ इत्येवमुदिता-
स्तेनपितरोऽत्यंतदुःखिताः ॥६२॥ तमूचुःकरुणांवाचंधर्मश्रुतिपुरःसरं॥ ॥पि-
तरऊचुः ॥ ॥ वयंश्रीवत्सगोत्रीयाभुविसंतानवर्जिताः ॥ ६३ ॥ पिंडश्राद्ध-
विहीनाश्चतेनपच्यामहेवयं ॥ निःसंतानोऽपिनोवंशोजातःपापैःकलौयुगे ॥
॥ ६४ ॥ नास्माकंपिंडदश्चास्तिवंशेपापात्क्षयंगते ॥ तेनांधकूपेपतनंनिस्तंतू-
नांदुरात्मनां ॥ ६५ ॥ एकोहिवर्ततेवंशेधर्मवर्णोमहायशाः॥ सविरक्तश्चरँल्लो-
कान्नगार्हस्थ्यमुपेयिवान् ॥ ६६ ॥ तंतुनातेनबभ्रामोदूर्वानालावलंबिनः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःस्तंबत्वाच्चतन्मूलमाखुःखादतिप्रत्यहं ॥ ६७ ॥ एकस्यैवावशिष्टत्वा-
त्किंचिन्मूलावशेषितः ॥ आखुनाखाद्यमानश्चवर्ततेसौम्यपश्यतं ॥ ६८ ॥
तस्यचायुःक्षयेतातशेषमाखुश्चरिष्यति ॥ पश्चात्कूपेपतिष्यामोदुरुत्तारेऽध-
तामसे ॥ ६९ ॥ तस्मात्त्वंचभुवंगत्वाधर्मवर्णप्रबोधय ॥ अस्मद्वाक्यैर्दयापा-
त्रैर्गार्हस्थ्येविमुखंमुनिं ॥ ७० ॥ पितरस्तेभृशार्ताहिनरकेपतितामया ॥ अं-
धकूपेदुरुत्तारेदृष्टादूर्वावलंबिनः ॥ ७१ ॥ सादूर्वावंशरूपाहितन्मूलंसंततिर्मु-
ने ॥ कालाख्योमूषकस्तस्यमूलंखादतिप्रत्यहं ॥ ७२ ॥ वंशनाशानुक्रमतए-
कस्त्वंचावशेषितः ॥ तेनमूलस्यदूर्वायानष्टंभागत्रयंमुने ॥ ७३ ॥ एकोभागोऽ

१ स्तंबो गुच्छः । २ भक्षयिष्यति । ३ दुस्तरे । ४ अत्यंतपीडिताः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वशिष्टोऽत्रयतस्त्वंवर्तसेभुवि ॥ किंचित्खादतितंत्वाखुस्तवचायुःक्षयक्रमात् ॥
॥ ७४ ॥ परेतेत्वयिचास्माकंतवापिपतनंभवेत् ॥ कूपएवांधतामिस्रेसंतानेऽ
पिक्षयंगते ॥ ७५ ॥ तस्माद्गार्हस्थ्यमास्थायकुरुसंततिवर्धनं ॥ तेनास्माकंतं-
तुनास्याद्गतिरूर्ध्वानसंशयः ॥ ७६ ॥ एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजे-
त् ॥ यजेतवाऽश्वमेधेननीलंवावृषमुत्सृजेत् ॥७७॥ यद्येकोऽपिचवैशाखेमा-
घेवाकार्तिकेऽपिवा ॥ अस्मानुद्दिश्यवैस्नानंश्राद्धदानंकरिष्यति ॥ ७८ ॥ ते-
नचोर्ध्वंगतिर्भूयान्नरकादुद्धृतिश्चनः ॥ एकोवाविष्णुभक्तःस्यादेकोवाहरिवासरी ॥ ७९ ॥ एकोवाशृणुयाद्विष्णोःकथांपापप्रणाशिनीं ॥ तस्यातीतंकुलशतं

१ मृते । २ तदर्थं यत्नः कार्यइत्यर्थः । ३ एकादशीव्रतकर्ता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भाविचापिकुलंशतं ॥ ८० ॥ अपिपापवृतंवापिनरकंनैवपश्यति ॥ किमन्यैर्बहुभिःपुत्रैर्दयाधर्मविवर्जितैः ॥ ८१ ॥ यंजातानार्चयंत्यद्धाविष्णुंनारायणंकुले ॥ नापुत्रस्यहिलोकोऽस्तिसर्वमेतज्जनाविदुः ॥ ८२ ॥ तत्रापिचदयायुक्तं सत्संतानंचदुर्लभं ॥ इतितंबोधयित्वातुवाक्यैरेतैश्चसूनृतैः ॥ ८३ ॥ विरक्तश्चोर्ध्वरेताश्चगार्हस्थ्येत्वंमतिंकुरु ॥ पितृणांवचनंश्रुत्वाधर्मवर्णोऽतिविस्मितः ॥ ८४ ॥ प्रणम्यप्रांजलिःप्राहरुदन्वैजातवेपथुः ॥ नाम्नाहंधर्मवर्णश्चयुष्मद्वंश्योदुराग्रही ॥ ८५ ॥ सत्रेश्रुत्वातुवचनंनारदस्यमहात्मनः ॥ जिह्वादार्ढ्यं गुह्यदार्ढ्यंनकस्यापिकलाविति ॥ ८६ ॥ दृष्ट्वाचभुविपापिष्ठांस्तान्जनानभि-

१ सत्यं । २ सत्यैर्मधुरैश्च । ३ वेपथुः कंपः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शंकितः ॥ भीतोदुर्जनसंगत्याचरन्द्वीपांतरेवसन् ॥ ८७ ॥ पादास्त्रयोगताह्य-
स्यकलेःपादेंऽतिमेपिच ॥ गताःसार्धत्रयोभागाइदानींजनकाइमे ॥ ८८ ॥ ना-
हंवेद्मिभवद्दुःखंवृथाजन्मगतंमम ॥ यस्मिन्कुलेत्वहंजातऋणंपित्रोर्नवैह्तं ॥
॥ ८९ ॥ किंतेनजातमात्रेणभूभारेणान्नशत्रुणा ॥ योजातोनार्चयेद्विष्णुंपितॄ-
न्देवानृषींस्तथा ॥ ९० ॥ युष्मदाज्ञांकरिष्यामिमामाज्ञापयतक्षितौ ॥ यथा
नकलिबाधास्यात्तत्रसंसरतोऽपिमे ॥ ९१ ॥ कर्तव्यानिचकृत्यानिमयापुत्रेण
भूतले ॥ इत्युक्तास्तेनवंश्येनधर्मवर्णनधीमता ॥ ९२ ॥ किंचिदाश्वस्तमन-
सइदमूचुर्महीपते ॥ पुत्रपश्यदशामेषांपितॄणांतेमहात्मनां ॥ ९३ ॥ संतत्यभा-
वात्पततांदूर्वामात्रावलंबिनां ॥ त्वंगार्हस्थ्यमुपाश्रित्यसंतत्याऽस्मान्समुद्धर ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ९४ ॥ येचविष्णुकथासक्तायेस्मरंत्यनिशंहरिं ॥ येसदाचारनिरतानतान्वै बाधतेकलिः ॥ ९५ ॥ शालिग्रामशिलायस्यगृहेतिष्ठतिमानद ॥ अथवाभारतंगेहेनतंवैबाधतेकलिः ॥ ९६ ॥ यश्चवैशाखनिरतोमाघस्नानरतश्चयः ॥ कार्तिकदीपदातायोनतंवैबाधतेकलिः ॥९७॥ प्रत्यहंशृणुयाद्यस्तुकथांविष्णोर्महात्मनः ॥ पापघ्नींमोक्षदांदिव्यांनतंवैबाधतेकलिः ॥ ९८ ॥ यद्गृहेवैश्वदेवंचयद्गृहेतुलसीशुभा ॥ यदंगणेशुभागौश्चनतंवैबाधतेकलिः ॥ ९९ ॥ तस्माच्चैवहिपुत्रत्वंयुगेपापात्मकेपिच ॥ शीघ्रंगच्छभुवंपुत्रमासोऽयंमाधवाह्वयः ॥ १०० ॥ सर्वेषामुपकारायमेषसंस्थेदिवाकरे ॥ त्रिंशच्चतिथयःपुण्यामेषसंस्थेदिवाकरे ॥ १ ॥ एकैकस्यांकृतंपुण्यंकोटिकोटिगुणंभवेत् ॥ तत्रापिचैत्रब-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हुलेदर्शेनृणांचमुक्तिदः ॥२॥ प्रियःसोपिहिदेवानांसद्योमुक्तिविधायकः ॥ ये-
वैपितृन्समुद्दिश्यश्राद्धंकुर्वंतितद्दिने ॥ ३ ॥ सोदकुंभंपिंडदानंतदक्षय्यफलंभ-
वेत् ॥ येचकुर्वंतिवैश्राद्धममायांचमधौसुत ॥ ४ ॥ तैःकृतातुगयाक्षेत्रेश्राद्ध-
कोटिर्नसंशयः ॥ यदिचाद्यामधौमासेशाकेनापिचश्राद्धकृत् ॥ ५ ॥ को-
टिश्राद्धंगयायांतुकृतंतेननसंशयः ॥ कुंभंचपानकैःपूर्णंकर्पूरागुरुवासितं ॥ ६ ॥
योनदद्यान्मधौदर्शेसपितृघ्नोनसंशयः ॥ योदद्याच्चमधौदर्शेसपानीयंकरीर-
कं ॥ ७ ॥ श्राद्धंचभक्तिसंयुक्तःकुरुतेस्वकुलोद्धृतिं ॥ पितृणांचतदालोकेनदी-
चामृतवर्षिणी ॥८॥ कुंभदानात्प्रस्त्रवतिश्राद्धदानाद्ध्रुवाइमे ॥ अन्नसूपघृता-
पूपलेह्यपेयसुकर्दमा ॥ ९ ॥ तस्माद्ध्रुवंचगच्छत्वंयदाचाऽमाभविष्यति ॥ कुरु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्राद्धंपिंडदानंसोदकुंभंमहामते ॥ ११० ॥ सर्वेषामुपकारायगार्हस्थ्यंचस-
माश्रय ॥ धर्मार्थकामैःसंतुष्टःप्राप्यसंतानमुत्तमं ॥ ११ ॥ पुनश्चमुनिवृत्ति-
स्त्वंसुखंद्वीपेषुसंचर ॥ इत्यादिष्टःपितृभिश्चतूर्णंभूमिंययौमुनिः ॥ १२ ॥ चै-
त्रेमासेमेषसंस्थेपुण्येतस्मिन्दिवाकरे ॥ प्रातःस्नात्वाचसंतर्प्यपितॄन्देवानृषीं-
स्तथा ॥ १३ ॥ सोदकुंभंतथाश्राद्धंकृत्वापापविनाशनं ॥ तेनदत्वापितॄणांच
मुक्तिमावृत्तिवर्जितां ॥ १४ ॥ स्ववंविवाहमकरोत्संततिंप्रापवैसतीं ॥ लोकेप्र-
ख्यापयामासतांतिथिंपापनाशिनीं ॥ १५ ॥ स्वयंपुनर्मुनिर्भूत्वागंधमादनमा-
ययौ ॥ तस्मात्पुण्यतमश्चैषमधोर्दर्शःशुभावहः ॥ १६ ॥ नानेनसदृशीलोके

१ पुनर्जन्मरहितां । २ पर्वतविशेषं ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिथिर्दृष्टाश्रुतापिवा ॥ १७ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरी-
षसंवादेकलिधर्मनिरूपणेधर्मवर्णापितृमुक्तिर्नामैकविंशोऽध्यायः ॥२१॥ ॥छ॥
॥ श्रुतदेवउवाच ॥ ॥ अथातःसंप्रवक्ष्यामिमाहात्म्यंपापनाशनं ॥ अक्ष-
य्यायास्तृतीयायाःसितेपक्षेचमाधवे ॥ १ ॥ येकुर्वंतिचतस्यांवैप्रातःस्नानंभ-
गोदये ॥ तेसर्वेपापनिर्मुक्तायांतिविष्णोःपरंपदं ॥ २ ॥ देवान्पितॄन्मुनीन्य-
स्तुकुर्यादुद्दिश्यतर्पणं ॥ तेनाधीतंचतेनेष्टंतेनश्राद्धशतंकृतं ॥ ३ ॥ मधुसूदन
मभ्यर्च्यकथांशृण्वंतियेनराः ॥ अक्षय्यायांतृतीयायांतेनरामुक्तिभागिनः ॥
॥ ४ ॥ येदानंतत्रकुर्वंतिमधुद्विट्प्रीतयेशुभं ॥ तदक्षय्यंफलत्येवमधुशासन-
शासनात् ॥ ५ ॥ देवर्षिपितृदेवत्यातिथिरेषाशुभावहा ॥ त्रयाणांतृप्तिदात्री

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रुतेधर्मेसनातने ॥ ६ ॥ प्रख्यातिश्चतिथेरस्याःकेनचासीत्तदप्यहं ॥ वक्ष्यामिनृपशार्दूलसावधानमनाःशृणु ॥ ७ ॥ पुरापुरंदरस्यासीद्युद्धंचबलिना सह ॥ देवानांचैवदैत्यानांद्वंद्वयुद्धमभूत्तदा ॥ ८ ॥ सनिर्जित्यबलिंदैत्यंपातालतलवासिनं ॥ पुनर्भुवंसमासाद्यचोतथ्यस्याश्रमंययौ ॥ ९ ॥ तत्रापश्यच्चतत्पत्नींगुर्विणीं[1]मंदगामिनीं ॥ चलच्छ्रोणि[2]तटांबद्धरत्नकांचींसुमध्यमां[3] ॥ ॥ १० क्वणत्कंकणनिक्वाणजितमत्तालिकोकिलां ॥ वल्गु[4]चित्रांबरांरामांमंजुवाचंशुचिस्मितां ॥ ११ ॥ लसत्कुंभस्थलाभ्यांचकुचाभ्यामुपशोभितां ॥ हसत्पद्ममुखांदिव्यांन्यक्कृ[5]तोत्पललोचनां ॥ १२ ॥ केतक्युदरपांडुभ्यांगं-

१ गर्भिणीं। २ श्रोणिर्नितंबः। ३ शोभनकटिदेशां। ४ वल्गु सुंदरं। ५ न्यक्कृते तिरस्कृते उत्पले याभ्यां।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



डाभ्यांचमनोरमां ॥ श्रमोच्छ्[1]संतींमीनाक्षींपर्णशालामुखेस्थितां ॥ १३ ॥
स्वपतींशयनेक्कापिदृष्ट्वातांमोहमागतः ॥ बलात्कारेणबुभुजेगुर्विणींपाकशास-
नः ॥ १४ ॥ गर्भस्थस्तुतदापिंडःस्वस्यघातविशंकया ॥ छादयामाससैवैयोने-
र्द्वारंपादेनदुःखितः ॥ १५ ॥ ततश्च[2]स्कंदवीर्यंतद्भूमावेवबलद्विषः ॥ गर्भस्था-
यचुकोपासौभगवान्पाकशासनः ॥ १६ ॥ तंशशापचगर्भस्थंरुषाताम्रांत-
लोचनः ॥ जात्यंधोभवदुर्बुद्धेमाऽवा[3]मंस्थायतःपदा ॥ १७ ॥ प्रच्छाद्ययोनि-
द्वारंचततोदीर्घतमाह्वयः ॥ पादात्प्रस्कंदिताद्वीर्याज्जयंतःसमजायत ॥ १८ ॥
पश्चादिंद्रोययौशीघ्रमृषेःशापविशंकितः ॥ पलायंतंहरिंदृष्ट्वाजहसुर्बटवोऽखि-

१ श्रमासहामित्यर्थः। २ अस्खलत् । ३ अवज्ञातवानसि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लाः ॥ १९ ॥ ततस्तुव्रीडितोभूत्वाययौमेरोर्महागुहां ॥ तत्रलीनश्चचारासौ-
दुश्चरंवैतपोमहत् ॥ २० ॥ मेरौनिलीयवसतिदेवेंद्रेलज्जयान्विते ॥ गूढेवैं-
ज्ञायतांवार्तांदैतेयाबलिपूर्वकाः ॥ २१ ॥ स्वर्गमाक्रम्यबुभुजुर्देवेंद्रस्यामराव-
तीं ॥ दिक्पालानांविभूतीश्चशंबराद्याबलीयसः ॥ २२ ॥ बलाद्बुभुजिरेहीन
नाथेराष्ट्रेदिवौकसां ॥ रक्षितारमजानंतोदेवाश्चाग्निपुरोगमाः ॥ २३ ॥ पप्र-
च्छुर्धिषणंदेवंदेवाचार्यमकल्मषं ॥ पप्रच्छुरिंद्रवृत्तांतंक्वैतिष्ठतिनःप्रभुः ॥२४॥
दैत्याक्रांतमिदंराष्ट्रंहीननाथंदिवौकसां ॥ कुतोनायातिदेवोऽसौभूयान्कालोग-
तोविभोः ॥ २५ ॥ तंयामोयत्रधिषणप्रार्थयामश्चतंविभुं ॥ इतिपृष्टस्तदादेवै-
र्धिषणस्तानुवाचह ॥ २६ ॥ रसातलेबलिंजित्वाचोतथ्यस्याश्रमंययौ ॥ भु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्त्वापत्नींतुधार्ष्ट्येनतच्छिष्यैरेवनिंदितः ॥ २७ ॥ व्रीडितस्तुदिवंयातुंगुहांमे-
रोर्विवेशह ॥ तत्रैवास्तेशचीयुक्तःस्वकृतंचिंतयन्विभुः ॥ २८ ॥ इतितस्यव-
चःश्रुत्वादेवाअग्निपुरोगमाः ॥ गुहांमेरोर्ययुःशीघ्रंदृष्ट्वाप्रार्थयितुंविभुं ॥ २९ ॥
तत्रदृष्ट्वागुहालीनंदेवेंद्रंपाकशासनं ॥ तुष्टुवुर्विविधैःस्तोत्रैस्तदीयैर्लोकविश्रुतैः॥
॥ ३० ॥ इंद्रतुभ्यंनमस्तेस्तुसर्वदेवाधिपायते ॥ वयंदैत्यैरर्दिताश्चत्वयाहीं-
नाभृशार्दिताः ॥ ३१ ॥ स्थानभ्रष्टाश्चरामोऽगनानादेशेषुदुःखिताः ॥ तस्मा-
दागत्यदेवेंद्रजहिशत्रूनरिंदम ॥ ३२ ॥ इतिस्तुतस्तदादेवैर्निश्चक्रामगुहामु-
खात् ॥ लज्जयावनतोभूत्वापश्यन्भूमिंचचक्षुषा ॥ ३३ ॥ नकिंचिदपिप्रोवा-
चदुःखाद्गद्गदभाषणः ॥ तद्ज्ञात्वाधिषणःप्राहतंसुरेंद्रंभयानतं ॥ ३४ ॥ मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शंकातेसुरपतेकर्माधीनामिदंजगत् ॥ मानामानौसुखंदुःखंलाभालाभौजयाज-
यौ ॥ ३५ ॥ पूर्वकर्मानुरोधेनभवंत्येतेनसंशयः ॥ जीवःकर्मानुगोदुःखंदिष्टंदै-
वेनकालतः ॥ ३६ ॥ प्राज्ञाःप्राप्यनशोचंतिनप्रहृष्यंतिवैसुखात् ॥ तस्मा-
त्प्रारब्धतःप्राप्तंदुःखंचेदंतवप्रभो ॥ ३७ ॥ तत्प्राप्यमघवन्दुःखंनैवशोचितुम-
र्हसि ॥ इत्युक्तोगुरुणाप्राहमघवानमराधिपान् ॥ ३८ ॥ ॥ इंद्रउवाच ॥
॥ परस्त्रीसंगदोषेणबलंवीर्यंयशोऽमलं ॥ मंत्रशक्तिःशस्त्रशक्तिर्विद्याशक्तिश्चमे
हृता ॥ ३९ ॥ अभवंनष्टवीर्योऽद्यतूष्णींतेनवसाम्यहं ॥ श्रुत्वासुरपतेर्वाक्यंदे-
वाआचार्यसंयुताः ॥ ४० ॥ मंत्रयामासुरेकांतेपुनस्तस्यबलाप्तये ॥ तदागु-
रुश्चतान्प्राहकरुणांविद्वदुत्तमः ॥ ४१ ॥ ॥ बृहस्पतिरुवाच ॥ ॥ मासो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वैशाखनामायंप्रियोवैमधुघातिनः ॥ सर्वाश्चातिथयःपुण्यामासेऽस्मिन्माधवप्रिये ॥ ४२ ॥ तत्रापिचसितेपक्षेतृतीयाचाक्षयाह्वया ॥ यस्तस्यांस्नानदानादि श्राद्धंचैवकरोतिवै ॥ ४३ ॥ तस्यपापसहस्राणिनश्यंत्येवनसंशयः ॥ अनंवद्यंतथैश्वर्यंबलंधैर्यंभवंतिच ॥ ४४ ॥ तस्मात्तस्यांतृतीयायांहरिणाबलविद्विषा ॥ स्नानदानादिसद्धर्मान्कारयामोहितामये ॥ ४५ ॥ भविष्यतिचसाशक्तिर्विद्यायांमंत्रशस्त्रयोः ॥ बलंधैर्ययशश्चैवयथापूर्वंभविष्यति ॥ ४६ ॥ इत्येवंतुविचार्याथगुरुर्देवैःसमाहितः ॥ इंद्रेणकारयामासधर्मानेतान्हरिप्रियान् ॥ ॥ ४७ ॥ अक्षय्यायांतृतीयायांभुक्तिमुक्तिफलप्रदान् ॥ तेनपूर्ववदेवासीद्बलंधै-

१ विष्णोः । २ निर्मलं । ३ इंद्रेण ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्यादिकंहरेः ॥ ४८ ॥ परस्त्रीसंगदोषोऽपिसद्यएवव्यलीयत[1] ॥ पश्चाद्धताशुभःशक्रोराहोर्मुक्तइवोडुपः[2] ॥ ४९ ॥ पश्चाद्देवैःसमायुक्तोविनिर्जित्यतथाऽसुरान् ॥ देवतानांतथामध्येशुशुभेचहरिर्यथा ॥ ५० ॥ तृतीयायाश्चमाहात्म्याद्भाग्योद्रिक्तो[3]ऽमरावतीं ॥ विवेशविभवैःसार्धंशंखतूर्यादिनिःस्वनैः ॥ ५१ ॥ अनुज्ञाताश्चशक्रेणस्वधामानियुःसुराः ॥ ततस्तेयज्ञभागांश्चलेभिरेचयथा पुरा ॥ ५२ ॥ पिंडभागांश्चपितरोयथापूर्वंप्रपेदिरे ॥ स्वाध्यायैर्मुनयस्तुष्टादैत्यानांचपराजयात् ॥ ५३ ॥ तदाप्रभृतिलोकेऽस्मिंस्तृतीयाचाक्षयाह्वया ॥ प्रख्यातासर्वलोकेषुदेवार्षिपितृतुष्टिदा ॥ ५४ ॥ तस्मात्पुण्यतमाचैषासर्वकर्म-

१ विनष्टः । २ चंद्रः । ३ भाग्योत्कर्षवान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निकृंतनी ॥ भुक्तिमुक्तिप्रदानॄणांतृतीयाचाक्षयाह्वया ॥ ५५ ॥ ॥ इतिश्री-
स्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेअक्षय्यतृतीयामहिमकथनंनाम
द्वाविंशोऽध्यायः ॥ २२ ॥ ॥ श्रुतदेवउवाच ॥ ॥ तिथिष्वेतासुपुण्यासु
द्वादशीसितपक्षगा ॥ वैशाखेमासिराजेंद्रसर्वाघौघविनाशिनी ॥ १ ॥ किंदा-
नैःकिंतपोभिश्चकिमुपोष्यैर्व्रतैश्चकिं ॥ किमिष्टैश्चैवपूर्तैश्चद्वादशीयैर्नसेविता
॥ २ ॥ गंगायामुपरागेतुयोदद्याद्गोसहस्रकं ॥ द्वादश्यांमाधवेमासिप्राप्नोत्येक-
गवार्पणात् ॥ ३ ॥ गंगायांचैवदुर्भिक्षेप्रत्यहंकोटिभोजनात् ॥ तत्फलंसमवा-
प्नोतिद्वादश्यामेकभोजनात् ॥ ४ ॥ यद्दत्तमर्हतेचान्नंद्वादश्यांचसितेशुभे ॥

१ ग्रहणे । २ योग्याय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिक्थेसिक्थेभवेत्तस्यकोटिब्राह्मणभोजनं ॥ ५ ॥ योदद्यात्तिलपात्रंतुद्वादश्यां मधुसंयुतं॥ निर्धूताखिलबंधस्तुविष्णुलोकमवाप्नुयात्॥६॥ एकादश्यांसितेपक्षे कुर्याज्जागरणंहरेः ॥ सजीवन्नेवमुक्तःस्यात्तुष्टाःस्युःसर्वदेवताः ॥ ७ ॥ कोटीं-दुसूर्यग्रहणेतीर्थान्याप्लुत्ययत्फलं ॥ तत्फलंसमवाप्नोतिप्रातःस्नात्वाहरेर्दिने ॥ ॥ ८ ॥ तुलस्याःकोमलैःपत्रैर्द्वादश्यांविष्णुमर्चयेत् ॥ ससर्वकुलमुद्धृत्यविष्णु-लोकेमहीयते ॥ ९ ॥ द्वादश्यांमाधवेमासियोदद्याद्गांसवत्सकां ॥ सकोटिकुल-मुद्धृत्यविष्णुलोकाधिपोभवेत् ॥ १० ॥ यमंपितॄन्गुरून्देवान्विष्णुमुद्दिश्यमा-नवः ॥ माधवेशुक्लद्वादश्यांसोदकुंभंसदक्षिणं ॥ ११ ॥ दध्यन्नंचैवयोदद्यात्त-

१ पक्वतंडुलै ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यपुण्यफलंशृणु ॥ प्रयागेप्रत्यहंचैवकुर्याद्यःकोटिभोजनं ॥ १२ ॥ यावत्संव-
त्सरंपुण्यंषड्रसान्नैर्मनोरमैः ॥ तत्फलंसमवाप्नोतिमधुशासनशासनात् ॥१३॥
शालिग्रामशिलादानंयःकुर्याद्द्वादशीदिने ॥ वैशाखेशुक्लपक्षेतुसर्वपापैःप्रमुच्य-
ते ॥ १४ ॥ सप्तद्वीपवतींभूमिंगंगायांचरविग्रहे ॥ योदद्यात्कोटिवारंतुतेनतु-
ल्यंफलंविदुः ॥ १५ ॥ द्वादश्यांपयसायस्तुस्नापयेन्मधुसूदनं ॥ राजसूया-
श्वमेधाभ्यांयत्फलंपरिजायते ॥ १६ ॥ तत्फलंसमवाप्नोतिगंगायांनात्रसंश-
यः ॥ पंचामृतैश्चयोविष्णुंभक्त्यासंस्नापयेद्विभुं ॥१७॥ ससर्वंकुलमुद्धृत्यविष्णु-
लोकेमहीयते ॥ योदद्यात्पानकंत्वस्यांसायाह्नेप्रीतयेहरेः ॥ १८ ॥ जीर्णंपापं
जहात्याशुजीर्णांत्वचमिवोरगः ॥ सायाह्नेचैवयोदद्यादुर्वारुकरसायनं ॥ १९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवेन्मुक्तःकर्मबंधादुर्वारुकरसायनात् ॥ इक्षुदंडंचूतफलंदद्याद्रंभाफलानिच ॥
॥ २० ॥ नविच्छित्तिःसंततेःस्यात्तस्यवैशतपूरुषं ॥ योदद्याद्गंधलेपंतुसायाह्ने
द्वादशीदिने ॥ २१ ॥ बाह्योपघातैःसकलैर्मुच्यतेनात्रसंशयः ॥ यत्किंचित्कु-
रुतेपुण्यंद्वादश्यांराजसत्तम ॥ २२ ॥ माधवेतुसितेपक्षेतदक्षय्यफलंभवेत् ॥
प्रख्यातिमस्यावक्ष्यामियेनजातेतिभूमिप ॥ २३ ॥ श्रवणात्सर्वपापघ्नींसर्व-
मंगलदायिनीं ॥ पुराकाश्मीरदेशेतुद्विजोदेवव्रताह्वयः ॥ २४ ॥ तस्यासी-
न्मालिनीनामतनयाचारुरूपिणी ॥ ददौतांसत्यशीलायविप्रवर्यायधीमते ॥
॥ २५ ॥ तांगृहीत्वाययौधीमान्स्वदेशंयवनाह्वयं ॥ रूपयौवनसंपन्नातस्यनै-
वप्रियाऽभवत् ॥ २६ ॥ सदाविद्वेषसंयुक्तस्तस्यांतिष्ठतिनिष्ठुरः ॥ नान्यस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कस्यचिद्द्वेषीतांविनानृपतेपतिः ॥ २७ ॥ तस्मिन्साक्रोधसंयुक्तावशीकरणलं-
पटा ॥ अपृच्छत्प्रमदाराजन्यास्त्यक्ताःपतिभिःपुरा ॥ २८ ॥ ताभिरुक्तातुसा
भूपवश्योभर्ताभविष्यति ॥ अस्माकंप्रत्ययोजातोभर्तृत्यागावमाननात् ॥२९॥
प्रयुज्यभेषजंवश्यंनीताहिपतयःपुरा ॥ योगिनींत्वंतुगच्छाद्यदास्यतेभेषजंशु-
भं ॥ ३० ॥ नविकल्पस्त्वयाकार्योभवितादासवत्पतिः ॥ योगिनीमंदिरंग-
त्वातासांवाक्येनभूपते ॥ ३१ ॥ प्रसादमतुलंतस्यालेभेदुश्चारिणीसती ॥ श-
तस्तंभसमायुक्तांकुटींभेजेत्वरान्विता ॥ ३२ ॥ सुविस्तृतांसुवर्चस्कांतथैवाया-
तयामिकां ॥ प्रावृतांदीर्घवस्त्रेणसुधालेपेनवर्तितां ॥ ३३ ॥ दीर्घाभिश्चसटा-
भिस्तुप्रावृतादीप्तिसंयुता ॥ परिचारसुखोपेतावीक्षमाणाशनैःशनैः ॥ ३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अक्षसूत्रकरासातुजपंतीप्रार्थितातया ॥ ददौवश्यकरंमंत्रंक्षोभकंप्रत्ययान्वितं
॥ ३५ ॥ ततःसाप्रणताभूत्वापदभ्यांदत्वांऽगुलीयकं ॥ वज्रमाणिक्यसंयुक्तम-
तिरक्तप्रभान्वितं ॥ ३६ ॥ मृदुकांचनसंयुक्तंभानुरश्मिसमद्युति ॥ ततोदृष्ट्वातु
संतुष्टापादस्थंचांगुलीयकं ॥ ३७ ॥ दृष्टयाचतयाज्ञातंतत्पतेरवमानजं ॥ त-
दोक्ताहितयाभूपतापस्याहितयुक्तया ॥ ३८ ॥ चूर्णोरक्षान्वितोह्येषसर्वभूतव-
शंकरः ॥ चूर्णंभर्तरिसंयुज्यरक्षांग्रीवाश्रयांकुरु ॥ ३९ ॥ भविष्यतिपतिर्व-
श्योनान्यांयास्यतिसुंदरि ॥ नाप्रियंवदतिक्वापिदुश्चारिण्यास्तवापिच ॥४०॥
चूर्णरक्षांगृहीत्वासाप्राप्ताभर्तृगृहंपुनः ॥ प्रदोषेपयसायुक्तश्चूर्णोभर्तरियोजितः
॥ ४१ ॥ ग्रीवायांहिकृतारक्षानविचारःकृतस्तया ॥ तदासपीतचूर्णस्तुभर्तान्-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवरोत्तम ॥ ४२ ॥ तच्चूर्णात्क्षयरोगोऽभूत्पतिःक्षीणोदिनेदिने ॥ गुह्येतुक्रम-
योजाताघोरादुष्टव्रणोद्भवाः ॥ ४३ ॥ दिनैःकतिपयैराजन्पत्यावेवमवस्थि-
ते ॥ उवासस्वेच्छयासापिपुंश्चलीदुष्टचारिणी ॥ ४४ ॥ हततेजास्ततोभर्ता
तामुवाचाकुलेंद्रियः ॥ क्रंदमानोदिवारात्रंदासोऽस्मितवशोभने ॥ ४५ ॥ त्रा-
हिमांशरणंप्राप्तंनकांक्षेयपरास्त्रियं ॥ तत्तस्यक्रंदितंज्ञात्वाभीतासामेदिनीपते ॥
॥४६॥ अलंकारकृतेपत्युर्जीवनेच्छुर्नवैतदा ॥ योगिनींचययौशीघ्रंतस्यैसर्वंन्य-
वेदयत् ॥ ४७ ॥ तयाचभेषजंदत्तंद्वितीयंदाहशांतये ॥ दत्तेचभेषजेतस्मि-
न्स्वस्थोऽभूत्तत्क्षणात्पतिः ॥ ४८ ॥ पूर्वचूर्णोद्भवोदाहःशांतस्तस्याभवत्तदा ॥
ततःप्रभृतिभर्ताचवश्योऽभूद्भवनेस्थितः ॥ ४९ ॥ तिष्ठत्युपपतिर्गेहेगृहकृत्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदेशतः ॥ सर्ववर्णसमुद्भूताजारास्तिष्ठंतिवैगृहे ॥ ५० ॥ नकिंचिद्वचनेशक्ति-
र्भर्तुर्जाताकथंचन ॥ ततस्तेनैवदोषेणसर्वांगेषुचजज्ञिरे ॥ ५१ ॥ कृमयश्चा-
स्थिभेत्तारःकालांतकयमोपमाः ॥ तैर्नासाजिह्वयोश्चासीच्छेदःकर्णद्वयस्यच ॥
॥ ५२ ॥ स्तनयोश्चांगुलीनांचपंगुत्वमपिचागतं ॥ तेनपंचत्वमापन्नागतानर-
कयातनां ॥ ५३ ॥ ताम्रभांडेचसादग्धायुगानांशतपंचकं ॥ सूक्ष्माणितिल-
मात्राणिकृत्त्वा[२]खंडान्यनेकशः ॥ ५४ ॥ भक्ष्यमाणानिराहारारुदतीस्वेनकर्मणा
॥ श्वानयोनिषुसंजाताशतवारंपुनःपुनः ॥ ५५ ॥ छिन्ननासाछिन्नकर्णाकृमि-
मूर्धानिरंतरं ॥ छिन्नपुच्छाभग्नपादाताडिताचगृहेगृहे ॥ ५६ ॥ पश्चात्सौवीर-

१ गृहकर्मामिषेण । २ छित्त्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशेषुपद्मबंधोर्द्विजस्यच ॥ दास्यागृहेशुनीजातावहुदुःखसमाकुला ॥ ५७ ॥
छिन्नकर्णाछिन्ननासाछिन्नपुच्छांघ्रिरातुरा ॥ कृमिपूर्णशिरानित्यंक्रमियोनिश्च
तिष्ठति ॥ ५८ ॥ एवंत्रिंशद्गतावर्षास्तस्मिन्जन्मनिभूमिप ॥ दैवात्कर्मविपा-
केनवैशाखेमेषगेरवौ ॥ ५९ ॥ द्वादश्यांशुक्लेपक्षेतुपद्मबंधोस्तनूभवः ॥ नद्यां
स्नात्वाशुचिर्भूत्वासार्द्रवस्त्रोगृहंययौ ॥ ६०॥ तुलसीवेदिकांप्राप्यपादाववनिने-
जह ॥ वेदिकायाअधोदेशेसाशुनीस्वापमागता ॥ ६१ ॥ प्राक्सूर्योदयवेला-
याःपादोदकपरिप्लुता॥ सद्योध्वस्ताशुभाजाताजातिस्मृतिरभूत्क्षणात् ॥६२॥
स्मृत्वाकर्मकृतंपूर्वंसाशुनीतापसंतदा ॥ चुक्रोशकरुणंदीनामुनेत्राहीतिवैपुनः॥
॥ ६३ ॥ स्वकर्मचमुनींद्रायस्मृत्वाचख्यौभयाकुला ॥ भर्तुर्विषप्रयोगंतुस्व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यदुश्चरितंतथा ॥ ६४ ॥ याऽन्यापियुवतीब्रह्मन्भर्तुर्वैश्यंसमाचरेत् ॥ वृथा-
धर्मादुराचारापच्यतेताम्रभाजने ॥६५॥ भर्तानाथोगुरुर्भर्ताभर्तादैवतमुत्तमं॥
विप्रियंतस्यकृत्वास्त्रीकथंसुखमवाप्नुयात् ॥ ६६ ॥ तिर्यग्योनिशतंयातिकृमि-
कोटिशतानिच ॥ तस्माद्भूसुरकर्तव्यंस्त्रीभिर्भर्तुर्वचःसदा ॥ ६७ ॥ साहंया-
स्येपुनर्योनिंकुत्सितांयातनान्वितां ॥ यदिनोद्धरसेब्रह्मन्नद्यत्वदृष्टिसंमुखां ॥
॥ ६८ ॥ तस्मादुद्धरमांब्रह्मन्दुष्कृतांपापचारिणीं ॥ सुकृतस्यप्रदानेनवैशा-
खेशुक्लपक्षके ॥ ६९ ॥ याकृतातुत्वयाब्रह्मन्द्वादशीपुण्यवर्धिनी ॥ तस्यांत्वया
कृतंपुण्यंस्नानदानान्नभोजनैः ॥ ७० ॥ दुश्चारिण्याअपिब्रह्मंस्तेनमुक्तिर्भवि-
ष्यति ॥ यस्यांतूषसिस्वगृहेस्नात्वापिमनुजःकिल ॥७१॥ सर्वतीर्थफलावाप्तिं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लभतेनात्रसंशयः ॥ तप्तंजप्तंहुतंदत्तंकृतंदेवार्चनादियत् ॥ ७२ ॥ तदक्ष-
य्यफलंज्ञेयंयत्कृतंद्वादशीदिने ॥ एवंविधफलंयत्स्यात्तद्देहिसकलंमम ॥ ७३ ॥
द्वादश्यामुपवासेनत्रयोदश्यांतुपारणात् ॥ यत्फलंस्यात्तदप्यद्यातेनमुक्तिर्भवि-
ष्यति ॥ ७४ ॥ दयांकुरुमहाभागदीनायांदीनवत्सल ॥ दीननाथोजगन्नाथो
युष्मन्नाथोजनार्दनः ॥ ७५ ॥ तदीयास्तादृशाएवयथाराजातथाप्रजाः ॥ वै-
वस्वतपदध्वंसिन्परित्राहिसुदुःखितां ॥ ७६ ॥ त्वद्द्वारवासिनींदीनांशुनींमां
दीनवत्सल ॥ ब्रह्महत्यासहस्त्रंवागोहत्यानांसहस्त्रकं ॥ ७७ ॥ अगम्यानांच
कोटिश्चदहत्येषाशुभातिथिः ॥ तस्यांकृतंमहापुण्यंमह्यंदत्वामहामुने ॥ ७८ ॥
मामुद्धरसमुद्विग्नांदीननाथदयांकुरु ॥ अंतेतुभ्यंद्विजेंद्रायनमउक्तिंविधेमहि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ७९ ॥ इतितस्यावचःश्रुत्वाशुनीमाहमुनेःसुतः ॥ स्वकृतंजंतवोऽश्नंतिसु-
खदुःखात्मकंशुनि ॥ ८० ॥ तस्मात्किमुत्वयाकार्यंक्षुद्रयापापशीलया ॥ य-
याभर्तावशंनीतोरक्षाचूर्णादिभिर्द्विजः ॥८१॥ साधुभ्योयत्कृतंपापंस्वस्यदुःख-
करंभवेत् ॥ साधुभ्योयत्कृतंपुण्यंस्वस्यदुःखहरंभवेत् ॥ ८२॥ उभयभ्रंशिता-
मेतिपापेभ्योयत्कृतंभवेत् ॥ शर्करामिश्रितंक्षीरंकाद्रवेयेनिवेदितं ॥ ८३ ॥
विषवृद्धिकरंदृष्टमेवंपापकरंभवेत् ॥ वदत्येवंमुनिसुतेशुनीदुःखेनदूषिता ॥८४॥
पुनश्चुक्रोशोर्ध्वमुखीतत्पित्रेबहुभाषिणी ॥ पद्मबंधोपरित्राहिशुनींत्वद्द्वारवासि-
नीं ॥ ८५ ॥ त्वदुच्छिष्टाशिनींनित्यंत्वंपाहीतिपुनःपुनः ॥ स्वपोष्यायेहिवर्त-
तेगृहस्थस्यमहात्मनः ॥ ८६ ॥ तेषामुद्धरणंकार्यमितिधर्मविदांमतं ॥ चांडा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लावायसाश्चैवसारमेयाश्वनित्यशः ॥ ८७ ॥ गृहस्थानांदयापात्रंप्रत्यहंबलि-
भोजिनः ॥ यःशक्तोनोद्धरेत्पोष्यंरोगाद्युपहतंयदि ॥ ८८ ॥ सोऽध:पतेन्नसं-
देहइतिवेदविदांमतं ॥ भर्तारमेकंजगतांहिकर्ताकृत्वात्मनापातिसमस्तजंतून्
॥ ८९ ॥ दारादिरूपव्यपदेशतोहरिस्तस्मात्तदाज्ञाखलुपोष्यरक्षा ॥ तां
पोष्यरक्षांपरित्यज्यजंतुर्दैवेनक्लृप्तांयदिवर्ततेऽन्यथीः ॥ ९० ॥ सएवद्रोग्धास-
कलस्यहंताकीनांशलोकंनितरांप्रयाति ॥ कर्तव्यत्वाद्दयालुत्वाद्दीनामुद्धरदुर्म-
तिं ॥ ९१ ॥ इतितस्यावचःश्रुत्वादुःखार्तायागृहेस्थितः ॥ निश्चक्रामगृहात्तू-
र्णंपद्मबंधुर्दयानिधिः ॥ ९२ ॥ किमेतदितितांप्राहपुत्रःसर्वंन्यवेदयत् ॥ सतु

१ श्वानः । २ पीडितं । ३ त्यक्त्वा । ४ यमलोकं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रवचःश्रुत्वातमेवंप्राहविस्मितः ॥ ९३ ॥ ॥ पद्मबंधुरुवाच ॥ ममात्म-
जकथंवाक्यमीदृशंव्यात्हृतंत्वया ॥ नसाधूनामिदंवाक्यंभवतीहचपावनं ॥
॥ ९४ ॥ आत्मसौख्यकराःपापाभवंतिपरिभाविताः ॥ पश्यपुत्रजनाःसर्वेपरो-
पकरणायवै ॥ ९५ ॥ शशीसूर्योऽथपवनोमेदिनीहुतभुग्जलं ॥ चंदनंपादपाः
संतःपरोपकरणेस्थिताः ॥ ९६ ॥ अस्थिदानंकृतंपुत्रकृपयाहिदधीचिना ॥ दे-
वानामुपकारायज्ञात्वादैत्यान्महाबलान् ॥ ९७ ॥ कपोतार्थेस्वमांसानिशिबि-
नाभूभुजापुरा ॥ प्रदत्तानिमहाभागश्येनायक्षुधितायवै ॥ ९८ ॥ जीमूतवाह-
नोराजापुरासीत्क्षितिमंडले ॥ तेनापिजीवितंदत्तंगरुडायमहात्मने ॥ ९९ ॥
तस्माद्दयालुनाभाव्यंभूसुरेणविपश्चिता ॥ शुद्धेवर्षतिदेवस्तुकिमशुद्धेनवर्षति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ १०० ॥ किंनदीपयतेचंद्रश्चांडालानांगृहंसदा ॥ तस्मादहंशुनीमेतांयाचंतीं चपुनःपुनः ॥ १ ॥ उद्धरिष्येनिजैःपुण्यैःपंकमग्नांचगांयथा ॥ इतिपुत्रंनिराकृत्यप्रतिजज्ञेमहामतिः ॥ २ ॥ दत्तंदत्तंमयापुण्यंद्वादशीदिनसंभवं ॥ शुनि गच्छहरेर्धामनिर्धूताखिलकल्मषा ॥ ३ ॥ तद्वाक्यात्सहसाभूपादिव्याभरणभूषिता ॥ विमुच्यदेहंजीर्णंतंदिव्यरूपधराशुभा ॥ ४ ॥ शतादित्यप्रभाजाता सावित्रीप्रतिमायथा ॥ जगामामंत्र्यतंविप्रंद्योतयंतीदिशोदश ॥ ५ ॥ भुक्त्वा दिविमहाभोगान्पश्चाज्जातामहीतले ॥ नरनारायणाद्देवादुर्वशीनामनामतः॥ ॥६॥ वैशाखशुक्लद्वादश्याःप्रभावेणवरांगना ॥ देवानांचप्रियाजाताअप्सरस्त्वं चसाययौ ॥ ७ ॥ यद्योगिगम्यंहुतभुक्प्रकाशंवरंवरेण्यंपरमार्थरूपं॥ यत्प्राप्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संतोऽपिहियांतिमोक्षंतत्प्रापरूपंचशुनीहिदेवी ॥८॥ पश्चात्सपद्मबंधुर्हितांतिथिंपुण्यवर्धनीं ॥ लोकेप्रख्यापयामासमधुद्विट्प्राणवल्लभां ॥९॥ कोटींदुसूर्यग्रहणाधिकासासमस्तपुण्याधिकपुण्यरूपा ॥ यज्ञैःसमस्तैरतिरिच्यमानाद्विजेनख्याताभुवनत्रयेच ॥११०॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येनारदांबरीषसंवादेशुनीमोक्षप्राप्तिर्नामत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ छ ॥

॥ श्रुतदेवउवाच ॥ ॥ यास्तिस्रास्तिथयःपुण्याअंतिमाःशुक्लपक्षके ॥ वैशाखेमासिराजेंद्रपूर्णिमांताःशुभावहाः ॥ १ ॥ अंत्याःपुष्करिणीसंज्ञाःसर्वपापक्षयावहाः ॥ माधवेमासियःपूर्णंस्नानंकर्तुंनचक्षमः ॥ २ ॥ तिथिष्वेतासुसस्नायात्पूर्णमेवफलंलभेत् ॥ सर्वेदेवास्त्रयोदश्यांगर्जंतस्तंपुनंतिहि ॥ ३ ॥ चत-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दश्यांसयज्ञाश्चदेवाएतान्पुनंतिहि ॥ पूर्णायांसर्वतीर्थैश्चविष्णुनासहसंस्थि-
ताः ॥ ४ ॥ ब्रह्मघ्नंवासुरापंवासर्वानेतान्पुनंत्यपि ॥ एकादश्यांपुराजज्ञेवै-
शाख्याममृतंशुभं ॥ ५ ॥ द्वादश्यांपालितंतच्चविष्णुनाप्रभविष्णुना ॥ त्रयो-
दश्यांसुधांदेवान्पाययामासवैहरिः ॥ ६ ॥ जघानचचतुर्दश्यांदैत्यान्दे-
वविरोधिनः ॥ पूर्णायांसर्वदेवानांसाम्राज्याप्तिर्बभूवह ॥ ७ ॥ ततोदेवाःसु-
संतुष्टाएतासांचवरंददुः ॥ तिसृणांचतिथीनांवैप्रीत्युत्फुल्लविलोचनाः ॥ ८ ॥
एतावैशाखमासस्यतिस्रस्तुतिथयःशुभाः ॥ पुत्रपौत्रादिफलदानराणांपापहा-
निदाः ॥ ९ ॥ योमाधवेतुसंपूर्णेनस्नातिमनुजाधमः ॥ तिथित्रयेऽपिसस्नात्वा
पूर्णमेवफलंलभेत् ॥ १० ॥ तिथित्रयेऽप्यकुर्वाणःस्नानदानादिकंनरः ॥ चां-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



डालींयोनिमासाद्यसभवेद्ब्रह्मराक्षसः ॥ ११ ॥ उष्णोदकेनयःस्नातिमाधवेच
तिथित्रये ॥ रौरवंनरकंयातियावदिंद्राश्चतुर्दश ॥ १२ ॥ पितॄन्देवान्समुद्दि-
श्यदध्यन्नंनददातियः ॥ पैशाचींयोनिमासाद्यातिष्ठत्याभूतसंप्लवं ॥ १३ ॥ प्र-
वृत्तानांचकामानांमाधवेनियमेकृते ॥ अवश्यंविष्णुसायुज्यंप्राप्यतेनात्रसंशयः
॥ १४ ॥ आमासंनियमाशक्तःकुर्यादेतद्दिनत्रये ॥ तेनपूर्णफलंप्राप्यमोदतेवि
ष्णुमंदिरे ॥ १५ ॥ योवैदेवान्पितॄन्विष्णुंगुरुमुद्दिश्यमानवः ॥ नस्नानादिक-
रोत्यद्धातस्यशापप्रदावयं ॥ १६ ॥ निःसंतानोनिरायुश्चनिःश्रेयस्कोभवेच्च-
सः॥ इतिदेवावरंदत्वास्वधामानिययुःपुरा ॥१७॥ तस्मात्तिथित्रयंपुण्यंसर्वाघौ-
घविनाशनं ॥ अंत्यंपुष्करिणीसंज्ञंपुत्रपौत्रविवर्धनं ॥ १८ ॥ यानारीसुभ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गासूपपायसंपूर्णिमादिने ॥ ब्राह्मणायसकृद्दद्यात्कीर्तिमंतंसुतंलभेत् ॥ १९ ॥
कुटुंबभोजनंयस्तुगृहीकुर्याद्दिनत्रये ॥ दिनेदिनेऽश्वमेधस्यफलमेतिनसंशयः॥
२०॥ सहस्रनामपठनंयःकुर्याच्चदिनत्रये ॥तस्यपुण्यफलंवक्तुंकःशक्तोदिविवा-
भुवि॥२१॥सहस्रनामभिर्देवंपूर्णायांमधुसूदनं॥ पयसास्नाप्यवैयातिविष्णुलोक
मकल्मषः॥२२॥समस्तविभवैर्यस्तुपूजयेन्मधुसूदनं॥नतस्यलोकाःक्षीयंतेयुग-
कल्पादिव्यत्यये॥ २३॥ अस्नात्वाचाप्यदत्वाचवैशाखीचगतायदि ॥ सब्रह्म-
हागुरुघ्नश्चपितृणांघातकस्तथा ॥ २४ ॥ श्लोकार्धंश्लोकपादंवानित्यंभागव-
तोद्भवं ॥ वैशाखेचपठन्मर्त्योब्रह्मत्वमुपपद्यते ॥ २५ ॥ योवैभागवतंशास्त्रंशृ-
णोत्येतद्दिनत्रये ॥ नपापैर्लिप्यतेक्वापिपद्मपत्रमिवांभसा ॥ २६ ॥ देवत्वंम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नुजैःप्राप्तंकैश्चित्सिद्धत्वमेवच ॥ कैश्चित्प्राप्तोब्रह्मभावोदिनत्रयनिषेवणात् ॥
॥ २७ ॥ ब्रह्मज्ञानेनवैमुक्तिःप्रयागमरणेनवा ॥ अथवामासिवैशाखेनियमेन
जलाप्लुतेः ॥ २८ ॥ नीलंवृषंसमुत्सृज्यवैशाख्यांचजलाप्लुतः ॥ समस्तबंध-
निर्मुक्तःपुमर्थान्यातिसर्वथा ॥ २९ ॥ गांदद्याद्योद्विजेंद्रायसीदंतेचकुटुंबिने ॥
इहापमृत्युनिर्मुक्तःपरत्रचपरंव्रजेत् ॥३०॥ स्नानदानविहीनस्तुवैशाखींचैवयो
नयेत् ॥ श्वानयोनिशतंप्राप्यविष्ठायांजायतेकृमिः ॥ ३१ ॥ तिस्रःकोट्योऽ
र्धकोटिश्चतीर्थानिभुवनत्रये ॥ संभूयमंत्रयांचक्रुःपापसंघातशंकिताः ॥ ३२ ॥
जनाअस्मासुपापिष्ठाविसृजंतिस्वकंमलं ॥ तदस्माकंकथंगच्छेदितिचिंतास-

१ स्नानात् । २ चतुर्विधपुरुषार्थान्प्राप्नोति । ३ दरिद्रायेत्यर्थः । ४ मोक्षं । ५ मिलित्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्विताः ॥ ३३ ॥ तीर्थपादंहरिंजग्मुःशरण्यंशरणंविभुं ॥ स्तुत्वाचबहुभिः स्तोत्रैःप्रार्थयामासुरंजसा ॥ ३४ ॥ देवदेवजगन्नाथसर्वाघौघविनाशन ॥ जनाअस्मासुपापिष्ठाःस्नात्वापापानिसर्वशः ॥ ३५ ॥ विसृज्यत्वत्पदंयांति त्वदाज्ञाधारिणोहरेः ॥ अस्माकंचैवतत्पापंकथंगच्छेज्जनार्दन ॥ ३६ ॥ तदुपायंवदार्तानांत्वत्पादशरणैषिणां ॥ इतितीर्थैःप्रार्थितस्तुभगवान्भूतभावनः ॥ ३७ ॥ प्रहसन्प्राहतीर्थानिमेघगंभीरयागिरा ॥ ॥ श्रीभगवानुवाच ॥ ॥ सितेपक्षेमेषसूर्येवैशाखेतुदिनत्रये ॥ ३८ ॥ सर्वतीर्थमयेपुण्येममापिप्राणवल्लभे ॥ यूयंभगोदयात्पूर्वंबहिःसंस्थजलाप्लुताः ॥ ३९ ॥ विमुक्ताघाःपुण्यरूपाभवताशुसुनिर्मलाः ॥ भवद्भिश्चविमुक्ताघैर्येनस्नातादिनत्रये ॥ ४० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषुतिष्ठतुतत्पापंजनैर्युष्मद्विरेचितं ॥ इतितीर्थपदोविष्णुस्तीर्थानांचवरंददौ ॥
॥ ४१ ॥ अनुज्ञायचतान्याशुतत्रैवांतरधीयत ॥ स्वधामानिततःप्रापुस्तानि
तीर्थानिसर्वशः ॥ ४२ ॥ प्रतिवर्षंतुवैशाखेतथैवांत्यदिनत्रये ॥ विष्ण्वाज्ञ-
याःप्रकुर्वंतिप्रातःस्नानंभगोदये ॥ ४३ ॥ तेनाघौघांविमुच्यैवयांतिनिर्मलताम-
हो ॥ येतुस्नानंनकुर्वंतिवैशाखांत्यदिनत्रये ॥ ४४ ॥ तेभवंतुसमस्तानांजनानां
पातकाश्रयाः ॥ इतिशापंचतीर्थानिह्यस्नातानांददंतिहि ॥ ४५ ॥ नतेनस-
दृशःपापीयोनस्नातोदिनत्रये ॥ ४६ ॥ विचारितेपुशास्त्रेषुनदृष्टोनचवैश्रुतः
॥ ४७ ॥ तस्माद्दिनत्रयेकार्यंस्नानदानार्चनादिकं ॥ अन्यथानरकंयातियाव-
दिंद्राश्चतुर्दश ॥ ४८ ॥ इत्येतत्सर्वमाख्यातंश्रुतकीर्तेमहीपते ॥ पृष्टंवैशाखमा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हात्म्यंयथादृष्टंयथाश्रुतं ॥ ४९ ॥ माहात्म्यस्यचलेशोऽयंमाधवस्यानुवर्णितः ॥ कात्स्न्यद्वितुंब्रह्मणापिनाऽलंवर्षशतैरपि ॥ ५० ॥ पुराकैलासशिखरेपार्वत्यै शंकरःस्वयं ॥ प्राहमाधवमाहात्म्यंपृच्छंत्यैशतवत्सरं ॥ ५१ ॥ तथापिनांतमग- दशक्तोविरराामह ॥ कोनुवर्णयितुंशक्तःकात्स्न्यान्माहात्म्यमुत्तमं ॥ ५२ ॥ वि- नाविष्णुंजगन्नाथंनारायणमनामयं ॥ पुरासर्वेऽपिऋषयोमाहात्म्यंपापनाशनं ॥ ५३ ॥ लेशंलेशंचव्याचख्युर्जनानांहितकाम्यया ॥ नांतःकेनापिव्या- ख्यातोह्यशक्तत्वान्महीपते ॥ ५४ ॥ त्वंचमासेतुवैशाखेकुरुदानादिसत्क्रियाः तेनभुक्तिंचमुक्तिंचसंप्राप्स्यसिनसंशयः ॥ ५५ ॥ इतितंबोधयित्वातुमैथिलं जनकाह्वयं ॥ श्रुतदेवस्तमामंत्र्यगंतुंचक्रेमनस्तदा ॥ ५६ ॥ जाताह्लादःस

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजर्षिर्गलद्धाष्पाकुलेक्षणः ॥ उत्सवंकारयामासस्वाभिवृद्ध्यैमनोरमं ॥५७॥
ग्रामंप्रदक्षिणीकृत्यशिविकामधिरोप्यतं॥ चतुरंगवलैर्युक्तःस्वयंपृष्ठमथान्वगा-
त् ॥ ५८ ॥ पुनःस्वांतःपुरंप्राप्यसकलैर्विभवैरपि ॥ वस्त्रैराभरणैश्चैवगोभूति-
लहिरण्यकैः ॥ ५९ ॥ प्रणम्यचपरिक्रम्यतस्थौप्रांजलिरग्रतः ॥ ततःसतुम-
हातेजाःश्रुतदेवोमहायशाः ॥ ६० ॥ संतुष्टःपरमप्रीतोययौधामस्वकंमुनिः ॥
॥ नारदउवाच ॥ इत्येतत्परमाख्यानमंबरीषतवोदितं ॥ ६१ ॥ श्रवणा-
त्सर्वपापघ्नंसर्वसंपद्विधायकं ॥ तेनभुक्तिंचमुक्तिंचज्ञानंमोक्षंचविंदसे॥ ६२॥
इतितस्यवचःश्रुत्वाअंबरीषोमहायशाः॥ प्रहृष्टांतरवृत्तिश्चबाह्यव्यापारवर्जितः
॥ ६३ ॥ प्रणनामतथामूर्ध्नादंडवत्पतितोभुवि ॥ विभवैरखिलैश्चापिपूजया-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मासतंपुनः ॥ ६४ ॥ संपूजितस्तमामंत्र्यनारदोभगवान्मुनिः ॥ लोकांतरंय-
योधीमान्शापान्नैकत्रसंस्थितः ॥ ६५ ॥ अंबरीषोऽपिराजर्षिर्नारदोक्तानिमा-
न्शुभान् ॥ धर्मान्कृत्वाविलीनोऽभूत्परेब्रह्मणिनिर्गुणे ॥ ६६ ॥ सूतउवाच ॥
॥ यइदंपरमाख्यानंपापघ्नंपुण्यवर्धनं ॥ शृणुयाद्वाचयेद्वापिसयातिपरमांग-
तिं ॥ ६७ ॥ लिखितंपुस्तकंयेषांगृहेतिष्ठतिमानद ॥ तेषांमुक्तिःकरस्थाहि
किमुतच्छ्रवणादिना ॥ ६८ ॥ ॥ ॥ इतिश्रीस्कंदपुराणेवैशाखमाहात्म्येना-
रदांबरीषसंवादेफलश्रुतिकथनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ ॥ श्रीमा-
धवार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ छ ॥ छ ॥ छ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हें पुस्तक,

रावजी श्रीधर गोंधळेकर यांणीं,

पुणें, पेंठ शनिवार, मेहुणपुरा येथें आपले " जगद्धितेच्छु "

छापखान्यांत छापिलें.

आवृत्ति १ ली.

मिति आश्विन शुद्ध १, शके १८१२. तारीख १४ माहे आक्टोबर, सन १८९० इसवी.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति वैशाखमाहात्म्यं समाप्तं ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only